ज्ञातानन्द तरंगिणि - ~~title~~ title page missing - worm eaten holes in some pages - brittle condition neatly repaired - title page missing so the publication place and date not known, but probably published from Benares. Lithoprint edn.

(12)

Bill No. 5/07-08

143

2008-0603

अथशाक्तानंदतरंगिणी प्रारभ्यते॥

श्रीगणेशायनमः॥ प्रणम्यप्रकृतिंनित्यां परमात्मस्वरूपिणीं॥ तन्य
ते भुक्तिमुक्त्यर्थं शाक्तानंदतरंगिणी॥ अथकाप्रकृतिः॥ तथाचोक्तं
यामले॥ सत्वंरजस्तमइतिगुणत्रयमुदाहृतम्॥ साम्यावस्थेतियेते
षामव्यक्तांप्रकृतिंविदुः॥ साएवमूलाप्रकृतिः प्रधानंपुरुषोपिच॥ अ
न्यत्रापि॥ सत्वंरजस्तमइतिगुणानांत्रितयंप्रिये॥ यदासापरमाशक्ति
र्गुणाधिष्ठासमाचरेत्॥ प्रकृति त्वंभवेत्तस्याः पुरुषःस्यात्सदाशिवः॥
नित्याशब्दमाहशक्तियामले॥ ब्रह्मविष्णुशिवादीनां भावो यस्यानि
जेच्छया॥ पुनःप्रलीयतेयस्यांनित्यासापरिकीर्तिता॥ परमात्मासौ
आत्माचेति॥ परमात्मा उत्कृष्टः आत्मा इत्यर्थः॥ उत्कर्षत्वंस्वेच्छयाब्रह्म
विष्णुशिवादीनांशरीरंधत्ते॥ अथवातत्तदिन्द्रियरहितोपितत्तदिंद्रि
यजन्यप्रत्यक्षाश्रयः॥ तथाचोक्तंश्रुतिः॥ अपाणिपादोजवनोगृहीता
पश्यत्यचक्षुः सशृणोत्यकर्णः॥ नित्यज्ञानकृत्याश्रयः॥ परमात्मासर्व
लाघवात् एकएव॥ नचजन्यज्ञानकृत्याश्रयोजीवात्मासचानन्तः॥
मनुष्यपशुपक्ष्यादिभेदात्॥ तथाशिवविष्णुदुर्गादीनां शरीरभेदात्
परमात्मानानाएवास्तुइतिवाच्यं॥ भक्तानुग्रहायगृहीतशरीराणां नाना
त्वेन तत्रनानात्वभ्रमात्॥ नहिभ्रमाद्वस्तुसिद्धिरिति॥ उल्लासेप्रथमे
वक्ष्येशरीरंकर्म्मसम्भवं। दीक्षांद्वितीयेवक्ष्यामितृतीयेयोगनिर्ण
यं॥ प्रातःकृत्यंचतुर्थेतु आसनंपंचमेतथा॥ अन्तर्यागविधिंषष्ठे
नित्यपूजांचसप्तमे॥ वर्णमालाविधानंतुनवमेजपलक्षणं॥ महासे
तुंचसेतुंचकुल्लुकांदशमेतथा॥ मुखस्यशोधनंरुद्रेद्वादशेचपुर
श्क्रियां॥ संस्कारंयंत्रराजस्यबलिदानंत्रयोदशे॥ फलंचतुर्दशेचै
वउपचारादिदानजं॥ नामस्मरणपूजादिफलंपंचदशेतथा॥ कलौ
संसर्गदोषादिप्रायश्चित्तंतु षोडशे॥ कुण्डंसप्तदशेचैवहोमसष्टा
दशेततः॥ गुरुपादरजोध्यात्वाकृतउल्लासनिर्णयः॥ ज्ञानभाष्ये
देव्युवाच॥ शरीरंकीदृशंनाथमुक्तिर्वाकेनकर्मणा॥ इदानीं श्रोतु

भिच्छामिब्रूहिमेशशिशेखर॥ईश्वरउवाच॥श्रृणुदेविप्रवक्ष्यामि
शरीरंकर्म्मरूपिणं॥रजस्वलाचयानारीविशुद्धापंचमेदिने॥पी
डिताकामबाणेनततःपुरुषमीहते॥भगलिंगसमायोगान्मैथु
नंस्यात्तदातयोः॥अन्योन्यस्पर्शनादेवजायतेचमहत्सुखं।स्त्रेत
चतथारेतःप्राणापानैर्विसंश्रिते॥क्षितिरापस्तथातेजोवायुराका
शमेवच॥सर्वेषांतत्रतत्वंस्याद्देहस्थंरक्तबीजयोः॥नाभिरंध्रेंतदादे
विभ्राम्यतेचसमीरणः॥कुम्भकारोयथाचक्रेघटतेचघटादिकं॥त
थासमीरणोगर्भेघटतेप्राणिनांतनुं॥कललंचैकरात्रेणबुद्बुदंपंचमेदि
ने॥शोणितंदशरात्रेणमांसपिंडंचतुर्द्दशे॥मासेकेचैवसंपूर्णेमांस
पिंडोंऽकुरायते॥आदौसंजायतेजीवोब्रह्मांडसहसांकुरः॥तस्यम
ध्येसुमेरुश्चकंकालदंडरूपिणः॥चराचराणांसर्वेषांदेवादीनांवि
शेषतः॥आलयःसर्वभूतानांमेरोरभ्यन्तरेपिच॥प्रदीपकलिकाका
रोजीवोहृदिसदास्थितः॥रज्जुबंधोयथाश्येनोगतोप्याकृष्यतेपुनः।
गुणबद्धस्तथाजीवःप्राणापानेनकृष्यते॥जीवस्यपरमेशानिपरिवा
रगणान्शृणु।अक्षिणीनासिकाकर्णौजिव्हाचकमलानने॥हस्तौ
पादौमहेशानिगुह्योपस्थौक्रमात्प्रिये।नाभिंचपरमेशानिमनश्च
परमेश्वरि॥जाग्रत्स्वप्न सुषुप्त्यवस्थासेवतेहृदिसंस्थितः॥इन्द्रि
याणांचसर्वेषांमनःपरमसारथिः॥पापपुण्येमहेशानिबंधनंमनसः
प्रिये॥संगत्यासदसत्कर्म्मजीवःसर्वंकरोतिहि॥शुद्धसत्वात्मको
ब्रह्मसदसत्कर्म्मवर्ज्जितः॥मनसाजीवसंयोगात्सत्कर्मंकुरुतेस
दा॥मासद्वयेतुसंपूर्णेमेरुस्तत्रप्रजायते॥मज्जास्थीनित्रिभिर्मासैः
केशास्त्वक्चचतुष्टये॥कर्णाक्षिनासिकावक्त्रकण्ठोदरंचपंचमे॥
शुक्राद्युत्पद्यतेरक्तंरक्ताद्बिंदुसमुद्भवः॥प्राणतोवायुरुत्पन्नःकाला
ग्निःस्यादपानतः॥शुक्रतोनाडिकोत्पत्तिःशुक्रादग्निसमुद्भवः॥मांस
तश्चमनोत्पत्तिर्मज्जाचापिततोभवेत्॥वायुनाप्राणनिष्पत्तिरपा
नादग्निसंभवः॥शुक्रेणोत्पादिताजिव्हानासिकासर्वदेहिनां॥रक्ता
दुत्पद्यतेनेत्रंवामंचैवतुदक्षिणं॥प्राणादुत्पद्यतेशून्यंघ्राणंरंध्रद्वयं
तथा॥षष्ठेमुखंतथापादौसर्वांगानिचसप्तमे॥संधिःसंपूर्णतांयाति

अष्टमेमासिवैततः॥ अण्डाधारःसकेकालआरभ्यस्तदमूलतः
द्वात्रिंशज्ज्ञानविज्ञेयोग्रंथिनोकर्द्दूतेसदा॥ तस्यमध्येसदासर्वोना
ड्य स्तत्रव्यवस्थिताः॥ इडाचपिंग[illegible]चैवसुषुम्ना चतृतीयकः
गांधारीहस्तिजिव्हाचपूषाचैवयशस्विनी॥ अलम्बुसाकुहूश्चैवशं
खिनीदशमीतथा॥ अन्याश्चनाडिकाःक्षुद्राःसहस्राणिद्विसप्ततिः
॥ इडाचवामभागेतुपिंगलादक्षिणेतथा॥ ब्रह्मरंध्रेसुषुम्ना चगं
धारिवामचक्षुषि॥ दक्षिणेहस्तिजिव्हाचपूषाचकर्णदक्षिणे।वामे
यशस्विनीचैवमुखेचालम्बुसामता ।कुहुश्चलिंगमूलेतुशंखि
नी शिरसोपरि ॥एवंदेहेसमावृत्यतिष्ठंतिदशनाडिकाः॥ क्षिति
श्चवारितेजश्चपरमाकाशमेवच॥ स्थैर्य्यंशताइमेपंचवाह्याभ्यं
तरएवच ॥अस्थिचर्म्मतथानाडीलोममांसस्तथैवच ॥एतेपं
चगुणाःप्रोक्तापृथिव्यांचव्यवस्थिताः॥ मलंमूत्रंतथाश्लेष्माशुक्रं
शोणितमेवच॥एतेपंचगुणाःप्रोक्ताआपस्तपेव्यवस्थिताः॥क्षुधातृष्णा
तथानिद्राप्रमोहःकांतिरेवच॥एतेपंचगुणाःप्रोक्तास्तेजस्तत्रव्यवस्थिताः
विवोधाक्षेपनाशश्चाप्यवकाशस्तथैवच॥एतेकष्टगुणाःप्रोक्ताआकाशेच
व्यवस्थिताः ॥प्राणापानसमानश्चोदानव्यानौचवायवः॥ नागः
कुर्म्मोऽथकृकलोदेवदत्तोधनंजयः॥एतेदशगुणाःप्रोक्ताःसर्वे
प्राणवसाहूनः॥ हृदिप्राणोवसेन्नित्यमपानोगुदमंडले॥समा
नोनाडिदेशेतुउदानःकंठदेशतः॥ व्यानःसर्वशरीरेतुप्रधानाश्चवा
यवः॥ ब्रह्मांडेयेगुणाःसंति तेतिष्ठंतिकलेवरे॥ पातालंभूधरंलो
का आदित्यादिनवग्रहाः॥ नागाश्चसर्वेदेहिनांपिंडमध्येव्यवस्थि
ताः॥पादाधस्तलंविंद्यात्तदूर्द्धवितलंतथा॥ जानुनोःसुतलश्चैववित
लंसंधिरंध्रके॥ तलातलंगुल्फमध्येलिंगमूलेरसातलं॥पातालंकटि
सन्धौचपादादौलक्षयेद्बुधः॥ भूर्लोकोनाभिदेशेतुभुवर्लोकस्तथा
हृदि ॥स्वर्लोकःकण्ठदेशेतुमहर्लोकश्चचक्षुषि॥जनलोकस्तदूर्द्ध
चतपलोकोललाटके॥सत्यलोकोमहायोनौभुवनानिचतुर्द्दश ॥त्रिको
णेचस्थितोमेरुरूर्द्धकोणेचमंदरः॥ कैलासोदक्षिणेकोणेवामकोणे
हिमालयः॥ब्रह्माविष्णुस्तदूर्द्ध्वंसत्येतेकुलपर्वताः॥अग्निस्थानेचदृष्ट

न्योजम्बुद्वीपोव्यवस्थितः॥ कुशद्वीपः क्रौंचद्वीपः शिरासु च॥ ॥ शाकद्वीपः पयोरक्तः प्राणिनां सर्वसंधिषु॥ तदूर्द्धे शाल्मलिद्वीपः प्लक्षः श्चलोमसंचयः॥ नाभिश्च पुस्कद्वीपः सागरस्तदनन्तरं॥ लवणोदस्तथा मूत्रे शुक्रे क्षीरोदसागरः॥ मज्जादधिसमुद्रश्च तदूर्द्धे घृतसागरः॥ वसोदके च्वरः प्रोक्तः इक्षुस्यान्मांसशोणितं॥ शोणितेषु सुराः प्रोक्ता ख्याताः सागराः कीर्त्तिताः॥ ग्रहणां मंडलं चैव शृणु वस्यामि पार्व्वति॥ नाद चक्रे स्थितः सूर्यो विन्दुचक्रे च चन्द्रमाः॥ लोचने मंगलः प्रोक्तो हृदि सोमसुतस्तथा॥ उदरे च गुरुश्चैव शुक्रे शुक्रस्तथैव च॥ नाभिचक्रे स्थितो मंदो मुखे राहुः स्थितः सदा॥ पादे नाभौ च केतुश्च शरीरे ग्रहमंडलं॥ नवमे मासि गर्ब्भस्थः सर्वान् संस्मरते मनः॥ नवद्वारे पुरे देही समयांश्च विकारिकान्॥ सुखं दुःखं समं कृत्वा भुक्तं च हृदये नृणां॥ सुकृतं दुष्कृतं चैव यत्कृतं पूर्व्वजन्मनि॥ तत्सर्वं सकलं ज्ञात्वा ऊर्द्धपादस्त्वधोमुखः॥ गर्ब्भे तु सुप्रविष्टे तु स्तिमिते घोरदर्शने॥ यदि माता सुखं भुंक्ते अनुपानादिकं ततः॥ जनन्या नाभिदेशे तु सुखं दत्वा पिबत्यसौ॥ ततो जीवति गर्ब्भोसौ अन्यथा मरणं भवेत्॥ योनिद्वारं तु संकीर्णं यदि मे निर्गमो भवेत्॥ अभ्यस्यामि शिवं ज्ञानं संसारार्णवतारणं॥ चिरयोगी तथा भूत्वा मुक्तो यास्यामि तत्क्षणात्॥ एतस्मिन्नंतरे देवि विश्वेषां गर्भसंकटे॥ निःसार्यते तदा बालः प्रबलैः सूतिमारुतैः॥ पतितो पि न जानाति मूर्च्छितोपि ततश्च्युतः॥ स्पृष्टवातगभीरेण योनिरंध्रस्य पीडनात्॥ विस्मृतं सकलं ज्ञानं गर्भे यच्चिंतितं यदि॥ यथा भवति तत्त्वेषु स्पृति भूतेषु पीडनात्॥ मातरं स्मरते नित्यं बुभुक्षा हृढरोदनं॥ रक्ताधिका भवेन्नारी भवेच्छुक्राधिकः पुमान्॥ नपुंसकं ततो जातं समे च रक्तवीजयोः॥ पंचैतान्यपि सृज्यंते गर्भस्थस्यैव देहिनः॥ आयुः कर्म्म च वित्तं च विद्या निधनमेव च॥ बालकश्च शिशुश्चैव गण्डः कैशोरकस्तथा॥ अतः परन्तु युवकः प्रौढश्चैव ततः परं॥ अतिप्रौढस्तथा वृद्धस्त्वतिवृद्धस्ततः परं॥ पलितं मरणं चैव अवस्थाः परिकीर्त्तिताः॥ तत्क्षणादेव गृण्हाति शरीरमाति वाहिकं॥ केवलं तन्मनुष्याणां नान्ये

षांप्राणिनांक्वचित्॥ प्रेतदेहमितिप्रोक्तंक्रमादेतेनसंशयः। ततःश्र
पिंडीकरणेबांधवैःसुकृतेनरैः॥ पूर्णेसंवत्सरेदेहमतोन्यंप्रतिपद्यते॥
ततःसनरकेयातिस्वर्गेवास्वेनकर्म्मणा। तत्क्षणात् मृत्युक्षणात्।
देवत्वमथमानुष्यंपशुत्वंपक्षितांतथा॥ कृमित्वंस्थावरत्वंचजा
यतेजन्मकर्म्मभिः। स्थावराजंगमाद्याश्चपक्षिणःपशवोनराः॥जा
यंतेचम्रियंतेचसंसारेदुःखसागरे॥ कर्मणाजायतेजन्तुःकर्मणै
वप्रलीयते॥ देहीविनष्टेतत्कर्मपुनर्देहंप्रलभ्यते॥ यथाधेनुसहस्रे
षुवत्सोविन्दतिमातरं॥जायंते॥ तथाशुभाशुभंकर्मकर्त्तारमनुग
च्छति॥प्राक्तनंबलवत्कर्मकोऽन्यथातत्करिष्यति। देहःकर्मात्म
कःप्रोक्तस्तत्रदेविप्रतिष्ठितम्॥ कर्म्मयोगानुरूपेणनिर्म्माणंविधि
नादिशेत्॥ चराचरमिदंदेविसर्वंकर्मात्मकंप्रिये। मातावापितावा
कर्मकर्म्मैवपरमंगुरुः॥ स्वर्गंवानरकंवापिकर्म्मैवलभतेनरः॥
सुखदुःखमयैःस्वीयैःपुण्यपापैर्नियन्त्रिताः। तत्तज्जातियुतंदे
हंसम्भोगंचस्वकर्मजं। अत्रजन्मसहस्रैस्तुसहस्रैरपिपार्वति॥
कदाचिल्लभतेजंतुर्मानुष्यंपुण्यसंचयात्॥ निद्राभीमैथुनाहाराः
सर्वेषांप्राणिनांसमाः॥ ज्ञानवान्मानवःप्रोक्तोज्ञानहीनःपशुःप्रि
ये॥ सस्यदंस्वप्नसंकाशंयौवनंकुसुमोपमम्॥ तडित्वत्परमायुश्च
यस्यज्ञाननताधृतिः॥ चतुरशीतिलक्षेषुशरीरेषुशरीरिणः॥नमानु
ष्यंविनान्यत्रतत्वज्ञानन्तुलभ्यते॥ ब्रह्मविष्णुशिवादेविदेवता
मृतजातयः॥ नाशमेवानुधावंतितस्मात्श्रेयःसमाचरेत्। स्व
देहधनदारादिनिरताःसर्वजंतवः॥जायंतेचम्रियंतेचत्वच्छत्ता
ज्ञानमोहिताः॥ प्रभवंसर्वदुःखानामाश्रयंसकलापदां॥आल
यंसर्वपापानांसंसारंवर्जयेत्प्रिये॥ प्रतिक्षणमयंकालःक्षीयमाणे
नलक्ष्यते। आमकुम्भइवाम्भस्थोविशीर्णश्चविभाव्यते॥ अपत्यंमे
कलत्रंमेधनंमेबांधवाश्चमे॥लपंतमितिसत्यंतुअत्तिकालोवृकोऽरः॥
पृथिवीदह्यतेयेनमेरुश्चापिविशीर्यते॥ शुष्यतेसागरजलं॰
शरीरेष्वपिकाकथा॥ मोहपापमयैःपाशैर्नरोबद्धोहितिष्ठति॥
स्त्रीधनादिषुसंसक्तोमुच्यतेनकदाचन। असकृद्देहकर्म्माणि॰॰

सुखदुःखानि भुञ्जते॥ परत्रा ज्ञानिनो देवि पान्त्यायांति पुनः पुनः॥
अपरं बंधनं सेत्तं दुष्ट संगमहाविषं॥ सत्संगश्च विवेकश्च निश्चलेन
नयनद्वयं॥ यस्य नास्ति नरः सोऽन्धः कथं न स्यादनाकुलः॥ द्वे पदे
मोक्षबन्धाय निर्म्म मेति ममेति च। ममेति बध्यते जंतु र्न ममेति न ब
ध्यते। ममेत्यध्यासना द्बंधो विमुक्ति र्न ममेति च॥ मांसलुब्धो यथा
मत्स्यो लोह शंकुं न पश्यति॥ सुखलुब्धस्तथा देही यमबाधां न पश्य
ति॥ कृत्वा पापं विनिर्भिन्नं सिक्तं विषयसर्पिषा॥ वगेत्वेषानलैः पं
कं मृत्युरश्नाति मानवं॥ स्वदेहमपि जीवोयं त्यक्त्वा याति कुलेश्वरि।
स्त्रीमातृधनपुत्रादिसम्बन्धः केन हेतुना। शतं जीवति यद्यल्पं निद्रा
स्यादर्द्ध हारिणी॥ बाल्यभोगजरादुःखैर्वर्द्धी तदपि निष्फलं॥ दुःख
मूलं हि संसारः स यस्यास्ति स दुःखितः। तस्य त्यागः कृतो येन स सु
खी नापरः प्रिये। प्रभाते मलमूत्राभ्यां मध्यान्हे क्षुत्पिपासया। रात्रौ
मदननिद्राभ्यां बाध्यंते मानवाः सदा। दिव्यौषधं न सेवेत महाव्याधि
विनाशनं॥ तद्व्याधिवर्द्धनापथ्यं कुर्वेति बहुभेषजं॥ सकर्मफलदे
हित्वा दुष्कर्म्माणि करोति यः॥ कामधेनुं समाक्रम्य द्यर्के सीरं समार्गेति
।अनित्यानि शरीराणि विभवो नैव शाश्वतः। नित्यं सन्निहितो मृत्युः कर्त्त
व्यो धर्म्म संचयः॥ अध्रुवेण शरीरेण प्रतिक्षण विनाशिना। ध्रुवं यो ना
र्जयेद्धर्म्मं न सज्ञेयो मूढचेतनः॥ नामुत्र हि सहायार्थं पिता माता च गच्छ
ति॥ न च पुत्रो न च ज्ञाति र्धर्म्म स्तिष्ठति केवलं॥ पुत्रदारमयैः पाशैः पु
मान्बद्धो न मुच्यते। पंडिते चैव मूर्खे च वलि न्यप्यथ दुर्बले। ईश्वरे
षु दरिद्रे षु मृत्योः सर्वत्र तुल्यता। राजतः सलिलादग्ने श्चौरतः स्वज
नादपि। भयमर्थवतां नित्यं मृत्युः प्राणभृतामिह॥ कार्य्यमद्यैव कर्त्त
व्यं पूर्वाण्हे चापराण्हिकं। न हि प्रतीक्ष्यते मृत्युः कृतमस्य न वा कृतं॥ क
र्म्मणा मनसा वाचा यो धर्म्म निरतः सदा। अफलाकांक्षि चित्तो यः स मो
क्षमधिगच्छति॥ अफलाकांक्षि स्वकीय भोगजनक सुकृत कांक्षारहि
त इत्यर्थः॥ अहो मोहस्य माहात्म्यं तन्मया जनितस्य च॥ किमन्यमपि
देवेशि मोहयेत्स्मरानपि॥ इति जामलवचनात्॥ मार्कण्डेये॥ महा
मायाहरेश्चैषा तया संमोह्यते जगत्॥ तया महामायया जगत्संमोह्य

तेनकेवलंजगत्संमोह्यतेदेवानामपिचेतांसि॥ज्ञानिनामपिचेतांसि
देवीभगवतीहिसा॥बलादाकृष्य मोहायमहामाया प्रयच्छति।ज्ञानि
नामिति प्रसंशायामिन्।नित्यज्ञानिनामपि॥महतीचासौमायाचे
ति महामायाब्रह्मविष्णुशिवादीनांमोहजनककर्त्तृत्वान्महामाया
तथाचोक्तंयामले॥सैवमायाच प्रकृतिर्यामोहयतिशङ्करं।हरि
न्तथाविरिञ्चिञ्चतथैवाल्पांश्चनिर्ज्जेवान्॥कालिकापुराणे॥ग
र्भान्न ज्ञानसंपन्नंप्रेरितंसूतिमारुतैः।।उत्पन्नंज्ञानरहितंकुरुते
यानिरंतरं॥पूर्वातिपूर्वेसंस्कारंसंमोहेननियोजते॥आहारादौ
ततोमोह ममत्वज्ञानसंशयः॥क्रोधोपरोधलोभेषु क्षिप्त्वाक्षिप्त्वा
पुनःपुनः॥पश्चात्कामेनियोज्याशुचिन्तायुक्तमहर्निशं॥सामहामा
याद्विविधाविद्या अविद्याच॥यामहामायामुक्तेर्हेतुभूतासाविद्या।
यामहामायासंसारबन्धहेतुभूतासाअविद्या॥मार्कण्डेये॥साविद्या
परमामुक्तेर्हेतुभूतासनातनी॥संसारबन्धहेतुश्चसैवसर्व्वेश्वरेश्वरी
॥विद्यावाप्यथवाविद्याद्वावेतौमायपाचनौ॥ तत्कर्म्मयन्नबन्धायसा
विद्यापरिकीर्त्तिता॥यन्नबन्धायतत्कर्मसाविद्यासमुदीरिता॥विद्या
तुसर्वदासेव्यानापविद्याकथञ्चन॥अविद्याकर्म्मबन्धःस्याद्विद्याज्ञा
नं प्रणश्यति।ज्ञाननाशाद्भवेद्धानिर्हानेःसंहरणंपुनः।।संसारात्तुभवे
द्घोराद्घोरंनरकमेवच॥तस्माद्विद्याकुत्रापि नसेव्यापिकदाचन॥
याविद्यासामहामायासातुसेव्यासदाबुधैः।श्रुतिः।।योविद्यामुपा
सतेसोपंतमः प्रविशति इत्यन्यत्रापि॥संसारकनियतिरूपोऽविद्या
इतिरुद्रयामले॥सुखदामोक्षदानित्यासर्वभूतेषुसंस्थिता॥ य
दातुष्टाभवेन्मायातदासिद्धिमुपासते॥वन्दनीयासदास्तुत्यापूज
नीयाञ्चसर्वदा॥श्रोतव्याकीर्त्तितव्याचमायानित्यानगाह्यजा॥ दे
ध्यानकालंगमयेत् द्यूतक्रीडादिनासुधीः॥गमयेद्देवतांपूजाजपया
गस्तवादिना॥किमन्यैरसदालापैर्यदायुर्व्ययतामियात्॥तस्मान्मं
त्रादिकंसर्वंविज्ञायश्रीगुरोर्मुखात्॥मुखेनमुच्यतेदेविघोरसंसार
बंधनात्॥ ॥इतिशाक्तानन्दतरंगिण्यांप्रथमोल्लासः॥१॥ शृणुदे
विप्रवक्ष्यामियन्मांत्वंपरिपृच्छसि।विनादीक्षांनमोक्षःस्यात्प्राणिनां

शिवशासनात्॥ नयोगेनविनामंत्रोनमन्त्रेणविनाहिसः॥द्वयोर
भ्यासयोगेनब्रह्मसंसिद्धिकारकं॥तमःप्रविततेगेहेघटोदीपेनदृश्य
ते॥एवंमायावृतोह्यात्मामनुनागोचरीकृतः। सम्प्राप्तेषोडशेवर्षेदी
क्षांकुर्य्यात्समाहितः॥रसैर्मन्त्रैर्यथाविद्धमयःसौवर्णतांव्रजेत्।
दीक्षाविद्धस्तथाह्यात्माशिवत्वंलभतेध्रुवं॥ इतिकुलार्णवात्॥मंत्र
मुक्तावल्यां॥जपोदेवार्चनविधिःकार्य्योदीक्षान्वितैर्नरैः॥रुद्रयामले
॥आगमोक्तविधानेनकलौदेवान्यजेत्सुधीः॥नहिदेवाःप्रसीद
न्तिकलौचान्यविधानतः॥आगमशब्दव्युत्पत्तिमाह॥रुद्रयामले॥
आगतंशिववक्त्रेभ्योगतंचगिरिजामुखे॥मतंश्रीवासुदेवस्यतस्मा
दागमउच्यते॥वक्त्रेभ्यइतिबहुवचनंपञ्चाम्नायलाभार्थं॥तथाचकु
लार्णवे॥समंपंचमुखेभ्यश्चपञ्चाम्नायाःसमुद्गताः।पूर्वपश्चि
मतश्चैवदक्षिणोत्तरतोभवेत्॥ऊर्द्धेनयत्पधस्थश्चऊर्द्धाम्नाय
इतीरितः॥यावन्तःपांशवोभूमेस्तावन्तःसमुदीरिताः॥एकैका
म्नायपामंत्राभुक्तिमुक्तिफलप्रदाः।सर्वेषामेवमन्त्राणांदेवताफ
लप्रदा इतिवचनेभ्यः॥वासुदेवस्यसंमतमित्यर्थः। तेनवेदविरु
द्धत्वाद्बौद्धाद्यागमव्युदासः॥सदागमएवआगमशब्दस्यमुख्यत्वा
त्॥अतएवागस्त्यसंहितायां॥असदागमस्यनिन्दामाहशिवः॥क
लौप्रायेणसर्वेशिवराजसास्तामसास्तथा॥निषिद्धाचरणाःसन्तो
मोहयन्त्यपरान्बहून्॥आचाभ्यांपिशितंरक्तंसुराञ्चैवसुरेश्वरि
॥वर्णाश्रमोचितंधर्ममविचार्यपिबंतिये॥भूतप्रेतपिशाचास्तेभव
न्तिब्रह्मराक्षसाः॥इतिवचनात्॥श्रीक्रमे॥शिवेनपरमाभक्त्याद्वा
भ्यांकृतंतत्समुद्धृतं॥वाच्यवाचकभावेनद्वाभ्यांब्रह्मप्रकाशितम्॥
दीक्षाशब्दार्थमाह यामले॥दिव्यज्ञानंयतोदद्यात्कुर्यात्पापक्षयंत
तः॥तेनदीक्षेतिलोकेऽस्मिन्कीर्त्तितामंत्रपारगैः॥उप चारसहस्रै
स्तुयोजितांभक्तिसंयुतां।अदीक्षितार्च्चनंदेवानगृह्णन्तिकदाचन॥
कर्म्माखिलंवृथायस्मात्तस्माद्दीक्षितःप्रभुः॥क्रियासारे॥कल्पेतुष्ट
न्तुयोमन्त्रंजपेद्गुरुमनाश्रितः॥मूलनाशोभवेत्तस्यफलमस्यसुदू
रतः॥यामले॥गुरोर्मुखान्महाविद्यांगृह्णीयात्पापनाशिनीं॥तस्मा

यत्नाद्गुरुंकृत्वा मंत्रयन्त्रसमाचरेत्॥ गुरुशब्दार्थमाह यामले॥
गकारःसिद्धिदःप्रोक्तोरेफःपापस्यदाहकः॥ उकारःशंभुरित्युक्तस्त्रि
तयात्मागुरुःपरः॥ सारसंग्रहे॥ विशुद्धमातृपितृकोजितेन्द्रियःस
र्वागमज्ञःपरदुःखकातरः॥ यथार्थवाग्बोधवेदाङ्गपारगः शांतः
कुलीनोगुरुरीरितोद्विजः॥ द्विजदत्युपादानाद्ब्राह्मणेभ्यः॥ तंत्रे॥
अनाचारोद्विजोयस्तुवर्णानांगुरुरेवसः॥ अन्यत्रापि॥ अधर्मनि
रतोभूत्वाश्रुत्वाद्विजगुरोर्मुखात्॥ सर्वसिद्धिमवाप्नोतिशीघ्रंदेवः
त्वमाप्नुयात्॥ शूद्रःशूद्रमुखात्श्रुत्वाविद्यांवामंत्रमुत्तमम्॥ ग
हीत्वानरकंयातिदुःखमाप्नोतिनित्यशः॥ नवरत्नेश्वरे॥ सर्वेषामेव
दीक्षानांमुक्तिःफलमखण्डितं॥ अविशेषाद्भवत्येषाप्रासंग्यकस्तु
मुक्तयः॥ यामले॥ दीक्षितोब्राह्मणोयातिब्रह्मलोकमनामयं॥ ऐ
न्द्रलोकंक्षत्रियोऽपिप्राजापत्यंतथाविशः॥ यातिगन्धर्वनगरंशू
द्रोदीक्षाप्रभावतः॥ अत्रशूद्रदीक्षाधिकारश्रुतेः नशूद्रायमतिन्द
द्यादितिवचनंवेदमंत्रपरं॥ देवताविशेषपरं मंत्रविशेषपरंवा॥
वाराहीतन्त्रे॥ गोपालस्यमनुर्देयोमहेशस्यापिपार्वति॥ तत्स
त्याश्चापिसूर्य्यस्यगणेशस्यमनुंतथा॥ एषांदीक्षाधिकारीस्या
दन्यथापापभाग्भवेत्॥ इतिवचनात्॥ देवतांतरस्यमंत्रे शूद्रा
णांनाधिकारः॥ नृसिंहतापनीये॥ श्रुतिः॥ सावित्रींप्रणवं यजुर्ल
क्ष्मींस्त्रीशूद्रयोर्नेच्छंतीति॥ लक्ष्मीं श्रीवीजं लक्ष्मीमंत्रमित्य
पिकश्चित्॥ गोपालस्यदशाक्षरः॥ श्यामायाद्वादशाक्षरमंत्रश्च
स्वाहागर्भोपिशूद्रायदेयः॥ सर्वेषुवर्णेषुतथाश्रमेषु इतिक्रम
दीपिकायामभिधानात्॥ नात्रसिद्धाद्यपेक्षास्तिनरासिद्धिविचिं
तनं॥ नचाधिकारचिंतात्रग्रहणेकालिकामनु रितिकालिकुलस
र्वस्ववचनाच्च तस्माद्गोपालस्यदशाक्षरःश्यामायाद्वाविंशत्य
क्षरमंत्रग्रहणेशूद्रस्याधिकारः॥ भूतशुद्धौ॥ तंत्रोक्तप्रणवंदेवि
वन्हिजायांचसुंदरि॥ प्रजपेत्सततंशूद्रो नात्रकार्याविचारणा ॥
स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रंददातियः॥ शूद्रोनिरयगामीस्यात्ब्रा
ह्मणोयात्यधोगतिं॥ इतिवैदिकमंत्रपरं॥ स्त्रियोदीक्षाशुभाप्रो

क्तामातुरष्टगुणास्मृता॥ स्वप्नलब्धाचयादीक्षातत्रनास्तिविचा
रणा॥ स्त्रियः पदंनसर्व्वस्त्रीपरं विधवायानगुरुत्वं॥ तदुक्तंतंत्र
सारे॥ साध्वीचैवसदाचारागुरुभक्ताजितेन्द्रिया॥ सर्व्वतंत्रार्थसा
रज्ञासधवापूजनेरता॥ गुरुयोग्याभवेदेषाविधवांपरिवर्जयेत्
॥ यत्तुविधवायाः सुतादेशात् कन्यायाःपितराज्ञया॥ नाधिकारो
विनार्य्योपि भार्य्यायाभर्त्तुराज्ञया॥ इतिविधवायागुरुत्वबोध
कवचनं॥ तदमूलकं॥ समूलत्वेपि॥ सिद्धमंत्रनरः सर्व्वमयोग्यं
योग्यतांनयेत्॥ इतिवचनैकवाक्यतयासाधितमंत्रविषयं॥ गु
रुदीक्षातंत्रे॥ सुतमप्यनुगच्छेत्तविद्यामंत्रविशेषतः॥ मनएवम
नुष्यस्यपूर्व्वकर्म्मणिसंशति॥ यदिनस्यान्महेशानिमनुष्यस्यक
थंभवेत्॥ दीक्षायांचकथंतस्यमनोभवतिपार्वति॥ तस्माद्धिय
त्नतोदेविपूर्वविद्यांसमुद्धरेत्॥ गुप्तदीक्षातंत्रे॥ वकुलाश्वत्थवट
कंपत्ररत्नंशृणुप्रिये॥ वटपत्रेमहेशानिशक्तिमंत्रंलिखेत्प्रिये॥
अश्वत्थेविष्णुमंत्रंचबकुलेशिवमंत्रकं॥ रक्तचंदनेनदेवेशिका
श्मीरेणमहेश्वरि॥ शक्तिमंत्रंलिखेद्गौरिचंदनेविष्णुमंत्रकं॥ भ
स्मनाशिवमंत्रंचविलिखेत्परमेश्वरि॥ सप्तसप्तपत्रेषुतत्तद्दे
तायामंत्रंलिखेदित्यर्थः॥ प्राणप्रतिष्ठांतन्मंत्रैः कारयेत्यत्नतःसु
धीः॥ तद्देवतायाः प्राणप्रतिष्ठांकारयेत्॥ यथाशक्त्युपचारेणपूज
येत्परमेश्वरि॥ ततःशिष्योर्घ्यपात्रंचहस्तेकृत्वामहेश्वरि॥ अनेन
मनुनामंत्रीभास्करायनिवेदयेत्॥ अर्घ्यमाह॥ आपःक्षीरंकुशाग्रा
णिघृतंदधितथामधु॥ रक्तानिकरवीराणितथारक्तञ्चचंदनं॥ अष्टां
गएषकोअर्घ्योभानवेपरिकीर्त्तितः॥ ॐ भोदेव पृथिवीपालसर्वश
क्तिसमन्वित॥ ममार्घ्यंचगृह्णाणत्वंपूर्वविद्यांप्रकाशय॥ अर्घ्यंद
त्वानमस्कृत्यकृतांजलिःपठेत्ततः॥ गांधर्वे॥ नरद्याद्भास्करायार्घ्यं
शंखतोयैर्महेश्वरि॥ ॐ सूर्य्यःसोमोयमःकालोमहाभूतानिपंचवै
॥ एतेशुभाशुभस्येहकर्म्मणोममसाक्षिणः॥ सर्व्वेदेवाःशरीरस्था
मममन्त्रस्यसाक्षिणः॥ पूर्वजन्मार्जितांविद्यांममहस्तेप्रदापय॥ प
ठित्वेदंमहेशानिसत्वरंपत्रमुद्धरेत्॥ उद्धृत्यपत्रमेकंतुगुरुहस्तेत्र

दापयेत्॥ गुरुस्तु अक्षरश्रेणीमधीत्य परमेश्वरि॥ सेतुं दत्वा महेशा
नि तन्मंत्राष्टशतं जपेत्॥ शिष्यस्य मस्तके हस्तं दत्वा चाष्टशतं जपे
त्॥ गुरुस्तु प्राङ्मुखो भूत्वा शिष्यः प्रत्यङ्मुखस्थितः॥ अन्यत्र॥
प्राङ्मुखो गुरुरासीनः शिष्यः प्रत्यङ्मुखः स्थितः॥ त्रिवारं दक्षिणे क
र्णे वामकर्णे तथा सकृत्॥ स्त्रीशूद्रविषये कुर्य्याद्वैपरीत्ये न चिंतनं॥
आचम्य संयतो भूत्वा प्राणायामं विधाय च॥ अष्टोत्तरशतं जप्त्वा
ऋष्यादिकसमन्वितं॥ अष्टकृत्वो जपेन्मन्त्रं वामकर्णे सुरेश्वरि॥
इयं दीक्षा सर्व्वतन्त्रे शक्तिर्या परिकीर्त्तिता॥ गुरोर्लब्धं महाविद्या
अष्टोत्तरशतं जपेत्॥ गुरवे दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत्॥ गु
रवे गुरुपुत्राय तत्पत्न्यै वा प्रदापयेत्॥ कुलार्णवे॥ गुरुप्रीतिसमु
त्पन्ने देवताप्रीतिमाप्नुयात्॥ देवताप्रीतिमापन्ने मंत्रसिद्धिर्भवेद्ध्रुवं
॥ पत्ररत्नप्रधानेन दीक्षां कुर्य्यात्कलौ युगे॥ ततः सिद्धो भवेन्मन्त्री
नात्र कार्य्या विचारणा॥ एतज्ज्ञानं विना देवि दीक्षां कुर्य्याच्च यो नरः
॥ दीक्षा तु विफला तस्य अंते तु नरकं व्रजेत्॥ ततः शिष्यो महेशानि
प्रणमेद्दण्डवद्भुवि॥ गुरुर्वदेत्॥ उत्तिष्ठ वत्स मुक्तोसि सम्यगाचार
वान्भव॥ कीर्त्तिः श्रीकांतिमेधायुर्बलारोग्यं सदास्तु ते॥ योगीहृद
ये॥ मंत्रं दत्वा गुरुश्चैव उपवासं समाचरेत्॥ महान्धघोरनरके कृ
मिर्भवति नान्यथा॥ रुद्रयामले॥ दीक्षां कृत्वा यदा मन्त्री उपवासं
चरेद्यदि॥ तस्य देवः सदा रुष्टः शापः पतति मूर्द्धनि॥ तंत्रसारे॥ चन्द्र
सूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये॥ मंत्रमात्रप्रकथनमुपदेशः स
उच्यते॥ रुद्रयामले॥ श्यामायां भैरवीत्यादिछिन्नमस्तासुरभैरवि॥
मञ्जुघोषे तथा रौद्रे पञ्चाङ्गं नेष्यते बुधैः॥ तत्रापि गुह्यकालिविष
ये पञ्चायतनी दीक्षाऽस्त्येव॥ यथा विश्वसारे॥ भूपुरेषु चतुष्कोणे पू
जयेत्क्रमतः सुधीः॥ विष्णुं शिवं गणेशञ्च पूजयेच्च यथाक्रमात्॥
दीक्षायां चक्रविचारे दोषमाह। गुप्तदीक्षातंत्रे॥ यः कुर्य्याच्चक्रग
णनां दीक्षायां पशुपामरः॥ सभ्रष्टः स च पापिष्ठो विष्ठायां जायते कृ
मिः॥ किं ऋणे किं धने चैव राश्यादिकविचारणे॥ सिद्धसाध्यसुसि
द्धारि विचारपरिवर्जिते॥ नास्ति सत्यं महेशानि नक्षत्राणि विचार

णा॥ राघ्यादिगणनंनास्तिशङ्करेणेतिभाषितं॥ आगमकल्पद्रुमे ॥रविसंक्रमणेचैवसूर्य्यस्यग्रहणेतथा॥ तत्रलग्नादिकंकिंचित्त न विचार्य्यंकथञ्चन॥ यामले॥ शरत्कालेयुगाद्यायांग्रहणेचन्द्रसू र्य्ययोः॥ बोधनेचैवदुर्गायाःकालाकालंनशोधयेत्॥ मत्स्यसूक्ते ग्रहणेचमहातीर्थेनास्तिकालस्यनिर्णयः॥ सोमग्रहे विष्णुमंत्रंसूर्य्ये शक्तिंनवाचरेत्॥ यामले॥ सूर्यग्रहेशक्तिमंत्रंनप्रदद्यात्त्रिजीविषुः । नगृह्णीयादपितथायदिच्छेदात्मनोहितं॥ अत्रशक्तिपदंपञ्च मीपरं॥ प्रकरणादित्सदेयकूरः॥ अत्रएवश्रीकामकालीवीजानि लोपादौगोर्ह्रुपोमनुः॥ सूर्य्यस्योपग्रहेलब्धोनृणांशीघ्रफलप्रदं॥ इतियामलवचनमपिसंगच्छते॥ पराश्रीकामबीजानि इतिकुलमू लावतारेपाठः॥ पूर्ववचनेशक्तिमंत्रपदंश्रीबिजातिरिक्तमंत्रपरं॥ इति शिवदीक्षाटीकाकृतः॥ यामले॥ लग्नेवाप्यथवालग्नेयत्रतत्र तिथावपि॥ गुरुराज्ञानुरूपेणदीक्षाकार्याविशेषतः॥ नतिथिंनव्र तंपूजानस्नानंनजपक्रिया॥ दीक्षायांकारणंज्ञानंस्वेच्छाप्राप्तेतुस द्गुरौ॥ सर्व्वेवाराग्रहाःसर्वेनक्षत्राणिचराशयः॥ यस्मिन्नहनिसंतु ष्टोगुरुःसर्वेशुभावहाः॥ यदैवेच्छातदादीक्षागुरुराज्ञानुरूपतः। अथमंत्राणांदशसंस्कारमाह। शारदायां॥ जननंजीवनेपश्चात्ता डनंबोधनंतथा॥ अथाभिषेकोविमनीकरणाप्यायनेमनोः॥ तर्प णंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः॥ मंत्राणांमातृकामध्येत्उद्धारका रोजननंस्मृतं॥ मातृकावर्णस्तु अकारादिक्षकारांतामातृवर्णाः प्रकीर्त्तिताः॥ इतितंत्रगंधर्ववचनात्॥ मातृकायंत्रलिखनमा ह॥ भूमौगोमयलिप्तायांविलिख्याष्टदलान्वितं॥ चंदनाद्यैःकठि न्यावातान्त्रींयंकर्णिकागतं॥ द्विशःस्वरानकेशरेषुवर्गानष्टदलेषु च॥ तस्माच्चगंधपंकेनभूर्जादौयंत्रमुद्धरेत्॥ तान्त्रींयंहसौः॥ कादिमांताःपंचवर्गामातृकाःक्रमशोदिताः। यादिवांताःशादिहां ताःक्षेशेविलिखेत्ततः॥ इतिमातृकायंत्रं॥ प्रणवान्तरितान्कृत्वा मंत्रवर्णान्जपेत्सुधीः॥ एतज्जीवनमित्याहुःसर्व्वमंत्रविशारः दाः॥ दशधाशतधावाजपः॥ यथाविश्वसारे॥ पृथक्शतंवादश

धामंत्रवर्णान्जपेत्सुधीः॥ मंत्रवर्णान्समालिख्यताडयेच्चन्दना
म्भसा।प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं।ताडनंताडयेद्वर्णान
खिलान्चन्दनाम्भसा॥शतंवादशधावापिबोधयेत्तंमनुंततः॥विलि
ख्यमंत्रंतन्मंत्रीप्रसूनैःकरवीरजैः॥तन्मंत्राक्षरसंख्यातैर्हन्याद्यंतेन
बोधनं॥यंत्तेनरमितिवीजेन॥अश्वत्थपल्लवैर्मंत्रमभिषिञ्चेद्विशुद्
ये॥मंत्रस्यचात्मकंवर्णमभिषिंचामिहद्युतं॥अभिषिञ्चेद्दशधावा
प्रत्येकमभिषेचनं॥शुभोदकेनदुग्धेनअभिषेकमुदाहृतं॥संचिन्त्यम
नसामंत्रंज्योतिर्मन्त्रेणनिर्दहेत्॥मंत्रेमनुत्रयंमंत्रीविमलीकरण
न्त्विदं॥तावद्योमाग्निमनुयुक्दण्डीज्योतिर्मनुर्मतः।मनुश्चतुर्द
शस्वरः॥दण्डीअनुस्वारः॥तेनउँ ह्रों कुशोदकेनजप्तेनप्रत्यर्णंप्रो
क्षणंमनोः॥तेनमंत्रेणविधिवद्देवत्तदाप्यायनंमतं॥अमुकमंत्रंत
र्पयामिनमइत्यम्भसाशतं॥मधुनाशक्तिमंत्रेषुवैष्णवेचेंदुमज्ज
लैः॥शैवेघृतेनदुग्धेनतर्पणंसमुदीरितं॥दशधानर्पयेत्तावदिति
॥तारमायारमायोगपुटितेनजपेन्मनुं॥शतमष्टोत्तरेणैवदीपये
त्साधकोत्तमः॥तंत्रांतरेसप्तधादीपनमिति॥जप्यमानस्यमंत्र
स्यगोपनंनप्रकाशनं॥इतिमंत्राणांदशसंस्कारः॥विश्वसारे॥ग
हीत्वाचमहाविद्यांजपेज्जीवावधिप्रिये॥महागुरुनिपातादौन
पूजायांविकल्पना॥मोहाद्यदिवादैवात्पूजयेन्नचसाधकः॥त
स्यसर्वविनाशःस्यान्मारयेत्तंसदाशिवा॥अशुचिर्वाशुचिर्वापिस
र्वकालेपिसर्वदा॥पूजयेत्परयाभक्त्यानात्रकार्य्याविचारणा॥रु
द्रयामले॥पूजयेन्मृतकेवापिजननेसरुजोपिवा॥सर्वत्रैवविधिः
प्रोक्तःसर्व्वकामफलप्रदः॥अथसूतकिनःपूजांवक्ष्याम्यागम
चोदितां॥बाह्यपूजाक्रमेणैवध्यानयोगेनपूजयेत्॥देविविषये
पि वाह्यपूजाकर्त्तव्या॥विशेषविधानात्॥तथाचोक्तंवाराहीतं
त्रे॥तारायाश्चैवकाल्याश्चत्रिपुरायाश्चसुव्रते।सूतकेमृतके
चैवनत्यजेत्तुजपार्च्चनं॥यामले॥अशुचिर्वाशुचिर्वापिगच्छंस्ति
ष्ठन्स्वपन्नपि॥नदोषोमानसेजापेसर्वदेशेतुसर्व्वदा॥विश्वसारे
॥जाग्रत्शयानउत्तिष्ठन्भुञ्जानोगमनेपिवा॥सिद्धमंत्रेणदोषः

स्याद्‌शौचनियमोपिवा॥ नकल्पनादिवारात्रौनच्चसंध्यावसान
के॥ अथगुरुमाहात्म्यं॥ गुरुःसर्वसुराधीशो गुरोःसाक्षीहृताह
ते॥ संगृह्यसकलंकर्मकुर्य्यात्तस्याज्ञयासदा॥ गमनंयजनंजापं
भोजनंस्मरणन्तथा॥ गृहीत्वाज्ञांगुरोःकुर्य्यात्तस्यसिद्धिर्विनाज
पेत्॥ तंत्रे॥ त्रिसंध्यंश्रीगुरोर्ध्यानंत्रिसंध्यंपूजनंगुरोः॥ त्रिसंध्यं
भावयेन्नित्यंगुरुंपरमकारणं॥ क्रोशमात्रेस्थितोभक्त्यागुरुंप्रति
दिनंनमेत्॥ अर्द्धयोजनतःशिष्यःप्रणमेत्पंचपर्वसु॥ एकयोजन
मारभ्ययोजनद्वादशावधिः॥ तत्तत्संख्यागतैर्मासैःप्रणमेत्श्री
गुरुंप्रिये॥ यदिदूरेचचार्व्वंगि स्वगुरुर्नगनन्दिनि॥ सम्वत्सरस्य
मध्येतुपूजयेद्विधिनामुना॥ एकोत्तरायणेकालेएकधारक्षिणाय
ने॥ एवंयोनाचरेद्देविसभवेद्ब्रह्मराक्षसः॥ एकेनगुरुणासार्द्धं स्वपत्यु
परिशेतुयः॥ सयातिनरकंघोरंयावदिन्द्राश्चतुर्द्दश ॥ तंत्रे॥ गुरु
णालोकितःशिष्यःउत्तिष्ठन्त्वासनंत्यजेत्॥ जातिविद्याधनाढ्योपि
दूरेदृष्ट्वागुरुंमुदा॥ प्रणमेद्दण्डवद्भूमौप्रदक्षिणमथाचरेत्॥ आ
यांतमग्रतोगच्छेत्गच्छंतंतमनुव्रजेत्॥ प्रणम्यप्रवसेत्पार्श्वेसः
दागच्छेदनुज्ञया॥ सुखावलोकीसेवेतकुर्य्यादाज्ञाचसादरात्॥
असत्यंनवदेदग्रेनवहुप्रलपेदपि॥ ऋणदानंतथादानंवस्तूनांक्र
यविक्रयं॥ नकुर्य्याद्गुरुणासार्द्धंशिष्योदेविकथञ्चन॥ गुरुर्माता
पितास्वामीबान्धवश्चसुहृद्गुरुः॥ इत्याध्यायमनोनित्यंयजेत्स
र्वात्मनागुरुं॥ गुरोरग्रेपृथक्पूजामौद्धत्यञ्चविवर्जयेत्॥ दीक्षा
व्याख्याप्रभुत्वञ्चगुरोरग्रेपरित्यजेत्॥ आसनंशयनंवस्त्रभूषणं
पादुकेतथा॥ छायांकलत्रमन्यञ्चपत्रपृष्टंतत्सुपूजयेत्॥ यथादेवे
तथामंत्रेयथामंत्रेतथागुरौ॥ यथागुरौतथास्वात्मन्येवंभक्तिक्रमः
स्मृतः॥ गुरुशय्यासनंयानंपादुकोपानहौतथा॥ स्नानोदकंतथाः
छायांलंघयेन्नकदाचन॥ अन्यत्रापि॥ देवछायांगुरोश्छायांशक्ति
छायांनलंघयेत्॥ यदिप्रमादतोदेविगुरोरग्रेप्रपूजयेत्॥ सयातिन
रकंघोरंसापूजानिष्फलाभवेत्॥ रिक्तहस्तेननोपेयाद्राजानंदेवतां
गुरुं॥ फलपुष्पादिकादीनियथाशक्त्यासमर्पयेत्॥ भक्त्यावित्तानु

सारेणगुरुमुद्दिश्ययत्कृतं॥स्वल्पमेवहितत्तुल्यंतुल्यमाढ्यद
रिद्रयोः॥गुर्व्वार्थकृपणोदेविरौरवंनरकंव्रजेत्॥गुरुवाक्यंनतं
कृत्वा आत्मवाक्यंतुस्थापयेत्॥गुरुंजेतुंमनोयस्यपच्यतेनरका
र्णवे॥गुरुर्नामनभाषेतजापकानादृतेःक्वचित्॥ब्राह्मणाःक्षत्रिया
वैश्याःशूद्राश्चनगनन्दिनि॥भुंजतेविविधाभक्त्यागुरोरुच्छिष्टमु
त्तमं॥आगच्छेद्यदिचार्व्वंगिगुरुःशिष्यस्यमंदिरे॥शिष्यस्यत
द्दिनंदेविकोटिसूर्य्यग्रहैःसमः॥चन्द्रग्रहणकालेहितद्दिनंवरव
र्णिनि॥गुरोर्दर्शनमात्रेणसर्वपापैःप्रमुच्यते॥गुरुंवागुरुपुत्रंवा
पत्नींवावरवर्णिनि॥विलंघ्ययदिचार्व्वंगिगच्छेत्साधकसत्तमः॥
ततक्षणात्चञ्चलायांगिनरकंचोनरोत्तरं॥उत्तण्डकल्पे॥सा
क्षाद्वापिपरोक्षेवागुरोराज्ञांसमाचरेत्॥परोक्षेतदनुज्ञानविधानं
शृणुशंकरः॥पूजाकालेचचार्व्वंगिआगच्छेत्शिष्यमंदिरं॥गुरुर्वा
गुरुपुत्रोवापत्नीवावरवर्णिनि॥तदापूजांपरित्यज्यपूजयेत्स्वगुरुं
प्रिये॥यद्यत्स्वंहिगुरोर्द्रव्यंअदत्तंस्वीकरोत्यपि॥तिरश्चयोनिंसो
गच्छेत्क्रव्यादैर्भक्षयेत्सदा॥सहस्रारेगुरोःपादपद्मंध्यात्वाप्रपू
ज्यच॥स्तुत्वाकरपुटंकृत्वामनसाध्यानतत्परः॥विहितंविदधे
नाथविधेयंयत्कृपाकर॥अविरुद्धंभवत्त्वत्रतत्त्वदीयप्रसादतः
॥इतिमंत्रेणसंप्रार्थ्यततःकर्म्मसमाचरेत्॥महिषमर्द्दिनीतंत्रे॥
देव्युवाच॥देवदेवमहादेवकृपयापरमेश्वर॥गुरुपूजाविधानंमेवि
स्ताराद्वदशंकर॥ईश्वरउवाच॥दिव्यवीरंचचार्व्वंगिपूर्वोक्तंबहुशः
प्रिये॥मानवस्यक्रमंदेविसंक्षेपान्निगदामिते॥गुरुःपरमगुरुश्चै
वपरापरगुरुस्तथा॥स्वगुरुःपरमेशानिसाक्षाद्ब्रह्मनसंशयः॥
तत्पितापरमगुरुःस्वयंविष्णुःक्षितौसदा॥तत्पितापरापरगुरु
र्महेश्वरसमःसदा॥गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः॥अ
तएवमहेशानिसाक्षाद्ब्रह्ममयोगुरुः॥अखण्डमण्डलाकारंसर्व
व्यापिसदाशिवं॥सर्वेशंसर्वदंदेवंप्रणमामिपुनःपुनः॥पुरस्तात्पा
र्श्वयोःपृष्ठेनमस्तुभ्यंनमोनमः॥त्रिसंध्यंश्रीगुरोर्ध्यानंत्रिसंध्यंपू
जनंगुरोः॥त्रिसंध्यंभावयेन्नित्यंगुरुंपरमकारणं॥गुरुंविनावरारो

हेनास्तिसिद्धिःकदाचन ॥ गुरुंक्तत्वामहेशानिदिवसेदिवसेप्रिये॥
पूजयेन्मानसैर्गन्धैर्धूपैर्दीपैस्तथोत्तमैः॥ भक्ष्यैर्भोज्यैस्तथापेयैर्दधि
दुग्धैरनेकधा॥ पनसैर्नारिकेलैश्चतथारंभाफलैःप्रिये॥ भिन्नैर्नाना
विधैर्देवि पूजयेत्स्वगुरुंप्रिये॥ स्वगुरुंहिविना देवि नान्यंचगुरुम
र्चयेत्॥ मत्स्यैर्मांसैर्महेशानि पूजयेद्भक्तितःप्रिये॥ गन्धैर्माल्यैश्च
चार्व्वंगि पूजयेद्भक्तितःसदा॥ स्वर्णैश्च पट्टवस्त्रैश्चतथाकार्पास
सम्भवैः॥ अतिचित्रैर्विचित्रैश्च अतिसूक्ष्मैर्मनोहरैः॥ आसनैर्वि
विधैर्देवि रक्तकम्बलसंस्कृतैः॥ तथानानाविधैर्द्रव्यैः पूजयेत्स्वगु
रुंसदा। अलंकारैस्तथादेविविविधैःस्वर्णनिर्मितैः॥ राजतैश्चैवचा
र्व्वंगिस्वगुरुंपूजयेत्सदा॥ गुरुमंत्रंमहेशानि भजपेत्सुरवंदिते॥
गुरुपत्नींमहेशानिपूजयेद्विधिनामुना॥ गुरुवत्तगुरुपुत्रेषुगुरुवत्त
त्सुतेषुच॥ पूजयेत्सत्यहंभक्त्याअमुनाविधिनाप्रिये॥ गुरोरभा
वेचार्व्वंगि गुरुपत्नींचपूजयेत्॥ तदभावेचचार्वंगिगुरुपुत्रंस्वयं
शिवं॥ तदभावेवरारोहेगुरुकन्यांचपूजयेत्॥ तदभावेचचार्वंगि
गुरोःस्नुषांप्रपूजयेत्॥ एषामभावेचार्व्वंगिगुरोर्गोत्रंप्रपूजयेत्॥
गोत्राभावेवरारोहे तथामातामहस्यच॥ मातुलंमातुलानीञ्चापूज
येद्विधिनामुना॥ यदिदूरेचचार्व्वंगिस्वगुरुर्नगनंदिनि॥ सम्वत्स
रस्यमध्येतुपूजयेद्विधिनामुना॥ एकधाउत्तरायणेकाले एकधा
दक्षिणायने॥ पूजयेद्गुरुदेवंचविधिनाचामुनाप्रिये॥ यदिनोपू
जयेद्देवि अनेनविधिनाप्रिये। प्रायश्चित्ती भवेद्देवितत्क्षणात्स
चसाधकः॥ संवत्सरस्यमध्येतुनगच्छेद्यदिसाधकः॥ मंदिरंगु
रुदेवस्यसदाकाशीपुरंसमम्॥ काशीसमंमहेशानियःपश्येद्गुरु
मंदिरं॥ शिवतुल्योभवेद्देवितत्क्षणात्सचसाधकः॥ गुरोर्गृहंसमा
साद्य उच्छिष्टभक्षणंचरेत्॥ तदैवसहसासिद्धिःसाधकस्यभवे
त्प्रिये॥ अभोक्तागुरुदेवस्यउच्छिष्टंवरवर्णिनि॥ विद्यांवापरमेशा
निमंत्रंवानगनंदिनि॥ नजपेत्तुकदाचित्तुकुत्रचित्कचिदेवहि॥ त
भुक्तंचंचलापांगिविष्ठाकूपसमंप्रिये॥ उच्छिष्टभक्षणादेविमुख
श्शोधनंप्रिये॥ ब्राह्मणाःक्षत्रियावैश्याः शूद्राश्चनगनंदिनि ॥

भुंजते विधिवद्भक्त्या गुरुरुच्छिष्टमुत्तमम्॥ गुरुरुच्छिष्टमन्नं च
सदानन्दमयं प्रिये। गुरुं वा गुरुपुत्रं वा पत्नीं वा वरवर्णिनि॥ विलोक्य
यदि चार्वंगि गच्छेत्साधकसत्तमः॥ तत्क्षणात् चञ्चलापांगि न
रकं चोत्तरोत्तरं॥ मंदिरं गुरुदेवस्य कुटीरं यदि शार्व्वति॥ कैलास
सदृशाकारं तदेव नगनंदिनि॥ यद्यदिष्टतमं लोके साधकस्य शु
चिस्मिते॥ तत्सर्व्वं गुरवे दद्यात् भक्त्या परमयत्नतः॥ तदैव सह
सा देवि मंत्रसिद्धिः प्रजायते॥ गुरोराज्ञां समादाय प्रजपेद् निशि चे
द्दि॥ तदैव सहसा सिद्धिरष्टसिद्धीश्वरो भवेत्॥ पूजाकाले च चार्वं
गि आगच्छेच्छिष्यमंदिरम्॥ गुरुर्वा गुरुपुत्रो वा पत्नी वा वरवर्णि
नि॥ तदा पूजां परित्यज्य पूजयेत्स्वगुरुं प्रिये॥ देवतापूजनार्थं यद्ग
न्धपुष्पादिकं च यत्॥ तत्सर्व्वं गुरवे दद्यात्पूजयेन्नगनन्दिनि॥ त
दैव सहसा देवि देवताप्रीतिमाप्नुयात्॥ रुद्रयामले॥ गुरुर्वा गुरुपत्नी
वा पुत्रो वापि समागतः॥ ज्येष्ठो वाप्यर्च्चनामध्ये शिष्यः सर्व्वांश्च संत्य
जेत्॥ आज्ञाया पूजयेच्छिष्य इति शास्त्रस्य निर्णयः॥ गन्धैः पुष्पैः
स्तथा धूपैस्तथा नैवेद्यकैरपि॥ पूजयेद्विधिवद्भक्त्या स्वगुरुं नत्वा स्तुत
त्वा वा॥ गुरुपत्नी महेशानि साक्षाद्देवी स्वरूपिणी॥ गणेशसदृशं
देवि गुरुपुत्रं विभावयेत्॥ शिष्यस्य तद्दिनं देवि कोटिसूर्यग्रहैः समं
॥ चंद्रग्रहणकालं हि तद्दिनं वरवर्णिनि॥ गुरोर्दर्शनमात्रेण सर्व्वपापैः
प्रमुच्यते॥ तत्क्षणाच्चञ्चलापांगि दानं कुर्याद्विचक्षणः॥ स्वर्णदानं
च गोदानं तिलदानं तथैव च॥ वस्त्रं च रजतञ्चैव दानं कुर्यात्सुभ
क्तितः॥ गुरोः प्रीतिं समुद्दिश्य दानं कुर्याद्विचक्षणः॥ गुरोः प्रीतिं समु
त्पन्ने देवताप्रीतिमाप्नुयात्॥ देवताप्रीतिमापन्ने मंत्रसिद्धिं लभेद्ध्रुवं
॥ गुरोः समीपे चार्व्वंगि न मिथ्या मुच्चरेत्क्वचित्॥ गुरोरंगे महेशानि
देवताकारमुत्तमं॥ गुरोः क्रिया महेशानि पूजामूलं महत्पदं॥ गुरो
र्वाक्यं मूलमंत्रं परंब्रह्म स्वयं गुरुः॥ अनेन विधिना देवि प्रत्यहं भा
वयेद्गुरुं॥ तदैव सहसा सिद्धिर्जायते कमलानने॥ ॥इति शाक्तानं
दतरंगिण्यां दीक्षानिर्णये द्वितीयोल्लासः॥ ॥विना चोपासनां देवि
न ददाति फलं नृणां॥ तंत्रे॥ ध्यातः स्मृतः पूजितो वा स्तुतो वा नमितोऽ

पिवा॥ ज्ञानतोऽज्ञानतोवापिपूजकानांविमुक्तिदः॥ इत्यादिसुपू
आदिकंविनाचतुर्व्वर्गफलंसंभवति निर्गुणः ब्राह्मणः केनप्रकारे
णपूजादिकंकार्य्यं॥ शरीररहितत्वात्॥ केनप्रकारेणमुक्त्यादिकं-
दातुंशक्यते॥ अतएवसाधकानांहितायसगुणनिर्गुणभेदात् ब्रह्म
णोद्वैविध्यमाह॥ श्रीरामतापनीयेश्रुतौकुलार्णवेच॥ चिन्मयस्या
द्वितीयस्यनिष्कलस्यशरीरिणः॥ उपासकानांकार्य्यार्थंब्रह्मणोरू
पकल्पना॥ अस्यार्थः॥ चिन्मयस्यज्ञानमयस्य॥ मार्कण्डेये॥ चिति
रूपेणयाकृत्स्नमेतद्व्याप्यस्थितंजगत्॥ अद्वितीयस्यएकस्य॥ तथा
चोक्तंयोगिनीहृदये॥ एकोहिपरमंब्रह्मनानार्थेननिरूप्यते॥ स्थूल
सूक्ष्मविभेदेनपरंब्रह्मस्वरूपिणी॥ गोपालतापनीयेश्रुतिरपि॥ एक
मेवपरंब्रह्ममाययातुचतुष्टयं॥ तस्माद्ब्रह्मवपुरूपेणस्त्रीरूपेणवा
मायपैवनटवद्बहुधाभवति॥ बहुरूपइवभाति॥ माययाबहुरूपया
इतिश्रुतेः॥ निष्कलस्यकलामाया तयावहितस्यच॥ आग्नेयपुराणे
॥ सकलोनिष्कलोज्ञेयः सर्वज्ञःपरमोहरिः॥ देहस्थःसकलोज्ञेयोनि
ष्कलोदेहवर्जितः॥ हरिरित्युपलक्षणं॥ यामले॥ सगुणानिर्गुणाचेति
महामायाद्विधामता॥ सगुणामाययायुक्तातयाहीनातुनिर्गुणा॥
अशरीरिणः॥ मुखहस्तपादाद्यवयवावच्छिन्नशरीररहितस्य॥ भू
तशुद्धौ॥ निष्कलंपरमंब्रह्मकुतःप्रीतिःकुतःसुखं॥ निराकारंनि री
हञ्चरहितंहींद्रियेणच॥ जन्मकर्माणिप्रकृतेर्ब्रह्मणोनास्तिभाविनि।
जन्मकर्म्माणिसर्वाणिप्रकृतेरस्तिभाविनि॥ उपासकानांज्ञानयो
गरहितभक्तानां॥ लैंगे॥ सर्वेषामेवमर्त्यानांविभोर्दिव्यंवपुःशुभं
॥ सकलंभावनायोग्यंयोगिनामपिनिष्कलं॥ योगिनां कर्म्मयोग
ज्ञानयोगभक्तियोगरतानामित्यर्थः॥ आग्नेये॥ साधूनामाश्रम
स्थानांभक्तानांभक्तवत्सलः॥ उपकर्त्तानिराकारस्तदाकारेणजा
यते॥ कार्य्यार्थंसाधकानांचचतुर्व्वर्गफलार्थदम्॥ तथाचोक्तंमा
र्कण्डेये॥ आराधितासैवनृणांभोगःस्वर्गापवर्गदा॥ बृहन्नारदीये
॥ भक्तानांमोक्षदानायभवनोमूर्त्तिकल्पना॥ आराधनाध्यानपूजा
भेदज्ञानात्मिकापरा॥ ध्यानाभेदज्ञानार्थंब्रह्मणोरूपकल्पनाइत्यर्थः

ध्यानंतुतत्तद्देवतायास्तत्तन्मंत्रप्रकटीभूततत्तद्वर्णोत्पन्नमुखह
स्तपाद्याद्यवयवावच्छिन्नशरीरज्ञानविषयार्थमितितुनिष्कर्षोर्थः।
तथाचोक्तं॥गारुडेपि॥अमूर्त्तौचेत्स्थिरोनस्यात्ततोमूर्त्तिंविचिंत
येत्॥यामले॥स्थूलसूक्ष्मविभेदेनध्यानंतुद्विविधंभवेत्॥स्थूलं
मंत्रमयंदेहंस्थूलविग्रहचिंतनं॥करपादोदरस्यापिरूपंयत्स्थू
लविग्रहं॥सूक्ष्मंचप्रकृतिरूपंपरंज्ञानमयंस्मृतं॥सूक्ष्मध्यानंम
हेशानिकदाचिन्नहिजायते॥स्थूलध्यानंमहेशानिकृत्वामोक्षम
वाप्नुयात्॥यामले॥देवतायाःशरीराणिबीजादुत्पद्यतेध्रुवम्॥
तत्तद्बीजात्मकंमंत्रंजप्त्वाब्रह्ममयोभवेत्॥नद्दिष्टंभावयेद्देवियथो
क्तध्यानयोगतः॥वर्णरूपेणसादेवीजगदाधाररूपिणी॥बीजा
द्वर्णात्॥बीजपरिभाषामाह॥कुलचूडामणौ॥एकाक्षरीसमुद्ध
त्यपूर्वबीजंपरंशक्तिरिति॥पूर्वःकइतिपरमीकारः॥गान्धर्वे॥नि
त्यमेकाक्षरंब्रह्मअक्षरंपरमंपदं॥सकृज्जप्त्वाक्षरंमंत्रंब्रह्मभूया
यकल्पते॥जप्त्वातत्साधयेत्सर्वंबहुजापेनकिंफलं॥स्थूलसूक्ष्म
एकएव॥तथाचोक्तंयामले॥घृतस्यद्विविधंदेविकाठिन्यंस्वच्छता
यथा॥काठिन्येस्वच्छतायांतुघृतमेवनसंशयः॥यद्यपि॥दीपादु
त्पद्यतेदीपोयथातत्तद्भविष्यति॥इतिवचनात्॥अथवापूज्यपू
जकयोरभेदज्ञानार्थं॥ब्रह्मणोरूपकल्पना॥तथाचोक्तंकौर्म्मे॥मन्यं
तेयेस्वमात्मानंविभिन्नंपरमेश्वरात्॥नतेपश्यंतितंदेवंवृथातेषां
परिश्रमः॥ईश्वरउपलक्षणम्॥तथाचोक्तंरुद्रयामले॥सर्वदेव
मयींदेवींसर्वदेवमयींपरां॥आत्मानंचिन्तयेद्देवींपरमानंदरूपि
णीं॥प्रसंगाद्योगज्ञानंलिख्यते॥अथापरंप्रवक्ष्यामिसमाधिंभा
वनाशनं॥हृत्पद्मकर्णिकामध्येध्यायेत्सिंहंमनोहरं॥सिंहोपरि
स्थितंपद्मंवक्रंतस्योर्द्ध्वगःशिवः॥तस्योपरिमहादेवीरमतेकाम
रूपिणी॥सितःप्रेतोमहादेवोब्रह्मालोहितपंकजः॥हरिर्हरिस्तुवि
ज्ञेयोवाहनानिमहौजसः॥ध्यायेत्त्वपरमेशानियथोक्तंध्यानयोग
तः॥देवात्मकंस्वमात्मानंभावयेद्यतमानसः॥तस्यानुरूपंयद्य
तत्स्वकीयमितिभावयेत्॥ऐक्यंसम्भावयेच्चित्तंस्वगुरुंदेवता

त्मनां॥श्रीक्रमेपि॥ आत्मानं चिंतयेद्देवींशक्तिमाद्य स्वरूपि
णीं॥मनसावचसाचैवकायिकेनचचिंतयेत् ॥अन्यत्रापि॥आ
त्मभेदेनसंचिन्त्ययानितन्मयतांनरः॥सोहमित्यस्यसततंचिंत
नात्तन्मयोभवेत्॥अहंदेविनचान्योस्मिमुक्तोहमितिभावयेत्
॥रुद्रस्यचिंतनाद्रुद्रोविष्णुःस्याद्विष्णुचिंतनात्॥दुर्गायाश्चिंत
नाद्दुर्गाभवत्येवनचान्यथा॥एवमभ्यासमानस्तुअहन्यहनिपार्व
ति॥जरामरणदुःखाद्यैर्मुच्यतेभवबन्धनात्॥ध्यानयोगपर॰
स्यास्यपूज्योनास्तिकथंचन॥विनान्यासैर्विनापूजांविनाजपैःपुर
स्क्रिया॥ध्यानयोगाद्भवेत्सिद्धोनान्यथाखलुपार्वति॥एतत्तेकथि
तंदेविब्रह्मज्ञानमिदंतव॥विज्ञायगुरुतोदेविसंसारसागरंतरेत्
॥अहंब्रह्मास्मिविज्ञानादज्ञानविलयोभवेत्॥सोहमितिसुसं
चिन्त्यविहरेत्सर्वदाप्रिये॥यथाफेनतरंगादिसमुद्रादुत्थितंमु
ने॥समुद्रेलीयतेतद्वज्जगदात्मनिलीयते॥इतिगांधर्वतंत्रोक्तयो
गः॥तस्मात्॥साधकानांहितार्थायब्रह्मस्त्रीपुंवपुर्धत्ते॥विष्णुया
मले देवींप्रतिविष्णुवचनं॥मातस्त्वत्परमंरूपंतन्नजानातिकश्च
न॥काल्याद्याःस्थूलयद्रूपंतत्कुर्वंतिदिवौकसः॥यामले॥स्त्रीरू
पांवास्मरेद्देवींपुंरूपंवास्मरेत्प्रिये॥स्मरेद्वानिष्कलंब्रह्मसच्चिदा
नंदरूपिणीं॥स्तनयोन्याद्यवयवावच्छिन्नशरीराःस्त्रीरूपावता
राः॥कालीनीलामहादुर्गादुरिताछिन्नमस्तका॥वाग्वादिनीचा
न्नपूर्णातथाप्रत्यंगिरापुनः॥कामाख्यावासिनीबालामातंगी॰
शैलवासिनी॥इत्याद्याःसकलाविद्याःकलौपूर्णफलप्रदाः॥अ
न्यत्रापि॥उमेतिकेचिदाहुस्तांशक्तिंलक्ष्मीतिचापरे॥भवतीत्य
परेचैनांगिरिजेत्यम्बिकेतिच॥दुर्गेतिभद्रकालीतिचंडीमाहेश्व
रीतथा॥कौमारीवैष्णवीचेतिवाराहैंद्रीतिचापरे॥ब्राह्मीतिवि
द्याविद्येतिमायेतिचतथापरे॥प्रकृतिश्चापरेचैववदंतिपरम
र्षयः॥शिश्नाद्यवयवावच्छिन्नशरीरापुंरूपावताराः॥यथाब्रह्म
विष्णुशिवादयः॥एवं मत्स्यःकूर्मोवराहश्चनृसिंहोवामनस्तथा॥
रामोरामश्चरामश्चकृष्णःकल्कीचेतद्दश॥इत्यादिपुंसकंग्रहस्तैरनुप

स्यमेवफलाजनकत्वात्॥ गृहस्थानांचसर्वैस्युर्ब्रह्मवैब्रह्मचारि
णां॥ गृहस्थानांसर्वैस्युरित्युपादानात् शिवविष्णुदुर्गापुरस्कारे
णाउपासना कार्य्या॥ तथाचविमलानंदभाष्येकूर्म्मपुराणं॥ मनुष्या
णामुमादेवितथाविष्णुः सदाशिवः॥ मापस्याभिमतापुंसः साहित
स्यफलप्रदा॥ किंतुकार्य्यविशेषेणपूजितातेस्तदान्नृणां॥ नृणां
मनुष्याणामभेदेनपूजाकार्य्या॥ शैवेदेवीं प्रतिईश्वरवाक्यं॥ ए
कंप्रशंस्यमानंतु सर्व्वानेवप्रशंसति ॥एकंनिंदतियस्तेषांसर्व्वाने
वविनिन्दति॥ ईश्वरस्यप्रसंशायांनसुखंनिन्दायांवानदुःखंतद्दुः
खरहितत्वात्॥ किन्तुनिंदकस्यनरकमेव॥ तथाचोक्तं भाष्ये॥ दे
वीविष्णुशिवादीनामेकत्वंपरिचिन्तयेत्॥ भेदकृन्नरकंयातिया
वदाहूतसंप्लवं॥ आहूतसंप्लवं प्रलयकालपर्य्यंतमित्यर्थः॥ वरा
हे॥ यथादुर्गातथाविष्णुर्यथाविष्णुस्तथाशिवः॥ एतत्त्रयमेक
मेवनपृथग्भावयेत्सुधीः॥ योऽन्यथाभावयेदेतान्पक्षपातेनमू
ढधीः॥ सयातिनरकंघोरंरौरवंपापपूरुषः॥ यामले॥ ध्यानगम्यं
प्रपश्यंतिरुचिभेदात्पृथक्धियः॥ तंत्रे॥ एकैवहिमहामायाना
मभेदंसमाश्रिता॥ विमोहनायलोकानांतस्मात्तमभला भवेत्
॥ प्रवृत्तिमार्गसंस्थस्तुदीक्षाभेदेनपूजयेत्॥ निवृत्तिमार्गमानंतुभे
दवादिविवर्जयेत्॥ शिवविष्णोरुपासनंत्यक्त्वादेव्याउपासना
कर्त्तव्या॥ कोमलान्तःकरणत्वात्॥ भुक्तिमुक्तिदातृत्वात्॥ शिव
विष्णोरुपासनायां कायक्लेशेनमुक्तिमात्रं॥ तथाचशारदायांभुव
नेश्वरींप्रति शिववाक्यं॥ आद्याप्यशेषजगतांनवयौवनासि शै
लाधिराजतनयाप्यतिकोमलासि॥ समयातंत्रे॥ कदाचित् कस्य
मुक्तिःस्यात् कस्यचिद्भक्तिरेवच॥ एतस्याःसाधकस्याथ भु
क्तिमुक्तिःकरेस्थिता॥ रुद्रयामले॥ यत्रास्तिभोगोनचतत्रमोक्षः
यत्रास्तिमोक्षोनचतत्रभोगः॥ शिवापदाम्भोजयुगार्च्चकानां भो
गश्चमोक्षश्चकरस्थएव॥ योन्येभ्योदर्शनेभ्यश्च भुक्तिंमुक्तिंच
काङ्क्षति॥ स्वप्नलब्धधनेनैवधनवान्सभवेद्यदि॥ भुक्तौरज
तविभ्रांतिर्यथाजायेतपार्व्वति॥ तथान्यदर्शनेभ्यश्चभुक्तिंमु

क्तिश्चकोऽस्ति॥ ॥इतिशाक्तानंदतरंगिण्यां अभेदज्ञाननि
र्णयस्तृतीयोल्लासः॥ ॥रुद्रयामले॥ प्रातःकृत्यमकृत्वातु यो
देवींभक्तितोऽर्चयेत्॥ तस्यपूजाचविफलाशौचहीनायथाक्रि
या॥ब्राह्म्येमुहूर्त्तेउत्थायचिंतयेद्गुरुदेवतं॥स्वमूर्द्धनिसहस्रा
रेशिवाख्यपरविंदुके॥ब्राह्म्यमूहूर्त्तमाह यामले॥ द्वौदण्डौरा
त्रिशेषेतुब्राह्म्यमूहूर्त्तंकेविदुः॥ध्यानंयथा॥ ॐशशांकायुतसं
काशंवराभयलसत्करं॥ शुक्लांबरधरंश्रीमंच्छुक्लमाल्यानुलेप
नं॥वामोरोरक्तशक्त्याचयुतंदेवाख्यमव्ययं॥शिवेनैक्यंसमु
न्नीयध्यायेत्परगुरुंधिया॥ एवंध्यात्वापुनश्चैवपञ्चभूतमयै
र्यजेत्॥गंधतत्वंपार्थिवंस्तुकनिष्ठांगुष्ठयोगतः॥शब्दमयंम
हापुष्पंप्रथमांगनियोगतः॥ वायुरूपंमहाधूपंतर्जनीभ्यांनियो
जयेत्॥तेजोरूपंमहादीपंमध्यमाद्वययोगतः॥अमृतंभोज
नंतद्वदनामिकांगुलियोगतः॥नमस्कारेणांजलिनावाग्भवात्तांबु
लंस्मृतं॥ स्वस्वबीजेनसर्व्वंतु नमस्कारेणयोजयेत्॥ गुरोर्मंत्र
स्यलेनप्रजपेत्सुरवंदिते॥वाणीचभुवनेशानिरमाचैवसुरेश्व
रि॥ तारत्रयमिमंप्रोक्तंगुरुमंत्रेप्रतिष्ठितं॥ततःस्वगुरुनामांते
आनंदनाथमालिखेत्॥ रक्तशक्तिपदांतेच अम्बापदमथालि
खेत्॥श्रीपादुकांसमुच्चार्यपूजयामीतिसंजपेत्॥ तेजोरूपांस
मर्प्याथस्तवेनतोषयेद्गुरुं॥श्यामारहस्ये॥मनसागंधपुष्पाद्यैः
संपूज्यवाग्भवंजपेत्॥कुब्जिकातंत्रोक्तस्तुतिंकुर्य्यात्॥ नमस्तु
भ्यंमहामंत्रदायिनेशिवरूपिणे॥ब्रह्मज्ञानप्रकाशायब्रह्मत
त्वप्रकाशिने॥ नमस्तेगुरवेतुभ्यंसाधकाभयदायिने॥ अनाचा
राचारभाववोधायभावहेतवे॥भावाभावविनिर्मुक्तमुक्तये
गुरवेनमः॥ नमस्तेशम्भवेतुभ्यंदिव्यभावप्रकाशिने॥ज्ञानानंद
स्वरूपायविभावायनमोनमः॥ शिवायशक्तिनाथायविद्यानाथा
यसच्चिते॥कामरूपायकामायकामकेलिकलात्मने॥कुलपू
जोपदेशायकुलार्णवस्वरूपिणे॥ आरक्तनिजतच्छक्तिसमभा
वविभूतये॥नमस्तेस्तुमहेशायनमस्तेस्तुनमोनमः॥ इदंस्तोत्रं

पठेन्नित्यंसाधकोगुरुदिङ्मुखः॥प्रातरुत्थायदेवेशितनोविद्या
प्रसीदति॥ ॥इतिकुब्जिकातंत्रोक्तं श्रीगुरोस्तोत्रंसमाप्तम्॥ ॥
इतिस्तुत्वाप्रणमेत्॥ अखंडमंडलाकारंव्याप्तंयेनचराचरं॥त
त्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥ अज्ञानतिमिरान्धस्यज्ञाना
ञ्जनशलाकया॥चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥अथ
प्रसंगात्षट्चक्रव्यवस्थालिख्यते॥ तिस्रःकोट्यस्तदर्द्धं चशरी
रेनाडयोमताः॥तासुमुख्यादशप्रोक्तास्तासुतिस्रोव्यवस्थिताः
॥प्रधानंमेरुदण्डोऽत्रचन्द्रसूर्य्याग्निरूपिणी॥इडावामेस्थिता
नाडीशुक्लातुचंद्ररूपिणी॥शक्तिरूपातुसानाडीसाक्षादमृ
तविग्रहा॥पिंगलाख्याचयादक्षेपुंरूपासूर्यविग्रहा॥दाडिमी
कुसुमप्रख्याविषाख्याचापरामता॥मेरुमध्यस्थितायातुमूला
दाब्रह्मरंध्रगा॥सर्व्वतेजोमयीसातुसुषुम्ना वन्हिरूपिणी॥सु
षुम्नान्तर्गताचित्राचन्द्रकोटिसमप्रभा॥सर्वदेवमयीसातुयो
गिनांहृदयंगता॥तस्यामध्येब्रह्मनाडीमृणालतंतुरूपिणी॥ब्र
ह्मरंध्रन्तुतन्मध्येहरवक्त्रात्सदाशिवं॥वामावर्त्तक्रमेणैववे
ष्टितंविषतंतुवत्॥सुषुम्नाग्रन्थिसंस्थानिषट्पद्मानियथाक्रमा
त्॥अघोराख्येमूलचक्रेअतिरक्तचतुर्द्दले॥वासंतिवर्णसंयु
क्तेरक्तवर्णमनोहरं॥कर्णिकायांस्थितायोनिःकामाख्यापरमे
श्वरि॥तद्योनिःपरमेशानिइच्छाज्ञानक्रियात्मिका॥अपराख्यं
हिकन्दर्पमाधारेतंत्रिकोणके॥स्वयंभुलिङ्गं तन्मध्येसरंध्रंपश्चि
माननं॥ध्यायेच्चपरमेशानिशिवंश्यामलसुन्दरं॥तेनमार्गेण
कुण्डलिनीयातायातंकरोतिहि॥भित्वाभित्वापुरींयातिआयाति
कुण्डलिनीसदा॥तत्रविद्युल्लताकाराकुंडलीपरदेवता॥प्रसुप्त
भुजगाकारासार्द्धत्रिवलयान्विता॥शिवंवेष्ट्यमहेशानिसर्व्वदा
परितिष्ठति॥येनमार्गेणगंतव्यंब्रह्मद्वारंनिरामयं॥मुखेनाछा
द्यतद्वारंप्रसुप्तापरमेश्वरी॥मूलमाधारषट्कानांमूलाधारं
ततोविदुः॥लिंगमूलेमहापद्मंस्वाधिष्ठानंतुषड्दलं॥वादिलां
तार्णसंयुक्तंनाभौचमणिपूरकं॥डादिफांतान्वितदलैर्दशभिर्द

शभिः संयुतं॥ हृदये द्वादशदलैरनाहतसरोरुहं॥ कादिठांतदले
द्दीप्तमहाटकसन्निभं॥ तन्मध्ये वाणलिंगं तु सूर्य्यायुतसमत्वि
षं॥ शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते॥ तेनाहताख्यं त
त्पद्मं योगिभिः परिकीर्त्तितं॥ कण्ठदेशे विशुद्धाख्यं धूम्रवर्णम
नोहरं॥ अकारादिस्वरोपेतैर्दलैः षोडशभिर्युतैः॥ विशुद्धिस्तन्य
ते यस्माज्जीवस्य हंसलोकनात्॥ विशुद्धिमपमाख्यातं आका-
शाख्यं महद्भुतम्॥ आज्ञानाम भ्रुवोर्मध्ये चक्रं च द्विदलं परम्॥ ह
क्षद्व्यक्षरसंयुक्तं निर्म्मलं सुमनोहरं॥ इतिवाख्यं महालिंगं तन्म
ध्ये काञ्चनप्रभं॥ आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्॥
कैलासाख्यं तदूर्द्धं तु बोधनी तत्तदूर्द्धतः॥ तस्मादूर्द्धमधोमुखं
विकसितं पद्मं सहस्रच्छदं॥ सहस्रारं महापद्मं नादबिंदुत्रयान्वि
तं॥ अकथादित्रिरेखात्म हलक्षयत्रिकोणके॥ तन्मध्ये परबिंदु
च सृष्टिस्थितिलयात्मकं॥ वामावर्त्तेन विलिखेदकथादित्रिको
णकं॥ शून्यरूपं शिवः साक्षाद्बिंदुपरमकुण्डली॥ सार्द्धत्रिवलया
कारां कोटिविद्युत्समप्रभां॥ यामले॥ रक्तकुण्डलिनी शक्तिस्त्रिगुण
त्रयसमन्विता॥ शून्यभागे महादेवि शिवभक्त्यात्मकं प्रिये॥ स
र्पाकारं शिवं वेष्ट्य सर्वदा तत्र संस्थिता॥ शिवशक्त्यात्मकं बिन्दुं
भुक्तिमुक्तिफलप्रदं॥ नादरूपेण सा देवि योनिरूपा सनातनी॥ भू
तशुद्धौ॥ शिवविष्णुब्रह्ममयं बिंदुयोनिं सुचिस्मिते॥ सर्वोपरि म
हेशानि बिन्दुब्रह्मस्वरूपिणी॥ भवो बिंदुरिति ख्यातो भवनं च त्रि
कोणकं॥ भवनं भवसम्बन्धाज्जायते भुवनत्रयं॥ इति गंधर्वमालि
कावचनात्॥ पंचभूतानि देवेशि षष्ठे मानसमीश्वरि॥ षट्चक्रे
षु स्थितान्येव क्रमाद्देवि विचिन्तयेत्॥ सहस्रारं शिवपुरं सुखदुः
खविवर्ज्जितं॥ सर्वतोलंकृतैर्दिव्यैर्नित्यपुष्पफलैर्द्रुमैः॥ सदाशि
वपुरं रम्यं कल्पवृक्षसुशोभितं॥ पंचभूतात्मकं ब्रह्मगुणत्रयसम
न्वितं॥ चतुःशाखा चतुर्वेदं नित्यपुष्पफलान्वितं॥ पीतं कृष्णं तथा
श्वेतं रक्तपुष्पं च पार्वति॥ हरितं च विचित्रं च नानापुष्पं मनोहरं॥ ए
वं कल्पद्रुमं ध्यात्वा तदधो रत्नवेदिकां॥ तत्रोपरि च पर्य्यङ्कं नाना

वस्त्रोपशोभितं॥ मंदारपुष्परचितंनानागन्धानुमोदितम्॥ तस्योपरि
महादेवः सदातिष्ठतिसुन्दरि॥ ध्यायेत्सदाशिवंदेवंशुद्धस्फटिकस
न्निभं॥ बहुरत्नसमाकीर्णंदीर्घबाहुंमनोहरं॥ सुखप्रसन्ननयनंस्मे
रास्यंसततंप्रिये॥ श्रवणेकुण्डलोपेतंरत्नहारेणशोभितं॥ गोलप
द्मसहस्रेणमालयाशोभितंवपुः॥ अष्टबाहुंत्रिनयनंशिवंपद्माद
लेक्षणं॥ पादयोर्नूपुरंरम्यंशब्दब्रह्ममयंवपुः॥ एवंस्थूलवपुस्त
स्यभावयेत्कमलेक्षणे॥ पद्ममध्येस्थितंदेवंनिरीहंशब्दरूपवत्
॥ शब्दरूपोमहादेवोद्रष्टव्यंनास्तिकदाचन॥ एवंसर्वेषुचक्रेषु शक्तिं
रुद्रंविचिंतयेत्॥ ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः॥ तत्त्व
परशिवश्चैवषट्शिवाः परिकीर्त्तिताः॥ शक्तिमाह॥ विशुद्धेडाकि
नीदेवी अनाहतेतुराकिनी॥ लाकिनीमणिपूरस्थाकाकिनीलिंग
गोचरे॥ आधारेशाकिनीदेवीआज्ञायांहाकिनीतथा॥ याकिनीब्रह्म
रंध्रस्थासर्व्वकामफलप्रदा॥ ध्यायेत्कुण्डलिनींदेवींस्वयम्भुलिं
गसंस्थितां॥ श्यामांसूक्ष्मांसृष्टिरूपांसृष्टिस्थितिलयात्मिकां॥ वि
श्वातीतांज्ञानरूपांचिंतयेदूर्द्ध्ववाहिनीं॥ रक्तामितिसुंदरीविषयेज्ञे
यम्॥ हूंकारवर्णसम्भूताकुण्डलीपरदेवता॥ बिभर्त्तिकुण्डलीदेह
मात्मानंहंसमंत्रतः॥ प्रबुद्धवन्हिसंयोगेमनसामारुतैःसह॥ ऊर्द्ध्व
नयेत्कुण्डलिनीजीवात्मसहितोपरि॥ गच्छंतीब्रह्मरंध्रेणभित्वा
ग्रंथिचतुर्द्दश॥ षट्चक्रसंधिमार्गेणसुषुम्नावर्त्तनातया॥ हंसेनम
नुनादेविसहस्रारंसमानयेत्॥ सदाशिवोमहादेवोयत्रास्तेपर
मेश्वरि॥ तत्रगत्वामहादेविकुंडलीपरदेवता॥ देवीरूपवतीका
मसमुल्लासविहारिणी॥ सुखारविन्दगंधेनमोदितंपरमंशिवं॥ प्र
२ बोध्यपद्मशानितत्रैवोपविशेत्प्रिये॥ शिवस्यमुखपद्मंहिचुचुम्बे
कुण्डलीशिवे॥ सदाशिवेनदेवेशिक्षणमात्रंरमेत्प्रिये॥ अमृतंजा
यतेदेवितत्क्षणात्परमेश्वरि॥ तदुद्भवामृतंदेविलाक्षारससमो
पमं॥ तेनामृतेनदेवेशितर्पयेत्परदेवतां॥ षट्चक्रदेवतास्तत्रसंत
र्प्यामृतधारया॥ आनयेत्तेनमार्गेणमूलाधारंपुनःसुधीः॥ याताया
तंक्रमेणैवतत्रकुर्य्यान्मनोलयं॥ एवमभ्यस्यमानस्तुअहन्यहनि

पार्व्वति॥ जरामरणदुःखाद्यैर्मुच्यते भवबंधनात्॥ इत्युक्तंपर
मंयोगंयोनिमुद्राप्रबन्धनं॥ यामले॥ कुलयोषित्कुलंत्यक्त्वापुन
रेवकुलंविशेत्॥ रमतेसैवमव्यक्त्वापुनरेकाकिनीसती॥ सङ्केत
पद्मस्थां॥ पिण्डंकुण्डलिनीशक्तिः पदंहंसः प्रकीर्त्तितः॥ रूपंविंदु
समाख्यातंरूपातीतस्त्वनिष्कलं॥ एतेनहंसमित्यक्षरद्वयंदेव्याः
पादपद्मयुगंकृत्वा षट्चक्रभेदक्रमेणसहस्रदलपद्ममध्येनी
त्वा चंद्रमंडलामृतेनाप्लाव्यतदमृतेनषट्चक्रस्थशिवशक्त्या
दीनाप्लाव्यसोहमितिमंत्रेणस्वस्थानंनयेदितिवाक्यार्थः। सोह
मितिमंत्रेणस्वस्थानंनयेदिति यामलवचनात्॥ समयातंत्रे॥ दे
व्युवाच॥ देवदेवमहादेवसृष्टिस्थितिसंतकारक॥ मूर्द्धिपद्मंसह
स्रारंरक्तवर्णमधोमुखं॥ तस्यमध्येस्थितंध्यायेत् गुरुंशांतंस
शक्तिकं॥ मूलाधारेमहाशक्तिंकुण्डलीरूपधारिणीं॥ अधोवक्त्रक्र
मेणैव सर्व्वपद्मेषुभावना॥ तदाकथंभवेत्तत्र चिंतनंगुरुदेवयोः॥ आ
धारत्वेस्थितिस्तत्रत्वधोभागेकथम्भवेत्॥ महादेवउवाच॥ यथै
वोक्तंत्वयादेविकथितंवीरवन्दिते॥ एवमेवतुसंदेहोजायतेनात्र
संशयः॥ कथ्यतेपरमेशानिसंदेहोच्छेदकारणं॥ तानिपद्मानिदेवेशि
सुषुम्नान्तःस्थितानिच॥ परब्रह्मस्वरूपाणिशब्दब्रह्ममयानिच
॥ तत्सर्वंपंकजंदेविसर्वेतोमुखमेवच॥ प्रवृत्तिश्चनिवृत्तिश्चद्वौ
भावौजीवसंस्थितौ॥ प्रवृत्तिमार्गः संसारीनिवृत्तिः परमात्मनि। प्रव
त्तिभावचिन्तायां अधोवक्त्राणिचिन्तयेत्॥ निवृत्तियोगमार्गेषु
सदैवोर्द्धमुखानिच॥ एवमेवभावभेदात्कसंदेहोभिजायते॥ इ
त्येतत्कथितंदेविममज्ञानविलोकितं॥ अथयोगंप्रवक्ष्यामियेन
देवमयोभवेत्॥ मूलपद्मेकुण्डलिनीयावन्निद्रायितात्प्रभोः॥ ता
वत्किञ्चिन्नसिध्येतमंत्रयंत्रार्चनादिकं॥ जागर्त्तियदिसादेवी
बहुभिःपुण्यसञ्चयैः॥ तदाप्रसादमायातिमंत्रयंत्रार्च्चनादयः॥
योगेयोगान्तरेमुक्तिर्मंत्रसिद्धिरखण्डिता॥ सिद्धेमनोपरावाप्ति
रितिशास्त्रस्यनिर्णयः॥ जीवन्मुक्तश्चदेहांतेपरंनिर्वाणमाप्नुया
त्॥ संसारोत्तारणंमुक्तिर्योगशब्देनकथ्यते॥ प्राणायामैर्ज्जपै

र्योगैस्त्यक्तनिद्राजगन्मयि॥ चतुर्दलंस्यादाधारं स्वादिष्ठानंतुषट्
दलं॥ नाभौदशदलंपद्मंसूर्य्यसंख्यादलंहृदि॥ कण्ठेस्यात्षोडश
दलंभ्रूमध्येद्विदलंतथा॥ सहस्रदलमाख्यातंब्रह्मरंध्रंमहापथे॥
॥ मातृकाक्षरसंभूतंसहस्रारेसरोरुहं॥ अधोवक्त्रंशुक्लवर्णरक्त
किंजल्कभूषितं॥ इतिरक्तवर्णसुंदरिविषयेबोध्यम्॥ समया
तंत्रोक्तत्वात्॥ अन्यथाविरोधापत्तेश्च॥ ब्रह्माविष्णुश्चरुद्रश्च
ईश्वरश्चसदाशिवः॥ ततःपरशिवश्चैवषट्शिवाःपरिकीर्त्तिताः॥
डाकिनीराकिनीचैवशाकिनीलाकिनीतथा॥ काकिनीहाकिनीचै
वशक्तिरेषाप्रकीर्त्तिता॥ आधारेहृत्प्रदेशेचभ्रुवोर्मध्येविशेषतः
॥ स्वयंभुसंज्ञोवाणाख्यस्तथैवेतरसंज्ञकः॥ लिङ्गत्रयंमहेशानि
प्रधानत्वेनचिन्तयेत्॥ मूलाधारेस्थिताभूमिः स्वाधिष्ठानेजलंप्रिये
॥ मणिपूरेस्थितंतेजोहृदयेवायवस्तथा॥ विशुद्धेतुमहेशानि
आकाशंकमलेक्षणे॥ आज्ञाचक्रेमहेशानिमनःसर्व्वार्थसाधनं॥
तदूर्द्ध्वेपरमेशानिपद्ममूर्द्धमुखंसदा॥ तत्रोपरिमहेशानिध्यायेत्स
दाशिवंविभुं॥ ऊर्द्धमुखमिति अधोमुखसहस्रदलपद्मांतर्गतं
ऊर्द्धमुखद्वादशदलपद्मोपरिशिवंध्यायेदित्यर्थः॥ तथाचोक्तं
यामले॥ ब्रह्मरंध्रसरसीरुहोदरेनित्यलग्नमवदातमद्भुतं॥ कुण्ड
लीविवरकाण्डमण्डितंद्वादशार्ण सरसीरुहंभजे॥ अहंद्वाद
शदलंसरसीरुहंपद्मंभजे सरसीरुहंकिंभूतं कुण्डलीविवरका
ण्डमण्डितं मूलाधारविभूषितं॥ पुनःकिम्भूतंब्रह्मरंध्रसरसी
रुहोदरेसहस्रदलपद्ममध्येनित्यंअविनाभावसंबन्धेनलग्नम्
पुनःकिंभूतमाश्चर्य्यमनोहरं पूर्व्वोक्तक्रमेणशिवंध्यायेत्॥ षट्
चक्रेपरमेशानिसदाशिवपुरंसमं॥ शक्तिपुरंमहेशानिसदाशिवपु
रोपरि॥ सएवनिर्व्वाणाख्यकालोपरिस्तानिर्व्वाणशक्तिपरं॥ शि
वस्थानंशैवाःपरमपुरुषंवैष्णवगणो लपंतीति प्रायोहरिहरप
दंकेचिदपरे॥ पदंदेव्यादेवीचरणयुगलानन्दरसिकामुनीन्द्राः
अप्यन्येप्रकृतिपुरुषस्थानममलं॥ तेनहंसइत्यक्षरद्वयरूपंपा
दपद्मयुगलंध्यायेदित्यर्थः॥ रमित्वाशम्भुनासार्द्धंकुंडलीपरदे

वतां॥ मूलाधारान्महेशानि सहस्रारे समानयेत्॥ शंभुना तो परां
शक्तिं एकीभावं विचिंतयेत्॥ ध्यायेत्कुण्डलिनीं तत्र इष्टदेवस्व
रूपिणीं॥ सदा षोडशवर्षीयां पीनोन्नतपयोधरां॥ नवयौवनस
म्पन्नां सर्व्वाभरणभूषितां॥ पूर्णचन्द्रनिभावक्त्रां सदा चंचललो
चनां॥ नानारत्नयुतां रम्यां पादे नूपुरशोभितां॥ किङ्किणी च तथा
कट्यां रत्नकङ्कणमण्डितां॥ कन्दर्पकोटिलावण्यां सदा च मंद
हासिनीं॥ एवं ध्यात्वा जपेन्मन्त्रं शतमष्टोत्तरं शिवे॥ मातृकाव
र्णमालया जप्त्वा तामाज्ञाचक्रमानयेत्॥ तत्रैव शिवलिङ्गेन योज
येत् कुण्डलिनीं परां॥ ध्यात्वा ब्रह्ममयीं तत्र शतमष्टोत्तरं जपेत्॥
ततो विशुद्धौ तां नीत्वा शिवेन सह योजयेत्॥ तामिष्टदेवतां ध्या
त्वा जपेदष्टशतं प्रिये॥ हृत्पद्मे नाततो नीत्वा बाणेन सह योजये
त्॥ देवीरूपं च तां ध्यात्वा जपेदष्टोत्तरं शतं॥ मणिपूरे तु तां नीत्वा
शिवेन सह योजयेत्॥ देवीरूपञ्च तां ध्यात्वा शतमष्टोत्तरं जपेत्
॥ स्वाधिष्ठाने ततो नीत्वा शिवेन सह योजयेत्॥ योजयित्वा जपे
न्मंत्रं देवीं ध्यात्वा प्रियंवदे॥ शतमष्टोत्तरं जप्त्वा मूलाधारे तु तां न
येत्॥ तत्र लिङ्गं स्वयम्भुञ्च ध्यायेत्कुन्दसमप्रभं॥ शुक्लवर्णं चतु
र्बाहुं पञ्चवक्त्रं त्रिलोचनं॥ प्रसन्नवदनं शान्तं नीलकण्ठविरा
जितं॥ कपर्द्दिनं स्फुरत्सर्व्वभूषं कुन्दसमप्रभं॥ षट्चक्रे परमेशा
नि ध्यात्वा जगन्मयीं शिवां॥ भुजङ्गरूपिणीं देवीं नित्यां कुंडलिनीं
परां॥ बिसतंतुमयीं देवीं साक्षादमृतरूपिणीं॥ अव्यक्तरूपिणीं
रम्यां ध्यानगम्यां वरानने॥ ध्यात्वा जप्त्वा च देवेशि साक्षाद्ब्रह्मम
यो भवेत्॥ एवं हूं दशधा देवि यातायातं करोति यः॥ स मुक्तः सर्व
पापेभ्यो मंत्रसिद्धिर्न चान्यथा॥ यत्र तत्र मृतश्चायं गंगायां श्व१ चा
लये॥ ब्रह्मवित् ब्रह्मभूयाय कल्पते नान्यथा प्रिये॥ अथ मार्थना॥
अहं देवी न चान्योस्मि ब्रह्मैवाहं न शोकभाक्॥ सच्चिदानंदरूपोहं ·
नित्यमुक्तस्वभाववान्॥ परदेव्या हृदिस्थेन प्रेरितेन करोम्यहं॥
नासौ किञ्चित्तत्क्वचिद्धापि कृत्यमस्ति जगत्त्रये॥ जानामि धर्मं न च
मे प्रवृत्तिः जानाम्यधर्म्मं न च मे निवृत्तिः॥ केनापि देवेन हृदिस्थि

तेनयथानियुक्तोस्मितथाकरोमि॥ त्रैलोक्यचैतन्यमयीश्वरेशि
श्रीपार्व्वतित्वच्चरणांमयैव॥प्रातःसमुत्थायतवप्रियार्थंसंसारयात्रा
मनुवर्त्तयिष्ये॥एवंसंचिन्त्यमनसागृहान्निर्गत्यसंयतः॥आच
म्यप्रयतोमंत्रीदंतधावनमाचरेत्॥तंत्रगन्धर्वे॥दंतकाष्ठमखा
दित्वापूजयेद्यस्तुदेवतां॥तत्पूजाविफलादेविमृतेचनरकंव्रजेत्
मंत्रतंत्रप्रकाशे॥विधायावश्यकंशौचमाचामंदंतधावनं॥मुखप्र
क्षालनादीनिकृत्वास्नानंसमाचरेत्॥दक्षिणामूर्त्तौक्लींकामदेव
सर्वजनप्रियायनमः॥ क्लीमात्मकंकामदेवंसर्वजनमालिखेत्
॥प्रियायहृदयांतोयंमनुर्दंतविशुद्धये॥चतुर्दशाक्षरैर्वक्त्रंक्षालये
त्सिद्धिहेतवे॥यामले॥स्नानमूलाःक्रियाःसर्वाःश्रुतिस्मृत्युदिता
नृणां॥तस्मात्स्नानंनिषेवेतश्रीपुष्ट्यारोग्यवर्द्धनं॥मंत्रतंत्रप्रका
शे॥अरुणेनुदित्तेमंत्रीतीर्थेवाविमलेजले॥वैदिकस्नानमाचार्य
तांत्रिकंस्नानमाचरेत्॥परिखातेयत्कर्त्तव्यंतदाह विश्वसारे॥परि
खातेतिकर्त्तव्यंपञ्चपिण्डोद्धरंसुधीः॥मंत्रमाह॥उत्तिष्ठेत्तिष्ठपंच
त्वंत्यजपुण्यंपरस्यच॥पापानिविलयंयांतुशांतिंदेहिसदामम॥
नीलतंत्रे॥पुनर्निमज्ज्यपयसिसंकल्पवत्समाचरेत्॥इष्टदेवस्यपू
जार्थंस्नानंकार्यंजलाशये॥तंत्रमंत्रप्रकाशे॥अस्त्रेणानीयमृ
त्स्नांवैत्रिभागंतत्रकारयेत्॥भागमेकंजलेचैवक्षिपेन्मंत्रंसमुच्च
रन्॥एकंमूर्द्धादिनाभ्यंतंपठन्मूलंविलेपयेत्॥शेषंतुपादना
भ्यंतंतथैवपरिलेपयेत्॥अंगेषडंगंविन्यस्यप्राणायामपुरः
सरं॥हृन्मंत्रांकुशमंत्राभ्यांतीर्थमावाह्यमंडलात्॥मंडलात्
सूर्यमंडलात्॥ब्रह्मांडदेवतीर्थानिकरैःस्पृष्टानितेरवे॥तेनसत्येन
मेदेवतीर्थंदेहिदिवाकर॥ ॐगंगेचयमुनेचैवगोदावरिस
रस्वति॥नर्मदेसिंधुकावेरिजलेऽस्मिन्सन्निधिंकुरु॥ॐआ
वाहयामित्वांदेविस्नानार्थमिहसुंदरि॥एहिगंगेनमस्तुभ्यंसर्व
तीर्थसमन्विते॥एवमावाह्यविधिवन्मूलमंत्रेणमंत्रयेत्॥आम
ग्र्यंभसिसंयोज्यसोमसूर्याग्निमंडलं॥विचिंत्यमंत्रीतन्मध्येनि
मज्जन्मूलमुच्चरन्॥उत्थायाचम्यतत्पश्चात्षडंगंन्याससं

युतः॥ यामले॥ आत्मविद्याशिवैस्तत्त्वैराचामेत्साधकाग्रणीः॥
वन्हिजायांपरेदत्वाशुद्धेनपाथसाप्रिये॥ पाथसाजलेन। अभि
मंत्र्यततस्तोयंमूलमंत्रेणसाधकः॥ क्षालयेत्तेनवपुषःकलुषंकु
म्भमुद्रया॥ आत्मानंदशधासिंचेत् मुद्रयाकलशाख्यया॥ स
प्तकृत्वाभिसिंचेद्वामनुनामंत्रितैर्जलैः॥ ज्ञानार्णवे॥ वामहस्ते
कृतामुष्टिर्दक्षहस्तेनपार्व्वति॥ कलशाख्याभवेन्मुद्रासर्वपापह
राशुभा॥ गौतमीये॥ पीडयित्वाम्बरंचोरुप्रक्षाल्याचम्यवाग्यतः
॥धारयेद्वाससीशुद्धेपरिधानोत्तरीयके॥ अछिन्नेसदशेशुद्धे आ
चामेत्पीठसंस्थितः॥ मोक्षार्थीरक्तवस्त्रेद्वेभोगार्थीशुक्लवाससी
॥तिलकंरक्तगंधेनचन्दनेनचवाप्रिये॥ देव्यस्त्रंविलिखेद्भाले
ताराबीजंततोहृदि। शक्तिमध्यगतंकुर्यात्साधकोनरपुंगवः
॥देव्यस्त्रंस्वस्वोपासीतदेव्यस्त्रंलिखेदित्यर्थः॥ त्रिपुंड्रेणवि
नाकुर्य्योयत्किञ्चित्वैदिकींक्रियां॥ सानिष्फलाभवेद्भूपब्रह्म
णोपिकृतायदि॥ इतिभविष्यपुराणवचनात्॥ धर्म्मपुराणे॥ वै
ष्णवोवाथशैवोवाशाक्तोवासौरएववा॥ त्रिपुंड्रेणविनापूजां
कुर्व्वाणोयात्यधोगतिं॥ शिवधर्म्मे॥ सितेनभस्मनाकुर्य्यात् ल
लाटेयस्त्रिपुंड्रकं॥ सर्वपापविनिर्मुक्तः शिवलोकेमहीयते॥ भ
स्मोपलक्षणं॥ भावरहस्ये॥ सर्व्वैस्त्रिपुण्ड्रंवैकुर्य्यात्यत्नभस्मे
नसर्वदा॥ तदभावेचचन्दनेनमृदावावारिणापिवा॥ यत्कि
ञ्चित्कुरुतेकर्म्मविनाविप्रस्त्रिपुंड्रकं॥ व्यर्थमेवभवेत्कर्मवं
ध्यास्त्रीमैथुनंयथा॥ सछिद्रंकुरुतेयत्नोयस्तुपुण्ड्रंपतिर्द्विजः।
धर्म्मार्थकाममोक्षेषुतस्यछिद्रंप्रजायते॥ वैदिकींतांत्रिकींसंध्यां
ततःकुर्य्यात्समाहितः॥ अशून्यौचकरौकुर्य्यात् सुवर्णरजतैःकु
शैः॥ सुवर्णरजतञ्चैवजपपूजादिकर्मसु॥ एषएवकुशःप्रोक्तोन
दर्भोवनसंभवः॥ तर्जन्योरजतंधार्य्यंस्वर्णंधार्य्यमनामयोः॥ अथ
संध्यांप्रवक्ष्यामितान्त्रिकींसर्वसिद्धिदां॥ उपविश्याचमेन्मंत्रैःप
योभिर्हीनबुद्बुदैः॥ ततश्च आत्मतत्वायविद्यातत्वायततत्परं। शि
वतत्वायवैप्रोक्ताःक्रमेणवन्हिवल्लभा॥ मूलांतमेभिराचामेत्॥

पूर्व्वोत्तरमुखःसुधीः॥आचमनंततःकृत्वाप्राणायामंसमाचरेत्
॥षडंगन्यासमाचार्य्यजलेमूलंजपेत्ततः॥कुशेनतज्जलंभूमौत्रि
धामूर्द्धिविनिर्द्दिशेत्॥मूलमुच्चार्य्यदेवेशिवामहस्तेजलंततः॥
गृहीत्वातज्जलंदेवितत्रमूलंसमुच्चरन्॥शिववायुजलपृथ्वीव
न्हिबीजैस्त्रिधापुनः॥अभिमंत्र्यचमूलेनसप्तधातत्वमुद्रया॥ग
लितोदकंक्षिपेन्मूर्द्धिशेषंदक्षेनिधायच॥ईडयाकृष्टदेहांतःक्षालि
तैःपापसंचयैः॥कृष्ण वर्णंतदुदकंदक्षनाड्याविरेचितं॥दक्षह
स्तेतुतन्मंत्रीपापरूपंविचिन्त्यच॥पुरतोवज्रपाषाणेप्रक्षिपेदस्त्र
मंत्रतः॥जलेयंत्रंसमालिख्यतर्पयेत्परदेवतां॥पूजयित्वातत्र
देवींपरिवारसमन्वितां॥गुरुपंक्तिंप्रतर्प्याथतर्पयेदिष्टदेवतां॥उत्त
राभिमुखोभूत्वादेवीमात्रंप्रतर्पयेत्॥तृप्यतांजगतांमाताभैरव
स्तृप्यतांतथा॥मूलांतेनामचोच्चार्यतर्पयामिततःपरं॥स्वाहा
न्तेनतर्पणंत्वेवंपंचविंशतिसंख्यया॥तर्पणञ्चप्रकुर्वीतद्दिती
यान्तमथोच्चरन्॥पंचविंशतिसंख्यावादशधावात्रिधापिवा॥
एकैकाञ्जलितोयेनपरिवारांस्तुतर्पयेत्॥दिनेशायक्षिपेत्तिष्ठ
न्वारिणाचाञ्जलित्रयं॥सूर्य्यमन्त्रंसमुच्चार्य ॐह्रींहंसइत्य
पि॥मार्तण्डभैरवायेतिप्रकाशशक्तिसंयुतं ङेन्तमुच्चार्य्यग्रहराशि
युतायचहूयं॥त्रिधाञ्जलिंक्षिपेन्मंत्रीकर्म्मणांसाङ्गसिद्धये॥तो
यांजलिंपुनःक्षिप्त्वासूर्यमण्डलमध्यगां॥आदित्यमण्डलेदेवींध्या
येत्सूर्य्यस्वरूपिणीं॥तत्तत्कल्पविमुच्चार्य्यविसृजेदनयार्घ्यकं॥
गायत्रींभावयेद्देवींसूर्य्यासनकृताश्रयां॥प्रातर्मध्यान्हसायान्हे
ध्यानंकृत्वाजपेत्सुधीः॥बीजत्रयस्वरूपंकुण्डलिनींध्यात्वाजपेदि
त्यर्थः॥कुण्डलिनींत्रिधादेवींतथाबीजत्रयंत्रिधा॥तुरीयंकुण्डलि
नींमूर्द्धिनित्यानन्दस्वरूपिणीं॥वाग्भवंमूलदेशेचभवंस्वर्णनि
भंस्मरेत्॥वन्हिकुण्डलिनींनित्यांबालार्कसदृशारुणां॥हृदयेका
मबीजञ्चसूर्य्यकोटिसमप्रभं॥सूर्य्यकुण्डलिनींतत्रनित्यानन्दस्व
रूपिणीं॥भ्रूमध्येशक्तिबीजंतुकोटिचन्द्रसमप्रभं॥चन्द्रकुण्डलि
नींतत्रस्रवदमृतविग्रहां॥बीजत्रयमयींबिन्दौतुरीयांबिन्दुरूपया

त्मिकां॥ सूर्य्यकुण्डलिनींदेविकेवलांज्ञानविग्रहां॥ प्रातःकालेमू
लाधारे॥बालार्कमण्डलाभासांभानुवन्हीन्दुलोचनां॥पाशाङ्कु
शौशरांश्चापंधावंतींचशिवांस्मरेत्॥मध्यान्हेचिन्तयेद्देवींन
वयौवनशोभितां॥सायान्हे भ्रूमध्ये॥सायान्हेचिन्तयेद्देवींत्रैलो
क्यैकप्रभामयीं॥नवयौवनसंपन्नांउज्ज्वलांपरमांकलां॥सहस्रारे
॥तामेवञ्चिन्तयेद्रात्रौभोगेभोगपरायणां॥गायत्रींप्रजपेद्विद्वान
ष्टाविंशतिसंख्यया॥मनसाप्रजपेन्मन्त्रंगायत्रीञ्चविशेषतः॥गांध
र्व्वे॥गायन्तंत्रायतेयस्माद्गायत्रीतेनचोच्यते॥महापातकयुक्तो
पिप्रजपेद्दशधायदि॥सत्यंसत्यंमहादेवमुक्तोभवतितत्क्षणात्
॥अष्टोत्तरशतावृत्यागायत्रींजपतेयदि॥सर्वपापविनिर्मुक्तोभवे
त्पूजाधिकारवान्॥अष्टोत्तरशतावृत्यामूलमन्त्रञ्चसंजपेत्
॥आर्द्रवस्त्रेपत्कर्त्तव्यंतदाहयामले॥नाभिमात्रजलेस्थित्वादेवी
मर्कगतांस्मरन्॥जपेदष्टोत्तरशतंलभेतमहतींश्रियं॥संहारमुद्रया
चैवतीर्थंसुहास्यवाग्यतः॥शक्तिसंध्यामयाप्रोक्ताकर्त्तव्यासाध
कोत्तमैः॥ननोमोनीविशुद्धात्माहृदिविद्यांपरामृषन्॥अवहिर्म्मा
नसोभूत्वायागभूमिमथाविशेत्॥संध्यायांपतितायांवागायत्रींद
शधाजपेत्॥संध्याचत्रिकालंकुर्य्यात्यथाशैवागमेतथा॥प्रातर्म
ध्यान्हसायान्हेसंध्यांकुर्य्याच्चमन्त्रवित्॥संध्यायास्त्वकरणेदोष
माह॥लक्ष्मीकुलार्णवे॥संध्यायास्तुविहीनोयोनदीक्षाफलमा
प्नुयात्॥नान्त्रिकसन्ध्यायांशूद्रस्याधिकारः॥विष्णुडेम्बरे॥संध्या
त्रयंसदाकुर्य्याद्ब्राह्मणोविधिपूर्वकं॥तन्त्रोक्तविधिपूर्वंतुशूद्रःसं
ध्यांसमाचरेत्॥ ॥इतिशाक्तानन्दतरङ्गिण्यांप्रातःकृत्यादिनिर्ण
यश्चतुर्थोल्लासः॥ ॥अथासनीयमाह॥गौरीयामले॥सलिलेय
दिकुर्वीतदेवतानांप्रपूजनं॥तथाप्यासनआसीनोलोकार्थिनस्तु
तथाचरेत्॥आसनंकल्पयित्वातुमनसापूजयेज्जले। आसनस्थो
भवेत्सम्यक्मंत्रार्थगतमानसः॥सम्मोहनतंत्रे॥रक्तासनोपविष्ट
स्तुलाक्षारुणगृहेस्थितः॥मनःकल्पितरक्तोवासाधकःस्थिरमा
नसः॥कुशकम्बलवस्त्राणांसिंहव्याघ्रगजाजिने॥कल्पयेदास

नंधीमान्सौभाग्यज्ञानवर्द्धनं॥कौशेयंवाथचर्म्मीवाचैलंतै ल
मथापिवा॥शवपात्रंताल्पात्रंकम्बलंदार्वमासनं॥कृष्णाजिने
ज्ञानसिद्धिर्मुक्तिःस्याद्व्याघ्रचर्म्मणि॥कृष्णाजिनेगृहस्थानांना॰
धिकारः॥नदीक्षितोविशेज्ज्ञातुकृष्णसाराजिनेगृही॥विशेदति
बलिष्ठश्चब्रह्मचारीचभिक्षुकः॥वस्त्रासनेव्याधिनाशः कम्बले
दुःखनाशनं॥जपध्यानतपोहानिंवस्त्रासनं करोतिहि॥तत्रवस्त्र
निषेधंकेवलवस्त्रपरं॥अन्यथाविरोधापत्तेः।कुशासनेभवेदायुर्मो
क्षःस्याद्व्याघ्रचर्मणि॥अजिनेचभवेत्पुत्रीकम्बलेसिद्धिरुत्तमा
॥शान्तिकेधवलःप्रोक्तःसर्व्वार्थेचित्रकम्बले॥स्यात्पौष्टिकेतुकौ
शेयकंबलैर्दुःखमोचनं॥त्रिपुरापूजनेशस्तंरक्तकम्बलमासनं॥
नैतद्विहस्ततोदीर्घसार्द्धहस्तानुविस्तृतं॥नत्र्यङ्गुलात्समुच्छ्रायं
पूजाकर्म्मणिसंग्रहेत्॥आसनञ्च ततःकुर्यान्नातिनीचंनचो
च्छ्रितं॥तंत्रगन्धर्व्वे॥धरण्यांदुःखसंभूतिर्दौर्भाग्यंदारुजासने
आम्रनिम्बकदम्बानांआसनंसर्वनाशनं॥बकुलेकिंशुकेचैवप
नसेषुहतश्रियः॥वंशेष्टकाधरणीदारुतृणपल्लवनिर्मितं॥वर्ज
येदासनंमंत्रीदारिद्र्यव्याधिदुःखदं॥गांभीरीनिर्मितंशस्तंनान्य
दारुमयंशुभं॥चतुर्विंशत्यङ्गुलञ्चदीर्घेकाष्ठासनंशिवे॥षोडशां
गुलविस्तीर्णमुच्चञ्चचतुरङ्गुलं॥कम्बलंचमैर्म्मणंशैलंमहामा
या प्रपूजने॥प्रशस्तमासनंप्रोक्तंकामाख्यायास्तथैवच॥त्रिपु
रायाश्चरुद्रस्यविष्णोश्चापिकुशासनं॥तृणासनेयशोहानिःपां
सवेचित्तविभ्रमः॥यथोक्तमासनंकुर्यात्सर्वसिद्धिप्रदायकं॥नय
थेष्टासनोभूयात्पूजाकर्मणिसाधकः॥वंशाश्वधरणीदारुतृण
पल्लवनिर्मितं॥वर्जयेदासनंधीमान्दारिद्र्यव्याधिदुःखदं॥तन्त्रे।
काष्ठासनेभवेद्रोगीवंशेवंशक्षयोभवेत्॥शैलासनेचवाग्रोधःपल्लवे
मतिविभ्रमः॥अन्यत्रापि॥धरण्यांशोकसंयुक्तंकाष्ठेव्यर्थश्रमोभ
वेत्॥पद्मासनंस्वस्तिकाख्यंभद्रंभद्रासनंतथा॥वीरासनमिति
प्रोक्तंक्रमादासनपंचकं॥सव्येपादमुपादायदक्षोपरिन्यसेत्ततः
॥तथैवदक्षिणंसव्यस्योपरिष्टाद्विधानवित्॥पद्मासनमितिप्रो

र्क्षजपकर्म्मसुशस्यते॥ जानुनोरन्तरेसम्यक्कृत्वापादतलेउभे॥ ऋजुकायोविशेन्मन्त्रीस्वस्तिकंतत्प्रचक्षते॥ सीमन्याःपार्श्वयोर्न्यस्येत्गुल्फयुग्मंसुनिश्चलं॥ वृषणाधःपार्श्वपादौपाणिभ्यांपरिबन्धयेत्॥ भद्रासनंसमुद्दिष्टंयोगिभिःसारकल्पितं॥ उर्व्वोःपादौक्रमान्न्यस्येत्कृत्वाप्रत्यङ्मुखाङ्गुली॥ करौनिदध्यादाख्यातंवज्रासनमनुत्तमं॥ एकपादमधःकृत्वाविन्यस्योरूतथोत्तरं॥ ऋजुकायोविशेन्मंत्रीवीरासनमितीरितं॥ उर्द्धूपादौस्थितोदेविशिरोधःपरिकीर्त्तितं॥ सर्व्वासनानांश्रेष्ठोयंदेवैरपिसुदुष्करं॥ नयुक्तमन्यथापाददर्शनंसुरपूजने॥ रुद्रयामले॥ नित्यंनैमित्तिकंकाम्यंत्रिविधंपूजनंस्मृतं॥ नीलतंत्रे॥ नित्यावसरतोमंत्रीकुर्य्यान्नैमित्तिकार्च्चनं॥ नैमित्तिकार्च्चनेसिद्धःकुर्य्यात्काम्यमथार्च्चनं॥ उभयोःकाम्यकर्माणिचेतिशास्त्रस्यनिर्णयः॥ रुद्रयामले॥ रात्रौपूजासदाकुर्य्यात्रात्रौसिद्धिर्नसंशयः॥ सफलारजनीपूजादिवापूजाचनिष्फला॥ शक्तिमंत्रंजपेद्रात्रौविनापिपूजनंशुचिः॥ विशेषतोनिशीथेतुतत्रातिफलदोजपः॥ वृहन्नीलतंत्रे॥ निशायांयोर्च्चयेत्कालींताराञ्चभैरवीन्तथा॥ आसमुद्रक्षितीशानांश्रेष्ठोभवतिसर्व्वदा॥ अन्यत्रापि॥ मातङ्गींचतथाबालांचामुण्डाछिन्नमस्तकां॥ भद्रकालीञ्चदुर्गाञ्चजयदुर्गान्तथैवच॥ आसांजपश्चपूजाचरात्रौचेत्क्रियतेसदा॥ भुक्त्वाभोगानशेषांश्चसोऽवश्यंयातिरुद्रतां॥ समयातन्त्रे॥ दिवाप्रपूजनंदेवियथोक्तफलदंभवेत्॥ पूजनंलक्षगुणितंनिशिनीरजलोचने॥ अर्द्धरात्रात्परंयच्चमुहूर्त्तद्वयमेवहि॥ सामहारात्रिरुद्दिष्टातत्रकृत्वाक्षयोभवेत्॥ तन्त्रे॥ गतेतुप्रथमेयामेतृतीयप्रहरावधि॥ निशायांतुप्रजप्तव्यंरात्रिशेषेजपन्नहि॥ प्रकटेशक्तिमंत्रेचहानिःस्यादुत्तरोत्तरं॥ पशुसन्निधिमासाद्यनित्यपूजाञ्चवर्जयेत्॥ पशोरग्रेकृतंयत्तुप्रमादान्निष्फलंभवेत्॥ निजसाधकमध्येतुनगोप्तव्यंकदाचन॥ समयातंत्रे॥ स्त्रीसमीपेकृतापूजाजपश्चपरमेश्वरि॥ कामरूपाच्छतगुणंसमुदीरितमव्ययं॥ ॥ इतिशाक्तानन्दतरङ्गिण्यामासननिर्णयःपंचमोल्लासः॥ ॥ आत्मस्थांदेवतांत्यक्त्वावहिर्दे

वंविचिन्वते॥ करस्थकौस्तुभंत्यक्त्वा भ्रम तेकाचतृष्णया॥ प्रत्य
क्षीकृत्यहृदयेवह्निस्थांपूजयेच्छिवां॥ यस्ययस्यचदेवस्य यथा
भूषणवाहनं॥ तदेवपूजनेतस्यचिन्तयेत्परमेश्वरि॥ अथान्तर्यज
नं वक्ष्येयेनदेवमयोभवेत्॥ सुखासनेसमासीनः प्राङ्मुखोवाउद
ङ्मुखः॥ स्वकीयहृदयेध्यायेत्सुधासागरमुत्तमं॥ रत्नद्वीपन्तुतन्म
ध्येसुवर्णवालुकामयं॥ मन्दारपारिजाताद्यैः कल्पवृक्षसुपुष्पितैः॥
सर्व्वतोलङ्कृतैर्दिव्यैर्नित्यपुष्पफलोद्गमैः॥ नानासुगंधिकुसुमैर्ग
न्धामोदितदिङ्मुखं॥ उत्फुल्लकुसुमामोदप्रहृष्टभृङ्गसंकुलं॥ कू
जत्कोकिलसंघैनवाचालितदिगंतरं॥ सर्वतोलंकृतंदिव्यंलसत्का
ञ्चनपङ्कजं॥ मौक्तिकैः कुसुमैः स्रग्भिर्दुकूलैः स्वर्णतोमरैः॥ तन्म
ध्येसंस्मरेद्देविकल्पवृक्षंमनोहरं॥ चतुःशाखाचतुर्वेदंगुणत्रयस
मन्वितं॥ पीतंकृष्णंतथाश्वेतंरक्तंपुष्पंचसुन्दरि॥ हरितञ्चविचि
त्रञ्चनानापुष्पैर्विराजितं॥ कोकिलैर्भ्रमरैर्देविशोभितंबहुपक्षिभिः
॥ एवंकल्पद्रुमंध्यात्वातदधोरत्नवेदिकां॥ तत्रोपरिमहद्धाम्नं चिन्त
येद्रत्नमण्डपं॥ उद्यदादित्यसंकाशरत्नसोपानमण्डितं॥ ध्वजाव
लीसमाकीर्णंचतुर्द्वारसमन्वितं॥ नानारत्नविशोभाढ्यंरत्नप्रा
कारमण्डितं॥ स्वस्वस्थानस्थितावस्थैर्लोकपालैरधिष्ठितं॥ सिद्ध
चारणगंधर्वैर्विद्याधरमहोरगैः॥ किन्नरैरप्सरोभिश्चक्रीडद्भिःपरि
दिङ्मुखं॥ नृत्यवादित्रनिरतैरमरस्त्रीगणैर्वृतं॥ किङ्किणीजाल
संबन्धपताकाभिरलंकृतं॥ महामाणिक्यवैदूर्य्यरत्नचामरभू
षितं॥ स्थूलमुक्ताफलोद्दामलम्बमानैरलंकृतं॥ चन्दनागुरुक
स्तूरीमृगमदादिविलेपितं॥ तन्मध्येसंस्मरेद्देविमहामाणिक्यवे
दिकां॥ उद्यदर्केन्दुकिरणचतुरस्त्रोपशोभितां॥ ध्यायेत्सिंहासनं
तत्रब्रह्माविष्णुशिवात्मकं॥ सिंहासनेमहेशानिप्रसूनतूलिकां
न्यसेत्॥ पीठपूजांततःकृत्वासंकल्पोक्तक्रमेणतु॥ प्रेतपद्मासने
तत्रचिन्तयेत्परमेश्वरीं॥ आत्मन्यभीष्टदेवानांध्यानंध्येयमिहो
च्यते॥ श्रीरत्नपादुकेदत्वानीत्वातांस्नानमंदिरे॥ सिंहासनोपरि
श्यां उद्वर्त्तनंसमाचरेत्॥ कर्पूरागुरुकस्तुरीतथामृगमदेनच॥

रोचनाकुङ्कुमैर्मिश्रैर्नानागन्धसमन्वितैः॥ देव्याउद्वर्त्तनंकृत्वागन्धतै
लंविलेपयेत्॥ देव्याः शतसहस्रैस्तुस्वर्णकुम्भैः सहस्रकैः॥ आनी
यवारिणास्नातंचिन्तयेत्परदेवतां॥ दुकूलैर्म्मार्ज्जितंगात्रंदुकूले
परिधेतथा॥ कङ्कणाकेशसंकुर्य्यात्विधिवद्बन्धनंतथा॥ पट्टगुच्छं
केशपाशेनानारत्नोपशोभितं॥ ललाटेतिलकंदद्यात्सिन्दूरंकेश
मध्यगे॥ नागेन्द्रदन्तरचितंशंखंदद्यान्मनोहरम्॥ हस्तेकेयूरकञ्चै
वकङ्कणंकटकंतथा॥ पादाङ्गुलीपकंदद्यान्नानारत्नोपशोभितं॥ पा
दयोर्नूपुरंदद्यान्नासाग्रेगजमौक्तिकं॥ निवेदयेद्यथाशक्त्यापुष्पमा
लाञ्चभूषणम्॥ सर्व्वाङ्गेलेपनंकुर्य्याद्गन्धचन्दनसिन्धुकैः॥ का
ञ्चनाञ्चितकञ्चुलीशोभितंहृदयोपरि॥ समाधौचिन्तयेद्देवींभूतशु
द्ध्यादिकंदिशेत॥ न्यासजालंविधायाथसमाधौपूजयेत्सदा॥ षो
डशैरुपचारैस्तुहृदिस्थांपूजयेच्छिवां॥ रत्नसिंहासनंदद्यात्स्वा
गतंकुशलंवदेत॥ पाद्यंचपादयोर्दद्याच्छिरस्यर्घ्यंनिवेदयेत्॥ पुरा
मृतमाचमनीयंमुखेचैवप्रदापयेत्॥ मधुपर्कंमुखेदद्यात्त्रिधाचा
चमनंमुखे॥ हेमपात्रगतंदिव्यंपरमान्नंसुविष्कृतं॥ कपिलाघृ
तसंयुक्तं अन्नंव्यञ्जनसंयुतं॥ सुराम्भोधिमांसशैलंमत्स्यराशि
फलानिच॥ भक्ष्यंभोज्यंतथालेह्यंचर्व्व्यंचोष्यन्तथैवच॥ सकर्पूर
ञ्चताम्बूलंमानसंपरिकल्पयेत॥ आभरणन्ततोदेव्याःपूजनं
मनसैवहि॥ इत्थमन्तःसमाराध्यमनसैवजपेन्मनुं॥ सहस्रादि
जपंकृत्वादेव्यैसोदकमर्पयेत॥ ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्च
सदाशिवः॥ एतदेवमहादेव्याःपर्य्यङ्कःसमुदाहृतं॥ पयःफेननिभां
शय्यांनानापुष्पोपशोभितां॥ पुष्पशय्याञ्चसंकुर्य्यीततत्रदेवींसु
रेश्वरीं॥ चिन्तयेत्साधकोयोगीनानासुखविलासिनीं॥ नृत्यगीतैः
सवाद्यैश्चतोषयेत्परमेश्वरीं॥ ततोहोमंप्रकुर्वीतपूजासाफल्यहे
तवे॥ अथहोमंप्रवक्ष्यामियेनचिन्मयतांलभेत॥ अथाधारमयेकुण्डे
चिदग्नौहोमयेत्ततः॥ आत्मान्तरात्मापरमाज्ञानात्मापरिकीर्त्तितः
॥ एतद्रूपन्तुचित्कुण्डंचतुरस्रंविभावयेत॥ आनन्दमेखलारम्यंवि
न्दुत्रिवलयाङ्कितं॥ अर्द्धमात्रायोनिरूपंब्रह्मानन्दमयंभवेत॥ वा

मेनाडीं इडां ध्यायेद्दक्षिणे पिङ्गलां पुनः॥ सुषुम्नां मध्यतो ध्यात्वा कुर्य्याद्धोमं यथाविधिः॥ धर्म्माधर्म्मसाधकेन्द्रोहविषेण प्रकल्पयेत्॥ मूलमन्त्रं समुच्चार्य्य ततः श्लोकं जपेदमुं॥ नाभिचैतन्यरूपाग्नौ हविषा मनसा स्रुचा॥ ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहं॥ वह्निजायान्तमंत्रेण दद्याच्च प्रथमाहुतिं॥ मूलमंत्रोपरि श्लोकमपरं होमयेन्मनुं॥ धर्म्माधर्म्महविर्दीप्तमात्माग्नौ मनसा स्रुचा॥ सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं॥ वह्निजायान्तमंत्रेण द्वितीयाहुतिमादिशेत्॥ मूलमंत्रं समुच्चार्य ततः श्लोकं जपेदमुं॥ प्रकाशाकाशहस्ताभ्यां अवलंब्यात्मना स्रुचा॥ ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहं॥ वह्निजायान्तमन्त्रेण तृतीयाहुतिमाचरेत्॥ मूलमंत्रं समुच्चार्य्य ततः श्लोकं जपेदमुं॥ अन्तर्निरन्तरनिरिन्धनमेधमाने मायान्धलोकपरिपन्थिनि संविदग्नौ॥ कस्मिंश्चिदद्भुतमरीचिविराग्भूमौ विश्वं जुहोमि वसुधादिशिवावशानं॥ अनेन मनुना हुत्वा पूर्णाहुतिमनन्तरं॥ इदन्ता पात्रभरितं महन्ता परनामृतं॥ पूर्णाहुतिमयेवह्नौ पूर्णहोमं जुहोम्यहं॥ वह्निजायान्तमन्त्रेण दद्यात्पूर्णाहुतिं प्रिये॥ इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत्॥ एवमेव महेशानि पूजयाम्यहमीश्वरं॥ योगिनो मुनयश्चैव पूजयन्ति सदा प्रिये॥ सिद्धो भवेद्गृही। भूतशुद्धौ॥ सर्व्वासु बाह्यपूजासु अन्तःपूजा विधीयते॥ अन्तःपूजा महेशानि बाह्यकोटिगुणा भवेत्॥ सकृत्पूजा महेशानि बाह्यकोटिगुणं लभेत्॥ किन्तस्य बाह्यपूजायां सर्व्वव्यर्थं कदर्थनं॥ उपचाराभावे बाह्यपूजा कदर्थनं॥ विनोपचारैर्या पूजा सा पूजा न प्रसीदति॥ तन्त्रान्तरे॥ यदि बाह्येन द्रव्यसम्पत्तिरपि वर्त्तते॥ अन्तर्यागं विधायेत्थं वह्नियागविधिं चरेत्॥ यामले॥ पूजाभावे महेशानि हृदये पूजयेच्छिवां॥ सर्व्वपूजाफलं देवि प्राप्नोति पूजकः प्रिये॥ तन्त्रगन्धर्वे॥ मनसापि महादेव्यै नैवेद्यं दीयते यदि॥ यो नरो भक्तिसंयुक्तः स दीर्घायुः सुखी भवेत्॥ माल्यं पद्मसहस्रस्य मनसा यः प्रयच्छति॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥

स्थित्वादेवीपुरेश्रीमान्सार्व्वभौमोभवेत्क्षितौ॥ मनसापिमहा
देव्यैयस्तुकुर्य्यात्प्रदक्षिणम्॥ सदक्षिणेयमगृहेनरकानिनपश्य
ति॥ मनसापिमहादेव्यायोभक्तिंकुरुतेनरः॥ सोपिलोकान्वि
निर्जित्यदेवीलोकेमहीयते॥ महामायांमहादेवीमभ्यर्च्च्य यामि
शक्तितः॥ नानाविधैस्तुनैवेद्यैरिति चिन्ताकुलस्तुयः॥ नैवेद्यंदेहि
निरतामितियोभाषतेमुहुः॥ सोपिलोकान्विनिर्जित्यदेवीलोकेम
हीयते॥ ॥ इतिशाक्तानन्दतरङ्गिण्यां अन्तर्यागविधिः षष्ठोल्लासः
॥ अथानन्दमयींपूजांवक्ष्यामिगुप्ततान्त्रिकां॥ यांकृत्वाशिवसा
युज्यंलभतेसाधकोत्तमः॥ पूजागृहंसमासाद्यसाधकेन्द्रोमहेश्व
रि॥ प्रथमंजलमानीयपादप्रक्षालनंस्मृतं॥ उत्तराभिमुखोभूत्वा
पादप्रक्षालनञ्चरेत्॥ दिवापूर्व्वमुखोभूत्वारात्रौकुर्य्यादुदङ्मुः
खः॥ देवीपूजांशिवस्यापिसदाकुर्य्यादुदङ्मुखः॥ प्रणवंपूर्वमुच्चा
र्य्यतद्दितीतिपरन्ततः॥ सदितितुसमुच्चार्य्यकर्म्मकुर्य्याद्विचक्षणः
॥ स्मरणात्कर्म्मणामाद्यै ब्रह्मभूयायकल्प्यते॥ सर्व्वदासर्व्वका
र्य्येषुवैदिकेतान्त्रिकेतथा॥ स्वविद्यांसंस्मरन्कुर्य्यात्क्रियांसर्व्व
प्रचोदितां॥ स्थानशोधनमाह तन्त्रगन्धर्व्वे॥ वीक्षणंब्रह्मबीजेन
यत्तभूमेःसमीरितं॥ प्रोक्षणंचास्त्रमन्त्रेणयागभूमेःसमाचरेत्॥
अज्ञानदुरितंस्थानंमार्ज्जनादौचयद्भवेत्॥ एवमादीनिनश्यंति
लोकानांशङ्करप्रिये॥ मधुकैटभयोर्मेधसंघातैर्दृढतांगता॥ मेदि
नीसर्व्वदाशुद्धासुरपूजासुसर्व्वतः॥ तस्यदोषस्यमोक्षार्थंकामः
बीजंक्षितौलिखेत्॥ पञ्चवर्णरजश्चित्रानानागन्धसमन्विता॥ पु
ष्पप्राकारसंकीर्णाघण्टाचामरभूषिता॥ बालार्कसदृशीरम्यामनः
संतोषकारिणी॥ एवंभूमिंसमाश्रित्यपूजयेत्परमेश्वरीं॥ मन्त्रेरा
चमनंकुर्य्यात्देवींध्यात्वाहृदम्बुजे॥ आसनेउपविशेद्विवद्वी
रासनादिकं॥ उपविश्यततोमन्त्रीद्रव्याणिस्थापयेत्सुरः॥ गन्धपुष्पा
क्षतादींश्चदक्षेदीपांश्चसर्वतः॥ नैवेद्यंदक्षिणेवामेपुरतोवानपृ
ष्ठतः॥ घृतदीपंदक्षिणेदद्यात्तैलदीपन्तुवामतः॥ वामतस्तुतथाधू
पं अग्रेवाननुदक्षिणे॥ निवेदयेत्पुरोभागेगन्धंपुष्पञ्चभूषणम्॥

सर्व्वस्वंदक्षिणेस्थाप्यंवामेचार्घ्यंनिवेदयेत्॥स्थापयेच्चर्व्यचोष्या
दिनैवेद्यादीनिसन्निधौ॥करयोःक्षालनार्थायपृष्ठेपात्रंविनिर्दिशेत्
॥स्वस्यशक्त्यनुरूपेणसर्व्वंसंपादयत्नतः॥पूजाद्रव्याणिसंप्रो
क्ष्यमूलमन्त्रविधानतः॥दर्शयेद्धेनुमुद्रांच्चद्रव्यशुद्धिर्युदीरि
ता॥सन्नैवेद्यादिकंयत्तुपुष्पगन्धादिकञ्चयत्॥सर्व्वमाच्छादि
तंकार्य्यंयावदाहारयेत्परं॥राक्षसाःप्रतिगृह्णन्तिनिराच्छादन
कंयतः॥प्रोक्षणीस्थापनमाह॥गन्धर्वे॥पात्रंअस्त्राम्बुभिःप्रोक्ष्य
दक्षिणेस्थापयेत्ततः॥शुद्धोदकेनसंपूज्यमूलमन्त्रंजपेत्सुधीः
॥प्रोक्षयेत्तेनसकलंप्रोक्षणीस्थेनवारिणा॥आधारस्थजलशो
धनमाह॥गन्धर्व्वे॥मण्डलंवामतःकृत्वाजलेनचतुरस्रकम्॥
ॐवषट्इत्याभ्यांमण्डलेस्थापयेद्घटं॥चन्द्रसूर्य्याग्निमण्डलं
तत्रसंपूज्यपरमेश्वरि॥आनंदभैरवंतत्रयजेदानन्दभैरवीं॥य
दस्यदूषणंपात्रंप्रक्षाल्यहृन्मन्त्रेणपूजयेत्॥मंत्रयेत्प्रणवेनैव
सामान्यर्घ्यमिदंस्मृतं॥प्रणवेनदशधामन्त्रयेदिस्सर्थः॥फट्द्वा
रंप्रोक्षयेच्चैवबीजेनाभ्यर्च्चयेत्सुवा॥गांवांक्षांयाञ्चबीजान्युक्त्वा
निचमहेश्वरि॥गणेशवटुकक्षेत्रपालांश्चयोगिनींयजेत्॥पूज
येत्साधकश्रेष्ठःप्रतिद्वारमितिक्रमात्॥विश्वसारे॥एषांपूजांवि
लङ्घ्याथसंसिद्धिःस्याद्युगेयुगे॥उत्तरादिक्रमेणैवद्वारपालान्
समर्च्चयेत्॥ब्रह्माणंवास्तुदेवांश्चपूजयेद्गृहमध्यतः॥आसने
मण्डलंकृत्वासंपूज्यावाहयेत्सुधीः॥विशोध्यवाचंचित्तंचभूमिं
सम्यग्विशोधयेत्॥ॐपवित्रवज्रभूमे हुं फट्स्वाहेतिमंत्रतः॥
अनन्तरंदेशिकेन्द्रोदिव्यदृष्ट्यावलोकनैः॥हुंफडितिमंत्रेणऊर्द्धु
र्द्धमप्यधस्तथा॥दिव्यानुत्सारयेद्विघ्नानस्त्राङ्घ्रिश्चान्तरिक्षगान्
॥पार्ष्णिघातैस्त्रिभिर्भौमानितिविघ्नान्निवारयेत्॥विश्वसारे॥अ
निमेषचक्षुषादृष्टिर्द्दिव्यदृष्टिःप्रकीर्त्तिता॥करशुद्धिर्यामले॥प्रा
गुदीचिमुखोवापिसपुष्पैर्मार्जयेत्करः॥मूलमुच्चार्य्यदेवेशितत्
पुष्पंवामतस्त्यजेत्॥मंत्रमाह यामले॥भौतिकः शशिकलासम
न्वितोवन्हिषोडशकलासमन्वितः॥ङेन्तमंत्रमथफट् समन्वितं

शुद्धयेमनुरयंप्रकीर्त्तितः॥ भौतिकऐकारःशशिकलानादबिन्दुः
वन्हिरेफस्तेनसैरःअस्त्रायफट्॥ शुद्धयेकरशुद्धयेत्यर्थः। तन्त्र
गन्धर्वेपि॥ गृहीत्वारक्तपुष्पंचसगन्धंसाधकोत्तमः॥ अनेनैवतु
मंत्रेणपुष्पंहस्ततलेस्थितं॥ संमार्ज्यसव्यहस्तेनवामेनपाणि
नाततः॥ निर्मज्यकामबीजेनजिघ्रेत्तद्वाग्भवेनतु॥ ऐशान्यांनि
क्षिपेदेनतत्शवबीजेनपार्व्वति॥तत्रैव॥ मर्द्दनात्करयोःशुद्धिनि
र्मञ्जनात्तत्रृष्टयोः॥ घ्राणाद्देवाश्चतुष्यंति तीर्थानांचसमागमः
॥प्रोक्षणात्सर्व्वविघ्नानांदूरसंस्थानमेवच॥ दुर्गन्धोच्छिष्टसंस्प
र्शाद्दूषणंकरयोस्तु यः॥ अज्ञातरूपंतत्सर्वंनाशयेद्विधिनात्मना
॥करशुद्धिंसमासाद्यकुर्य्यात्तालत्रयन्ततः॥ ऊर्द्ध्वोर्द्ध्वमस्त्रमन्त्रे
णदिग्बन्धमपिदेशिकः॥ दिग्बन्धनंछोटिकाभिर्द्दशभिःकारयेत्सु
धीः॥ विघ्नानुसारणंकृत्वाततःपुष्पविशोधनं॥ कृताञ्जलिपुटोभू
त्वावामेगुरुत्रयंनमेत्॥ गुरुत्रयमाह तन्त्रे॥ गुरुंपरगुरुंचैवपरा
परगुरुन्ततः॥ दक्षपार्श्वेगणेशञ्चमूर्द्धिदेवींनमेत्प्रिये॥ गंधर्व्वे।
भूतशुद्धिंऋषिन्यासंपीठन्यासन्तथैवच॥ कराङ्गयोःषडङ्गानि
मातृकान्यासमेवच॥ विद्यान्यासंमहेशानियेश्चदेवमयोभवेत्॥
एतदेवहिनित्यंस्यात् काम्यञ्चाल्पंप्रकीर्त्तितं॥ देवत्रयंयजेद्देवे
नादेवोदेवमर्च्चयेत्॥ नादेवःपूजयेद्देवंनपूजाफलभाग्भवेत्॥
वासिष्ठरामायणे॥ अविष्णुःपूजयेद्विष्णुंनपूजाफलभाग्भवेत्
॥विष्णुर्भूत्वार्च्चयेद्विष्णुंनाविष्णुर्विष्णुमाप्नुयात्॥ भविष्ये॥ नारु
द्रःसंस्मरेद्रुद्रंनारुद्रोरुद्रमर्च्चयेत्॥ नरुद्रःकीर्त्तयेद्रुद्रंनारुद्रोरुद्र
माप्नुयात्॥ नादेवीकीर्त्तयेद्देवींनादेवीनांसमर्च्चयेत्॥ न्यासात्तदा
त्मकोभूत्वादेवोभूत्वातुतंयजेत्।आग्नेये॥ रुद्रस्यपूजनाद्रुद्रोवि
ष्णुःस्याद्विष्णुपूजनात्॥ सूर्य्यःस्यात्सूर्य्यपूजातःशक्त्यादिःशक्तिपू
जनात्॥ शक्त्यादिरित्यत्रआदिशब्दोपादानात् गणेशादिपरिग्र
हः। येनैवन्यासमात्रेणदेववज्जायतेनरः॥ प्राणायामैस्तथाध्या
नैर्न्यासैर्देवशरीरकृत्॥ न्यासानांप्रचुरत्वेनफलानामपिभूरिता
॥स्वभावतःसदाशुद्धंपंचभूतात्मकंवपुः॥ मलमूत्रसमायुक्तंसर्व

दैवमहेश्वरि॥ तस्यैववह्निविशुद्ध्यर्थंवाय्वग्निसलिलाक्षरैः॥शोषदा
हौतथाभस्मप्रोत्सारणमुतवर्षणं॥ आप्लवनञ्चकर्त्तव्यंपूरकु
म्भकरेचकैः॥शरीराकारभूतानांमलानांयद्विशोधनं॥अव्यक्त
ब्रह्मसंस्पर्शाद्भूतशुद्धिरियंशिवे॥भूतशुद्धिंविधायेत्थमर्घ्यादि
स्थापनञ्चरेत्॥विदध्यान्मातृकान्यासंमन्त्रन्यासमनन्तरं॥प्रा
णायामंततःकुर्य्यात्ऋष्यादिन्यासमाचरेत्॥न्यासौकराङ्गयोः
कृत्वास्वात्मानंभगवतींस्मरेत्॥प्राणायाममन्ततःकुर्य्यात्तत्वत्रय
मिदंस्मृतं।अर्घ्यंसंस्थापयेन्मन्त्रीयथान्यासंविधानतः॥त्रिको
णषट्कोणवृत्तचतुरस्राणिकारयेत्॥पुष्पैरभ्यर्च्यतन्मंत्रीतत्रा
धारंनिवेशयेत्॥ मं वह्निमंडलायदशकलात्मनेनमः॥पूजयि
त्वार्घ्यपात्रन्तुतत्रैवस्थापयेद्बुधः॥फडितिप्रक्षालनंकृत्वापूजये
त्साधकोत्तमः॥ अं अर्कमंडलायनमः इत्यपिपूजयेत्॥मूलेनापू
र्य्यदेवेशिविमलेनजलेनतु॥ ॐसोममंडलायषोडशकलात्मनेन
मः॥पूजयित्वाषडङ्गानिन्यसेत्साधकसत्तमः॥तत्राक्षतानिदूर्व्वा
णिपुष्पाणिचविनिक्षिपेत्॥मूलमन्त्रंजपेत्पृष्ठातस्योर्द्ध्वंमन्त्रविन्य
सेत्॥हृन्मंत्रेनाभिसंपूर्य्यहस्ताभ्यांछादयेदपः॥हस्ताभ्यामितिम
त्स्यमुद्रया इत्युक्तं॥अस्त्रमंत्रेणसंरक्ष्यकवचेनावगुण्ठयेत्।धेनु
मुद्रांसमासाद्यबोधयेच्चक्रमुद्रया॥अमृतंतज्जलंचिन्त्यद्रव्यसं
प्रोक्षणञ्चरेत्॥ आत्मनोऽभ्युक्षणंकृत्वामातृकान्यासमाचरेत
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः॥सदूर्व्वैःसर्व्वदेवानामेत
दर्घ्यमुदीरितं॥अर्घपात्रस्थितैस्तोयैर्विनायद्धिनिवे दनं॥देवे=
भ्योदीयतेयद्यत्तत्सर्वंनिष्फलंभवेत्॥अर्घ्यस्योत्तरतःपाद्यंपा
द्यमाचमनीयकं॥तत्पार्श्वेमधुपर्कन्तुदद्याच्चमधुमिश्रितं।एतत्
श्यामकदूर्व्वाब्जविष्णुक्रान्ताभिरीरितं॥पाद्यंपात्रेप्रदातव्यंअ
र्घ्यञ्चैवार्घ्यपात्रके॥जातीलवंगककोलैर्दद्यादाचमनीयकं॥सा
मान्यार्घ्यक्रमेणैवपात्रसंस्थापनञ्चरेत्॥ अथमातृकान्यासः
कादिमते॥मातृकायाःषडङ्गञ्चमातृकान्यासमेवच॥सर्व्वेषांप्र
थमंकृत्वापश्चात्तन्त्रोदितान्न्यसेत्॥मातृकाद्विविधाप्रोक्तापराचा

व्यपरातथा॥सुषुम्नान्तः पराज्ञेया अपरादेहमाश्रिताः॥अथमा
तृकाषडङ्गन्यासः॥ज्ञानार्णवे॥अंआंमध्येकवर्गेतु इंईंमध्येच
वर्गकं॥उंऊंमध्येटवर्गेतु एंऐंमध्येतवर्गकं॥ओंऔंमध्येपवर्गेतु
अंअः मध्येयवर्गकं॥मूलादिब्रह्मरन्ध्रान्तंध्यायेद्देवींचिदात्मिकां॥
बिन्दुस्रिनसुधाधारैस्तर्पयेन्मातृकांन्यसेत्॥दशपत्रोम्बुजेना
भौडकारादीन्न्यसेद्दश॥षट्पत्रमध्येलिङ्गस्थेबकारादीन्यसेच्च
षट्॥आधारेचतुरोवर्णान्वादीन्न्यसेच्चतुर्द्दले॥हंसौभ्रूमध्यगे
द्वेद्विदलेविन्यसेत्प्रिये॥एकैकवर्णमुच्चार्य्यमूलाधाराध्रुवांतिकं
॥नमोन्तमितिविन्यासंन्यासान्तरःपरिकीर्त्तितः॥ध्रुवमितिसहस्र
दलपर्य्यन्तमित्यर्थः॥शारदायां॥बाह्यंवैमातृकान्यासंशृणुष्वाव
हितोमम॥ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषुगण्डयोः॥ओष्ठदन्तो
त्तमाङ्गस्यदोःपत्सन्ध्यग्रकेषुच॥पार्श्वयोःपृष्ठतोनाभौजठरेहृदये
ऽशके॥ककुद्यंशेहृत्पूर्व्वपाणिपादयुगेतथा॥जठराननयोर्न्यसे
न्मातृकार्णान्यथाक्रमं॥मातृकान्यासमुद्रामाह मानसोल्लासे मन
सावान्यसेन्न्यासान् पुष्पैर्वाथवान्यसेत्॥अंगुष्ठनामिकायोगा
न्न्यासाह्यासर्व्वकर्म्मसु॥गौतमीये॥चतुर्द्धामातृकाप्रोक्ताकेवला
बिन्दुसंयुता॥सविसर्गासशोभयाचरहस्यंकथयामिते॥विद्याकरी
केवलाचशोभयाभक्तिदायिका॥सविसर्गापुत्रदात्रीसविन्दुर्विन्दु
दायिनी॥बिन्दुदायिनीमोक्षदायिनीत्यर्थः॥धनंयशस्यमायुष्यक
लिकल्मषनाशनं॥यःकुर्य्यान्मातृकान्यासंसएवश्रीसदाशिवः॥
अथविद्यान्यासः॥नवरत्नेश्वरे॥मूर्द्धिमूलेचहृदयेनेत्रत्रितयए
वच॥श्रोत्रयोर्युगलेदेविमुखेचभुजयोःपुनः॥पृष्ठेजानुनिनाभौच
विद्यान्यासंसमाचरेत्॥एवंन्यासकृतःसाक्षात्प्रभुःपशुपतिःस्व
यं॥फेत्कारिण्यां॥ॐकारंसंपुटीकृत्यमूलेनव्यापकंन्यसेत्॥पंच
धानवधावापिन्यसेद्धासन्नथातथा॥मूलमुच्चार्यशिरादिपादपर्य्यन्तं
पादादिशिरान्तंहृदयादिमुखान्तंव्यापकंन्यसेत् इत्यर्थः॥इतिवि
द्यान्यासः॥विशुद्धेश्वरे॥प्राणायाममत्रंपंकुर्यात् विद्यपातदनन्तरं॥पू
रकंवामनाड्यात्तुकुर्य्यात्षोडशधाजपैः॥कुंभकंमध्यनाड्यात्तुचतुः

षष्ठिजपान्ततः॥ ॥रेचनंपिंगलायान्तुतदर्द्धजपसंख्यया॥विपरी
तंपुनःकुर्य्याद्यथाशक्त्यातुसाधकः॥तदशक्तौचतुर्थीपिप्राण संय
मनंचरेत्॥चतुर्थीपीतिमूलविद्यायाश्चचतुर्वारजपनं॥षोडशवा
रजपेनकुंभकं॥अष्टवारजपेनरेचनमित्यर्थः॥तत्राप्यशक्तौसम
याङ्गमातृकायां॥इडयापूरयेद्वायुंसकृच्चमूलविद्यया॥मध्यना
ड्याकुम्भयेच्चवेदसंख्यावरानने॥नेत्रसंख्याक्रमेणैवरेचयेत्पिं
गलाध्वना॥पुनःपुनःक्रमेणैवयथावारत्रयंभवेत्॥बाह्यादापूरणं
वायोरुदरेपूरकोभवेत्॥सम्पूर्णकुम्भवद्वायोर्द्धारणंकुंभकोभवेत्
॥बहिर्यद्रेचनंवायोरुदराद्रेचकोहिसः॥ज्ञानार्णवे॥कनिष्ठानामि
काङ्गुष्ठैर्यन्नासापुटधारणं॥प्राणायामःसविज्ञेयस्तर्जनीमध्यमे
विना॥प्राणायामंविनादेविपूजनेनास्तियोग्यता॥यामले॥ऋषिं
न्यसेन्मूर्द्धिदेशेछन्दस्तुमुखपंकजे॥देवतांहृदयेचैववीजन्तुगुह्य
देशके॥शक्तिन्तुपादयोश्चैवसर्व्वाङ्गेकीलकंन्यसेत्॥ऋषिछन्दो
देवतानांविन्यासेनविनायदा॥जप्यतेसाधकोप्येषतत्रतदफलं
भवेत्॥तत्ततत्प्रक रणीयंऋषिछन्दादिकंन्यसेदित्यर्थः॥कराङ्ग
न्यासमाह शारदायां॥अङ्गुष्ठादिष्वङ्गुलीषुन्यसेदङ्गेसजातिः
भिः॥तत्तत्कल्पोक्तमन्त्रैःसजातिभिःसनमआदिभिः॥ज्ञानार्णवे
॥नमःस्वाहावषट्हूंवौषट्कारान्तासजातयः॥हृतशिरःशिखा
कवचनेत्रत्रयन्तथास्त्रकं॥शारदायां॥अस्त्रंतुतलयोर्न्यस्यकु
र्य्यात्तालत्रयादिकं॥दिशस्तुनैवबध्नीयात्छोटिकाभिःसमन्ततः
॥अङ्गन्यासः॥हृदयादिषु विन्यसेदङ्गमन्त्रांस्तथासुधीः॥हृद
यायनमः पूर्व्वंशिरसिवन्हिवल्लभा॥शिखायैवषडित्युक्तंक
वचायहूमीरितं॥नेत्रत्रयायवौषट्स्यादस्त्रायफडितिक्रमात्॥
षडङ्गमंत्रमित्युक्तंषडङ्गेषुनियोजयेत्॥रुद्रयामले॥हृदयंमध्य
माभ्याञ्चतर्जनीभिःस्मृतंशिरः॥मध्यमातर्जनीभ्यांस्यादङ्गुष्ठेन
शिखास्मृता॥दशभिःकवचंप्रोक्तंतिसृभिर्नेत्रमीरितं॥प्रोक्ताङ्गुली
भ्यामन्त्रंस्यादङ्गङ्कुप्तिरियंमतेति॥तिसृभिरितितर्जनीमध्यमाना
माभिः॥तर्ज्जनीमध्यमानामाःप्रोक्तानेत्रत्रयेक्रमात्॥भैरवीतंत्रे॥

षडङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमं॥ तन्त्रे। अङ्गन्यासक
रन्यासौ मायया दीर्घमाचरेत्॥ सारावल्यां। यद्बीजाद्या भवेद्विद्या
तद्बीजेनाङ्गकल्पना॥ कुलचूडामणौ॥ एकाक्षरमुद्धृत्य पूर्वं बीजं
परं शक्तिरिति॥ षड्दीर्घभाजा वीजेन कुर्यादङ्गादिकल्पना। काली
विद्यायां स्वच्छन्दसंग्रहे। स्वरं विहाय वीजे तु दीर्घषट्कानि योजये
त्॥ षडङ्गानि विधेयानि सर्वत्रायं विधिः स्मृतः॥ पूजाजपार्च्चनाद्यो
मात् सिद्धमन्त्रकृता अपि॥ अंगन्यासं विना देवि न दास्यन्ति फला
न्यपि॥ इति नित्यन्यासः॥ स्वस्वकल्पोक्तषोढान्यासं कुर्यात्॥ षोः
ढान्यस्तशरीरस्तु भवेद्गंगाधरः स्वयं॥ अवश्यं प्रत्यहं कार्य्यं न पूजा
न जपस्तथा॥ कृतेपि साधकश्रेष्ठो महादेवसमो भवेत्॥ कृतन्यासोः
कृतन्यासं प्रणमेद्यदि पार्व्वति॥ तत्क्षणादकृतन्यासो विदीर्णहृ
दयो भवेत्॥ यं नमेत्तिमहेशानि षोढापुटितविग्रहः॥ अल्पायुः स भ
वेत् सद्यो देवनाकल्पतो भिया॥ न्यासं निवर्त्तयेद्देवि षोढान्यासपु
रःसरं॥ तन्त्रगन्धर्व्वे॥ आत्मानं परमं ध्यात्वा दिव्यस्त्रीभिरलङ्कृ
तम्॥ दिव्यमृद्धिमहच्छत्रं सहस्त्रदलनिर्मितं॥ रक्तासनोपविष्टं
तु लाक्षारुणगृहे स्थितं॥ ताम्बूलारक्तवदनं नानागन्धसमन्वितं
॥ चंदनागुरुरव्यङ्गो रक्तचंदनभूषितः॥ सर्व्वालंकारभूषाढ्यः देवी
व्रतपरायणः॥ सुगंधिपुष्पाभरणवस्त्रादिभिरलङ्कृतः॥ नस्यह
स्तगना सिद्धिर्नान्यस्य च कदाचन॥ ततो देवीं हृदम्भोजे ध्यायेत्तद्ग
तमानसः॥ पुष्पं गृहीत्वा देवेशि मुद्रया तत्र खण्डया॥ तां कुर्य्यात् हृ
दयासन्नो निमील्य लोचनद्वयम्॥ समकायशिरोग्रीवो मृद्हतः स्थि
रतो बुधः॥ ध्यानं समारभेन्मन्त्री सर्व्वपापप्रणाशनम्॥ ततो हृत्
पंकजे देवीं गन्धादिभिः समर्च्चयेत्॥ एनान्तु मानसैर्भोगैर्गन्धपुष्प
प्रदीपकैः॥ नैवेद्यैर्बलियुक्तैश्च पूजयेद्वै यथाविधिः॥ ततो वै मान
सं जापं कुर्य्याद्धोमादिमेव च॥ नमस्कृत्य तथास्तुत्वा वहिर्यजनमा
चरेत्॥ ततो हृदयपद्मान्तः स्फुरंतीं परमेश्वरीम्॥ सुषुम्नावर्त्मना नी
त्वा शिरस्थानं महेश्वरीम्॥ तत्रानन्देन संयोज्य केवलानन्दरूपिणीं
॥ ततो वै हृदयासन्ने पुष्पस्थान समानयेत्॥ तमाज्ञास्थानमानीय

वहन्नाड्याधिरेचयेत्॥ नासयादस्ययादेविवायुवीजेनमंत्रवित्॥
करस्थंकुसुमंदेविस्थापयेदासनोपरि॥ एह्येहिभगवत्यम्बभक्ता
नुग्रहविग्रहे॥ योगिनीभिःसमंदेविरक्षार्थंममसर्वदा॥ देवेशिभक्ति
सुलभेपरिवारसमन्विते॥ यावत्त्वांपूजयिष्यामितावत्त्वंसुस्थिराभव॥
देवींध्यात्वासमावाह्यतत्तन्मुद्राःप्रदर्शयेत्॥ तत्तन्मुद्रा आवाहना
दिमुद्रादर्शयेत्॥ यामले॥ आदौमूलंसमुच्चार्य्यपश्चाद्देवींसमुच्च
रेत्॥ सम्प्रदानंतदन्तेतुत्यागार्थैकपदन्ततः॥ संकल्पोक्तक्रमेणैव
पूजयेत्परमेश्वरीं॥ नार्च्चयेदेकहस्तेननपञ्चनखदर्शनं॥ निष्फलाकी
र्त्तितासाहिसर्व्वत्रापिनशोभने॥ चरणावारणाभ्यंतर्वक्षोमौलिषुप
ञ्चसु॥ पुष्पाञ्जलिंप्रसूनैश्चविकीर्य्याथमहेश्वरीं॥ देवीपादाम्बुज
द्वन्द्वेत्रिभिःपुष्पाञ्जलिंक्षिपेत्॥ पादुकांपूजयामीतित्रिधापुष्पंवि
निःक्षिपेत्॥ अंगुष्ठनामिकायोगाद्गन्धपुष्पनिपातनं॥ तर्पणंतुमु
खेदद्यात्त्रिवारंमूलविद्यया॥ अंगुष्ठानामिकायोगाच्छिवशक्त्या
त्मकंपरं॥ तयोःसंयोगमात्रेणद्रव्यस्यादमृतोपमं॥ तेनामृतेनदिव्ये
नतर्पयेत्परदेवतां॥ षडंगंपूजयेत्तत्रदेव्यादेहेथवापुनः॥ हृदये
हृदयाङ्गन्तुशिरोङ्गंशिरसेतथा॥ शिखायान्तुशिखाप्रोक्ताकवचं
सर्व्वदेहके॥ नेत्रेनेत्रंत्रयप्रोक्तंदिशामस्त्रमुदीरयेत्॥ नमःस्वाहा
वषट्हूंञ्चवौषट्फडजातिसंयुतं॥ षडंगंयुवतीनित्यादेव्यादेहेषुसं
स्थिता॥ तन्त्रे॥ इष्ट्वाहृदयमाग्नेय्यांऐशान्यान्तुशिरोयजेत्॥ नैर्ऋ
त्याञ्चशिखापूज्यावायव्यांकवचंयजेत्॥ अभ्यर्च्च्यपुरतोनेत्रं
दिक्षुअस्त्रमथार्च्चयेत्॥ प्रधानतनुरूपानिषडङ्गानिप्रपूजयेत्॥
शारदादीकायां॥ वायव्यदीशपर्य्यन्तंगुरुपंक्तिंसमर्च्चयेत्॥ गुरुपं
क्त्याज्ञानेतु यामले। अविज्ञातगुरुर्देविगुरुञ्चपरमंगुरुं॥ परापर
गुरुंचैवपरमेष्ठिगुरुंतथा॥ आग्नेय्यादिचतुष्कोणमाह॥ तन्त्रगंध
र्वे॥ ईशानमग्निकोणंस्याद्वायुकोणंतथेशकं॥ राक्षसंवायुकोणं
स्यादग्निंचराक्षसंभवेत्॥ गन्धर्वतन्त्रे॥ अथवारश्मयःसर्व्वादेवी
रूपंविचिन्तयेत्॥ निःसरन्तियथानित्यंसूर्य्यविद्यान्मरीचयः॥ दे
व्यास्तथासमुत्पन्नामहादेव्याःशरीरतः॥ श्रीपात्रामृतेनैवरश्मि

छन्दंप्रतर्पयेत्॥प्राचीदिशंविजानीयात् पूजयेदङ्गदेवताः॥स्वस्था
नमाश्रितादेवाःसर्व्वाभीष्टफलप्रदाः॥स्वस्थानवर्जितादेवाःशोक
दुःखभयप्रदाः॥प्राच्यादिदिशिमाह॥ नवरत्नेश्वरे॥पूज्यपूजक
मध्येतुपूर्व्वास्यैव व्यवस्थिता॥पूज्यस्यदक्षिणेदक्षाचोत्तरेचोत्त
रातथा॥पश्चिमेपश्चिमाज्ञेया पूजायांसर्व्वतःशिवे॥ सर्व्वतःषड
ङ्गपूजायां॥ आत्मनःसंमुखंचैवदेवतायाश्चसंमुखं॥देवस्यम
स्तकंकुर्य्यात्कुसुमेनार्च्चितंसदा॥ पूजाकालेदेवतायानोपविश्रम
येत्करं॥त्रिपुराविषये॥पुरन्दरमुखेदेविपूजयेत्त्रिपुरांयदि॥देवीपृ
ष्ठंभवेत्प्राचीप्रतीचीत्रिपुरापुरः॥कृताञ्जलिः॥श्रीमत्यमुकीदेवी
आवरणांतेपूजयामीत्यनुज्ञांलब्ध्वाआवरणंयजेत्॥पञ्चपत्रेत
तश्चक्रेदेव्याअग्रदलादितः॥वामावर्त्तेनदेवेशिक्रमेणपरिपूजये
त्॥संकल्पोक्तक्रमेणैवपूजयेदङ्गदेवताः॥कुलार्णवे॥त्रिवारं
पूजयेद्वापिसकृद्वापियथेच्छया॥यामले॥ देव्यास्त्रंपूजयेद्विस्तु
पुनर्देवींप्रपूजयेत्॥सवाहनाःसवर्णाद्याःपरिवारास्ततःपरं॥स
र्वोपचारैःसंपूज्य॥सन्निद्धितिमनुंजपेत्॥ ततःसंतोष्यदेवेशींगंधपु
ष्पाक्षतादिभिः॥विशेषेणचसन्तर्प्यपरमानन्दभैरवान्॥ध्यात्वा
कामकलांदेहेविद्याजापंसमाचरेत्॥मन्त्रार्थस्मृतिपूर्वन्तुसह
स्रादिजपञ्चरेत्॥बृहत्श्रीक्रमे॥नजपेत्त्रिंशतान्मूलंसाधकं
तुकदाचन॥तन्त्रे॥सहस्रंवाशतंवापिदशवापिजपन्तथा॥कुर्या
दष्टाधिकंतेषामितिजापविधिःस्मृतः॥जपंसमर्पयेद्देविगन्धपु
ष्पार्घ्यवारिभिः॥तेजोमयंजलंदेव्यावामहस्तेनिवेदयेत्॥गुह्या
तिगुह्यगोप्त्रीत्वमितिमंत्रेणमन्त्रवित्॥ततोनीराजनंकुर्य्याद्दश
वारन्तुदीपकैः॥स्तुवन्प्रदक्षिणीकृत्यदंडवत्प्रणमेद्भुवि॥आ
त्मार्पणेनमनुनाकुर्य्यादात्मसमर्पणं॥तदुक्तंयामले॥इतःपूर्व
मितिप्रोच्यप्राणबुद्धीतिचोच्चरेत्॥देहधर्माधिकारोपिजाग्रत्
स्वप्नसुषुप्तिच॥समावस्थासुमनसावाचाचकर्म्मणेतिच॥हस्ता
भ्यामथपद्भ्यांचतथोदरेणसंस्मरेत्॥शिस्नायायत्स्मृतमित्ये
तत्पदुक्तंयत्कृतंतथा॥सर्व्वमित्यपितद्ब्रह्मार्पणमस्त्वमिवल्लभा

प्रणवंचमदीयंमांसकलंसाध्यदेवतां॥ ङेन्तंसमर्पितंतारं तत्सदि
त्यपिसंस्मरेत्॥अर्घ्योदकाक्षतैर्मूलैर्देव्यै पूजांसमर्पयेत्॥ पूजिता
स्त्वित्यनेनैवदेव्यै पूजांसमाचरेत्॥देव्यागृहीतमित्येवंभावयेद्यत
मानसः॥विम्बसारे॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्यच॥
यन्न्यूनमतिरिक्तंवानत्सर्वंक्षन्तुमर्हसि॥ द्रव्यहीनंक्रियाहीनंश्रद्धा
भक्तिविवर्ज्जितं॥तत्सर्वंक्षमयादेविक्षमस्वत्वंदयानिधे॥यन्मया
क्रियतेकर्म्मतन्महत्स्वल्पमेववा॥तत्सर्वंत्वंजगद्धात्रिक्षन्तव्यम
यमञ्जलिः॥कुलार्णवे॥कृताञ्जलिर्महेशानिरक्षामन्त्रंपठेत्सुधीः॥
ॐकालीविदध्यान्ममपुत्ररक्षांतथा करालीममदेहरक्षां॥दुर्गा
ट्टहासैर्ममशत्रुनाशंकरोतुताराविदधातुराज्यं॥ स्तोत्रैस्तुत्वाप
ठेद्देविकवचंसर्व्वकामदं॥पठेत्सहस्रनामाख्यंस्तोत्रंमोक्षस्य
साधनं॥कवचंहिमहादेविश्रूद्रस्तुजपमाचरेत्॥ कवचेहिविनाद्
तिस्वाहाप्रणवयुक्तकवचंविनेत्यर्थः॥ देवींप्रदक्षिणीकृत्यनमः
स्कृत्यविसर्जयेत्॥ विधायपश्चात्स्वांविद्यांस्वीयहृत्सरसीरुहे
॥सुषुम्नावर्त्मनापुष्पंआघ्रायोद्वासयेत्ततः॥क्षमस्वेतिचमंत्रेण
हृदिदेवींविसर्जयेत्॥भैरवतन्त्रे॥संहारमुद्रयादेविक्षमस्वेतिवि
सर्जयेत्॥ तन्नैवेद्यंशतांशम्वासहस्रांशञ्चभैरवि॥दद्यादुच्छि
ष्टचाण्डाल्यै स्वाहेतिमनुना ततः॥ अथवानिर्म्माल्येनयजेद्देवीमी
शनिर्म्माल्यवासिनीं॥निर्माल्यंशिरसाधार्य्यंसर्व्वाङ्गेचानुलेपनं॥
नैवेद्यंचोपभुञ्जीतदत्वातद्भक्तिशालिने॥ शताभिमन्त्रितंपुष्पंचन्द
नंमूर्द्धिभालतः॥धृत्वावश्यंनयेद्दृश्यंत्रैलोक्यमपिदर्शनात्॥ यंयं
स्पृशामिपादेन यंयंपश्यामिचक्षुषा॥ सएवदासतांयाति यदिश
क्रसमोभवेत्॥ अनेनतिलकंकुर्य्यात्॥ सद्यःपर्य्युषितंवापिनिर्म्मा
ल्यंनप्रदुष्यति॥ ब्रह्मरंध्रेगुप्तस्थानेयन्त्रालेपन्तुधारयेत्॥ उदके
तरुमूलेवानिर्म्मील्यंतस्यसंत्यजेत्॥रुद्रयामले॥ पूर्व्वजन्मार्ज्जि
तैःपुण्यैर्ज्ञात्वैनांपरदेवतां॥ योभजेद्भक्तिमार्गेणतस्यश्रीःसम्पदां
पदं॥ यत्पूजाधनमात्रेणजीवन्मुक्तःप्रजायते॥ इतिवचनात्॥देव्याः
पूजाद्विधाप्रोक्तास्थूलमभ्यन्तरंतथा॥स्थूलमन्त्रमयंपूजास्थूल

विग्रहचिन्तनम्॥ मानसैरुपचारैर्य्यापूजासाभ्यन्तरंप्रिये॥ कर्म्म
योगंविनादेवि ज्ञानयोगंनसिध्यति॥ ज्ञानेनकर्म्मणावापिसिद्धि
र्भवतिनान्यथा॥ ॥इतिशाक्तानन्दतरङ्गिण्यांपूजाप्रमाणनिर्णयः
सप्तमोल्लासः॥ ॥अथवक्ष्येमहेशानिमालायास्तन्त्रवर्त्मना॥ नित्यं
जपंकरेकुर्य्यान्नतुकाम्यंकदाचन॥ काम्यमपिकरेकुर्य्यात्मालाऽ
भावेपिसुन्दरि॥ अथकरमालायामले॥ अनामायास्त्रयंपर्व्वकनि
ष्ठायास्त्रिपर्वकं॥ मध्यमायास्त्रयंपर्व्वतर्ज्जनीमूलपर्व्वणि॥ प्रदक्षि
ण क्रमेणैवजपेद्दशसुपर्व्वसु॥ शक्तिमालासमाख्यातासर्व्वमन्त्रप्र
दीपिका॥ पर्व्वद्वयन्तुतर्ज्जन्यासुमेरुंतांद्गपार्दति॥ तर्ज्जन्यग्रेतथा
मध्येयोजयेत्तत्रमानवः॥ चत्वारितस्यनश्यंति आयुर्विद्यायशोबलं
॥श्रीविद्यायां॥ अनामामध्यमायाश्च मूलाग्रञ्चद्वयंद्वयं॥ कनिष्ठा
याश्चतर्ज्जन्यास्त्रयंपर्वमहेश्वरि॥ अनामामध्यमायाश्चमेरुःस्या
द्वितयंशुभं॥ प्रदक्षिणक्रमाद्देविजपेत्त्रिपुरसुन्दरीं॥ हृदयेहस्तमा
रोप्यतिर्य्यक्कृत्वाकराङ्गुलीं॥ आच्छाद्यवाससाहस्तौदक्षिणेनस
दाजपेत्॥ अङ्गुलिर्नवियुञ्जीतकिञ्चित्संकुञ्चितेतले॥ अङ्गुलीनां
वियोगाच्चछिद्रेचस्रवतेजपः॥ अङ्गुल्याग्रेषुयज्जप्तं यज्जप्तंमेरु
लङ्घने॥ पर्वसंधिषुयज्जप्तंतत्सर्व्वंनिष्फलंभवेत्॥ यामले॥ मणिनि
यममाह॥ अष्टोत्तरशतमणिभिर्निर्मितायातुमालिका॥ राज्यंवित
नुतेनृणांदेहान्तेमोक्षदायिनी॥ पञ्चविंशतिभिर्मोक्षंत्रिंशद्भिर्धन
सिद्धये॥ चतुर्दशमयीमोक्ष दायिनीभोगवर्द्धिनी॥ सर्व्वेऽर्थाःसप्त
विंशत्यापञ्चदश्याभिचारके॥ पंचाशद्भिःकाम्यसिद्धिस्तथाचचतु
रोत्तरैः॥ अष्टोत्तरशतैःसर्व्वसिद्धिरुक्तामनीषिभिः॥ त्रिपुरायाजपे
शस्तारुद्राक्षैः रक्तचन्दनैः॥ भैरवीविषये॥ वाराहीतन्त्रे॥ सुवर्ण
मणिभिर्मालांस्फाटिकींशङ्खनिर्मितां॥ प्रवालैरेववाकुर्य्यात्पुत्र
जीवंविवर्जयेत्॥ श्मशानधत्तूरैर्मालांकुर्य्याद्धूमावतीविधौ॥ र
क्तेनचन्दनेनापिबालामालांप्रकल्पयेत्॥ दन्तेनकालिकायास्तु
राजदन्तेनमेरुणा॥ उग्रताराजपेशस्तामह त्तुस्वस्यमालिका॥
उन्मुख्याश्चतथाज्ञेयामालिकासिद्धिदायिका॥ शाक्तानांस्फाटिकी

मालारक्तचन्दनसम्भवा॥ रुद्राक्षमालिकानित्यंचतुर्व्वर्गफलप्र
दा॥ निर्मितारौप्यमणिभिर्जपमालेप्सितप्रदा॥ हिरण्मयैर्विरचि
तानरःकामान्प्रयच्छति॥ प्रवालैर्विहितामालाप्रयच्छेद्विपुलं
धनं॥ सौभाग्यंस्फाटिकीमालामौक्तिकैर्विहिताश्रिये॥ निर्मिताश
ङ्खमालाभिःकुरुतेकीर्त्तिमक्षयं॥ सर्वैर्विरचितामालासदास्यान्मु
क्तयेनृणां॥ गोपनीयानिशंदेविजपमालेप्सितार्त्तये॥ मुंडमाला
यां॥ रुद्राक्षैर्व्वायदिजपेदिन्द्राक्षैःस्फाटिकैस्तथा॥ नान्यमध्ये
प्रकर्त्तव्यंपुत्रजीवादिकञ्चयत्॥ यद्यन्यत्तुप्रयुञ्जीतमालांज
पकर्म्मणि॥ तस्यकाम्यञ्चमोक्षञ्चनोददातिप्रियङ्करी॥ रुद्रया
मले॥ रुद्राक्षैःशक्तिमन्त्रञ्चमन्त्रीयःपूजयेत्प्रिये॥ सदुर्गतिमवा
प्नोतिनिष्फलंतस्यसंजपः॥ विशेषमाह॥ तत्रैव॥ कालिकाछिन्न
मस्ताचत्रिपुरातारिणीतथा॥ एताःसर्वानदुष्यंतिजपाद्रुद्राक्षमा
लया॥ रुद्रयामले॥ दिवाचैवचजप्तव्यारुद्राक्षमालयाक्वचित्॥ पु
रश्चर्य्यांधृतेचात्रदूषणञ्चवरानने॥ अरुद्राक्षधरोभूत्वायद्य
त्कर्मचवैदिकं॥ करोतिजपहोमादितत्सर्व्वंनिष्फलंभवेत्॥ फल
माह मंत्रदेवप्रकाशिकायां॥ क्रमाद्दशगुणंविंद्यात्पुत्रजीवैर्दशा
धिकं॥ शतंस्याच्छंखमणिभिःप्रवालैश्चसहस्रकं॥ स्फाटिकैर्द
शसाहस्रंमौक्तिकैर्लक्षमुच्यते॥ पद्माक्षैर्दशलक्षन्तुसौवर्णैःको
टिरुच्यते॥ कुशग्रंथ्याच रुद्राक्षैरनन्तगुणितंभवेत्॥ श्वेतपद्मा
क्षमालाभिर्जपःस्यादमितंफलं॥ समासेनाक्षमालानांविधानमि
हकथ्यते॥ यथालाभंयथावृद्धिअक्षा ना दाययत्नतः॥ अन्योन्य
समरूपाणिनाभिस्थूलकृशानिच॥ कीटादिभिरदुष्टानिनजीर्णा
निकदाचन॥ गव्यैश्चपञ्चभिस्तानिप्रक्षाल्यचपृथक्पृथक्॥ द्वि
जस्त्रीनिर्मितंसूत्रंशुभंग्रंथिविवर्जितं॥ कार्पासनिर्मितंवापिपट्टसू
त्रेणवापुनः॥ सर्व्वेषामेववर्णानांरक्तंसर्व्वेप्सितंभवेत्॥ कार्पास
संभवंसूत्रंधर्म्मकामार्थमोक्षदं॥ त्रिगुणंत्रिगुणीकृत्यग्रन्थये
न्विकल्प शास्त्रतः॥ मूलाग्रेणपठन्सूत्रंबीजंप्रक्षालयेत्ततः॥
मणिमेकैकमादायसूत्रेतत्रतुयोजयेत्॥ मुखेमुखन्तुसंयोज्य

पुच्छेपुच्छन्तु योजयेत्॥ तत्सजातीयमेवाक्षं मेरुत्वेनाग्रतो
न्यसेत्। एकैकमणिमादाय ब्रह्मग्रन्थिं प्रकल्पयेत्॥ ग्रन्थयेन्मालि
काञ्चैव हृदि भावमनुंस्मरन्॥ स्वयमेव जपेन्मंत्रं अन्यश्चणवमु
च्चरेत्॥ सार्द्धद्वयावर्त्तनेन ग्रन्थिं कुर्य्यात् यथा दृढं॥ ब्रह्मग्रन्थिं
ततो दद्यान्नागपाशमथापि वा॥ गोपुच्छसदृशीं कुर्य्याद् यथस
र्पाकृतिर्भवेत्॥ ग्रन्थिहीनं न कर्त्तव्यमेवं पृष्ठेन दुष्यति। दूषणं
यत्र नास्त्येव ग्रन्थिहीनेपि नित्यशः॥ कालिकातारितायाश्चैव
ज्ञाख्या षट्कभेदके॥ तेनैना वनवासिन्या वा वाह्याद्या विशे
षतः॥ अन्यस्याश्चण्डिकादेव्या ग्रन्थिहीना विधीयते॥ एवं नि
र्म्माय मालां वै शोधयेन्मुनिसत्तमः॥ अप्रतिष्ठितमालाभिर्मंत्रं
जपति यो नरः॥ सर्व्वं तस्य फलं विंद्यात् क्रुद्धा भवति चण्डिका॥ अथो
च्यते प्रतिष्ठा हि शुभे चन्द्रे शुभे तिथौ॥ प्रतिष्ठां कारयेन्मन्त्री स्वयं वा गु
रुणापि वा॥ नित्यं कर्म ततः कृत्वा सामान्यार्घ्यं विधाय च॥ पंचग
व्ये क्षिपेन्मालां शिवमंत्रेण मन्त्रितां॥ शिवमंत्रमाह यामले॥ सांतं
शक्रस्वरारूढं नादविन्दुविभूषितं॥ कथितं शिवमन्त्रञ्च साध
कानां हिताय च॥ शक्रस्वर औकारः शौ तस्लेन जलेनैव स्नापयेत्तद
नन्तरम्॥ क्षालयेत पञ्चगव्येन सद्योजातेन मार्जयेत्॥ सद्योजातं
प्रपद्यामि सद्योजाताय वै नमः॥ भवे भवेऽनादि भवे भजस्व मां भ
वोद्भवः॥ क्षालयेदीशसूक्तेन लिम्पेत तत्पुरुषेण तु॥ गन्धै रन
ल्पैर्मतिमान् अघोरेण तु धूपयेत्॥ अघोरेण तु सूक्तेन शतान्यू
नन्तु मंत्रयेत्॥ वामदेवेन मंत्रेण समीकुर्य्याद्विचक्षणः॥ अश्व
त्थपत्रनवकं पद्माकारं प्रकल्पयेत्॥ तन्मध्ये स्थापयेन्मालां
मातृकामूलमुच्चरन्॥ संस्कृत्येव बुधो मालां तत्प्राणांस्तत्र स्था
पयेत्॥ तत्प्राणान् आराध्यदेवताप्राणान्॥ तत्र देवीं प्रपूज्यैव प
रिवारगणैः सह॥ अनुलोमविलोमेन मातृकार्णेन मंत्रयेत्॥ मेरुं
प्रेतेन संमंत्र्य तां नयेद्देवतात्मिकां॥ प्रेतेन प्रेतवीजेनेत्यर्थः॥ हसौ
विति वीजेन॥ वह्निं संस्कृत्य विधिवद्धोमं तत्र शतं हुनेत्॥ हुनशेषं
प्रतिहुनै प्रदद्यादेवताधिया॥ होमकर्म्मण्यशक्तश्चेद्द्विगुणं जप

माचरेत्॥ तारोक्षमालाधिपतये सुसिद्धिं देहि देहि मे॥ सर्व्वमन्त्रार्थ
साधनीति साधय द्वितय ज्ञतः॥ सर्वसिद्धिं परिकल्पय परिकल्पय मे
स्वाहा॥ इत्थं तु संस्कृता माला जपकर्म्मणि सर्व्वदा॥ अभीष्टं ददते
स्यर्थं सर्व्वकामफलप्रदं॥ गुरुं संपूज्य तद्दत्तां तु गृह्णीयादक्षमालि
कां॥ जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः॥ ऐं ह्रीं अक्षमालिका
यै हृन्मन्त्रेण प्रपूजयेत्॥ पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे
॥ हृत्समीपे समानीय न तु वामेन संस्पृशेत्॥ मध्यमायाम ध्यभागे स्था
पयित्वा समाहितः॥ अंगुष्ठस्थामक्षमालां चालयेन्मध्यमाग्रतः॥ अ
ङ्गुष्ठेन भवेत्तस्य निष्फलं तज्जपः सदा॥ अशुचिर्न स्पृशेन्मालां कर भ्र
ष्टां न कारयेत्॥ तर्ज्जन्या न स्पृशेदेनां गुरोरपि न दर्शयेत्॥ भुक्तौ मुक्तौ
तथा पुष्टौ मध्यमायां जपेत्सुधीः॥ एकैकस्य जपस्यैवं चालयेद्देशिको
त्तमः॥ जप्त्वाक्षमालां सकलां भ्रामयेदखिलां मणिं॥ प्रदक्षिणं पुनः
कृत्वा प्रारब्धैवं समाचरेत्॥ स्वयं वा वामहस्तेन जपमालां न तु स्पृशे
त्। जपकाले जपं कृत्वा शुद्धस्थाने सदान्यसेत्॥ जीर्णे सूत्रे पुनः सूत्रं
ग्रथयित्वा शतं जपेत्॥ अदीक्षितद्विजेनापि स्पृष्टश्चेच्छुद्धिमाचरे
त्॥ न धारयेत्करे मूर्द्धि कण्ठे च जपमालिकां॥ ऊरू पादाधरस्पृष्टा
व्यपसव्यप्रचालिता॥ अगुप्ता चालिता वापि पुनः संस्कारमर्हति
॥ जपमाला मया देवि कथिता भुवि दुर्लभा॥ सदा गोप्या प्रयत्नेन
यदि त्वं मम वल्लभा॥ अथ वर्णमाला॥ माला पञ्चाशिका प्रोक्ता
सूत्रं शक्तिः शिवात्मकं॥ कुण्डलीग्रन्थिता शक्तिः कालान्ते मेरुसंस्थि
तिः॥ चित्रिणी विषतन्त्वाभा ब्रह्मनाडीगतान्तरा॥ तया संग्रथिता
मध्ये साक्षात् जाग्रत्स्वरूपिणी॥ अन्तर्विदुमभाषमाण भुजगी
सुप्तोत्थवर्णोज्ज्वला आरोहप्रतिरोहतः शतमयी वर्गाष्टकाष्ठोत्त
रां॥ अनुलोमविलोमेन मंत्रवर्णविभेदतः॥ मन्त्रेणान्तरितान्वर्णा
न्वर्णेनान्तरितं मनुं॥ कुर्य्याद्वर्णमयीं मालां सर्व्वमन्त्रप्रकाशिनीं
॥ चरमार्णं मेरुरूपं लंघनं नैव कारयेत्॥ सविन्दुवर्णमुच्चार्य्य पश्चा
न्मन्त्रं जपेत्सुधीः॥ अष्टोत्तरशतं मंत्रं ज्ञात्वानेन संजपेत्सुधीः॥ वर्गा
नामष्टवर्गेन अष्टवारं जपेत्सुधीः॥ अकचटतपयशा इत्येवमञ्चा

ष्टवर्गकाः॥ ॥इतिशाक्तानन्दतरङ्गिण्यांमालानिर्णयाष्टमोल्ला
सः॥ ॥जपविधानमहंवक्ष्येशृणुष्वकमलानने॥जपार्थंसर्व्व
मंत्राणांविन्यासञ्चलिपिंविना॥कृतंतन्निष्फलंविन्द्यात्तस्मात्
दौन्यसेत्प्रिये॥जपादौचतथाचान्तेप्राणायामंसमाचरेत्॥वि
शुद्धेश्वरे॥जपःस्यादक्षरावृत्तिर्मानसोपांशुवाचिकः॥निजक
र्णागोचरोयोमानसःसजपःस्मृतः॥उपांशुर्निजकर्णस्यगोचरः
परिकीर्त्तितः॥निगदैस्तुजनैर्वाच्यस्त्रिविधोजपईरितः॥अन्यत्रा
पि॥यदुच्चनीचोच्चरितैःस्पष्टशब्दवदक्षरैः॥मंत्रमुच्चारयेद्व्य
क्तंजपयज्ञःसवाचिकः॥समुच्चचारयेन्मन्त्रमीषदोष्ठौप्रचाल
येत्॥किञ्चित्शब्दमयंब्रूतेउपांशुःसजपःस्मृतः॥धियायदक्ष
रश्रेण्यावर्णाद्वर्णंपदात्पदं॥शब्दानुचिन्तनाभ्यासःसउक्तो
मानसोजपः॥उच्चैर्जपाद्विशिष्टःस्यादुपांशुर्दशभिर्गुणैः॥तस्मा
दपिविशिष्टःस्यात्सहस्रंमानसोजपः॥देवतांचित्तगांकुर्यात्
कुर्य्याच्चहृदयंस्थिरं॥ओष्ठौतुसंकुचौकृत्वास्थिरचित्तःस्थिरे
न्द्रियः॥ध्यायेच्चमनसावर्णान्जिव्हौष्ठौनविचालयेत्॥नकंप
येच्छिरोग्रीवांदन्तान्नैवप्रकाशयेत्॥ ॥मन्त्रोद्धारक्रमेणैवमं
त्रंजपतिसाधकः॥तदासिद्धिंविजानीयात्नसिद्धिस्त्वान्यथाभ
वेत्॥मन्त्रोद्धारक्रमेणैव मन्त्रघटकीभूतस्वरव्यञ्जनवर्ण
ज्ञानक्रमेणेत्यर्थः॥एवकारोऽवधारणार्थः॥आदौध्यानंततो
मन्त्रंध्यानस्यान्तेमनुंजपेत्॥ध्यानमन्त्रसमायुक्तःशीघ्रं
सिध्यतिसाधकः॥कुलार्णवे॥मनसावापठेत्स्तोत्रंवाचावापि
मनुंजपेत्॥उभयोर्निष्फलंदेविभिन्नभाण्डोदकंयथा॥भूतशु
द्धौ॥यस्ययस्यचमन्त्रस्यउद्दिष्टायाचदेवता॥चिन्तयित्वा
तदाकारंमनसाजपमाचरेत्॥शनैःशनैरविस्पष्टंनद्रुतंनविल
म्बितम्॥क्रमेणोच्चारयेद्वर्णान्ह्रस्वान्तक्रमयोगतः॥अतिह्र
स्वोव्याधिहेतुरतिदीर्घोवसुक्षयः॥अक्षराक्षरसंयुक्तंजपेन्मौ
क्तिकहारवत्॥कुलार्णवे॥तन्निष्ठस्तद्गतप्राणस्तच्चित्तस्तत्परा
यणः॥तत्पदार्थानुसन्धानंकुर्वन्मन्त्रंजपेत्प्रिये॥रुद्रयामले॥

तथातथानभिज्ञोनजपस्यफलमश्नुते॥मंत्रार्थंमंत्रदेवयोरभेदज्ञा
नं॥तथाचोक्तंयामले॥मन्त्रार्थंदेवतारूपचिन्तनंपरमेश्वरि॥मन्त्रा
त्मकस्यदेहस्यमन्त्र वाच्येनदेवता॥वाच्यवाचकभावेनअभेदो
मन्त्रदेवयोः॥मन्त्रवाच्यादेवतादेविमन्त्रोपिवाचकःस्मृतः॥वाचके
पिचविज्ञातेवाच्यएवप्रसीदति॥प्रकारांतरमाह भूतशुद्धौ॥मंत्रा
र्थंपरमेशानिसावधानावधारय॥आधारेचिन्तयेद्विद्यांशुद्धस्फटि
कसन्निभां॥बन्धूकरुचिरांलिंगेनाभौस्फटिकसन्निभां॥हृदयेम
रकतश्यामांहरिद्वर्णांविशुद्धके॥आज्ञायांचिन्तयेद्विद्यांचतुर्वर्णानु
रञ्जितां॥षट्चक्रेपरमेशानिध्यानात्साधकसत्तमः॥रुद्रयामले
मंत्रंनीत्वागुरोःपार्श्वेगुरुभक्तिपुरःसरः॥मन्त्रःश्रोत्रेस्यहृन्नेत्र
प्राणान्विज्ञाययत्नतः॥मन्त्राणांकीलकंज्ञात्वाकुर्य्यान्मन्त्रपुरः
स्क्रियां॥नचतत्रतद्वचनस्यपुरश्चरणविषयत्वमेवेतिवाच्यं॥श्रो
त्रादीनांज्ञानाभावेमंत्रजापमात्रेनिषेधते॥तथाचोक्तंमन्त्रकोषे
श्रोत्रादीनांज्ञानाभावेमन्त्रजापंकरोतियः॥दारिद्र्यञ्चविपत्तिश्च
नरकंप्राप्नुयात्तुसः॥अन्यत्रापि॥हृन्नेत्रविहीनोमन्त्रोदारिद्र्यक्ले
शदायकः॥तन्त्रान्तरेपि॥मन्त्रस्यहृदयंनेत्रेज्ञानान्मोक्षमवाप्नुया
त्॥सद्यःसिद्धिःसर्व्वविधास्यात्साक्षाच्छिवएवसः॥भूतडामरे
इन्द्रियमनोविशुद्धिर्मनस्तदास्यादिकंवक्ष्ये॥शृणुदेविप्रवक्ष्यामि
कालीमन्त्रमनुक्रमात्॥बिन्दुःश्रोत्रंनादआस्यंककारंहृदयंविदुः
॥वन्हिनेत्रंकीलकञ्चदीर्घीकारंप्रियंवदे॥तकारंतारिणीमन्त्रेहृ
दयंवन्हिपार्वति॥हकारंविद्धिसर्वत्रशक्तिपक्षेसुरेश्वरि॥उत्तरक
ल्पे॥प्राणविद्यामहाविद्याप्रविद्यासमुदायिका॥श्यामाद्याद्वाविं
शतिविद्यायांविशेषमाह॥उत्तरतन्त्रे॥क्रींकारोमस्तकंदेविक्रीं
कारश्चललाटकं॥नेत्रत्रयंक्रींकारेण क्रूंकारेणचनासिका॥क्रूं
कारोमुखपद्मंस्यात्ह्रींकारःकर्णयुग्मकं।ह्रींकारेणभवेद्ग्री
वादकारश्चिबुकंभवेत्॥क्षिकारेणभवेद्दन्तोणोकारेणोष्ठयुग्म
कं॥काकारेणस्तनद्वन्द्वंलिकारःपृष्ठदेशकः॥केकारेणभवेद्बाहू
क्रींकारेणोदरंभवेत्॥क्रांकारोनाभिदेशःस्यात्क्रींकारश्चनितंबकः

हूंकारो योनिरूपंस्यात हूंकारेणोरुयुग्मकं॥ ह्रींकारो जानुयुग्मं
स्यात ह्रींकारो गुल्फदेशकः॥ स्वाशब्देन पदद्वंद्वं हाशब्देनेरवर
न्तया॥ ताराविद्यायां॥ यामले॥ वाग्देव्याः समुदायस्यादाकृतिः
प्रणवो मुखं॥ माया विधुस्थितो बिन्दुर्लोचने समुदाहृतौ॥ हस
कारेणश्रुती दीर्घः स्वरौ हृदयरूपिणौ॥ फट्कारो योन्युदरौ अ
कारेणस्तनद्वयं॥ रेफयुग्मं पदद्वंद्वं तकारं भाललोचनम्॥ भुज
वेदस्वरूपं च नादयुग्ममुदाहृतं॥ कूर्च्चं प्राणा एकजटायाः शरी
रं सर्व्वमिष्यते॥ कूर्च्चं मुखं तु विज्ञेयमन्यमन्त्रेषु पार्वति॥ महो
ग्रायाः प्रणवो मुखं॥ अन्यमन्त्रेषु प्रणवरहितमन्त्रेषु॥ एकजटा
याः कूर्च्चं मुखं तेन तत्तन्मंत्रघटकीभूततत्तद्वर्णो स्तन्मुखना
सिकादन्तावलिहस्तपादस्तनयावदवयवावच्छिन्नशरीरज्ञा
नविषयीकृत्य जपेदित्यर्थः॥ कामधेनुतन्त्रे॥ अथान्यत्संप्रव
क्ष्यामि कामिनीतत्वमद्भुतं॥ शृणु तत्त्वं महेशानि ककारस्यातिदु
र्लभं॥ रहस्यं परमाश्चर्य्यं त्रिकोणानाञ्च संशृणु॥ वामरेखा भवेद्
ब्रह्मा विष्णुर्दक्षिणरेखिका॥ अधोरेखा भवेद्रुद्रो मात्रा साक्षात्
सरस्वती॥ अंकुशा कुंडली या तु कोटिविद्युल्लताकृति॥ कुंडली
अंकुशाकारा मध्यशून्यं सदाशिवः॥ जवायावकसंकाशा वाम
रेखा वरानने॥ शरच्चंद्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्॥ अ
धोरेखा भवेद्रुद्रो महामरकतद्युतिः॥ शंखकुंडसमाभाषा मा
त्रा साक्षात्सरस्वती॥ अंकुशा दक्षरेखा च कोटिविद्युल्लताकृ
तिः॥ कोटिचंद्रप्रतीकाशं मध्यशून्यं सदाशिवं॥ अंकुशा कुंडली या
तु पराशक्तिश्च मूर्त्तिमान्॥ शून्येषु परमेशानि सर्व्वव्यापी सदाशिवः
ईश्वरो यन्तु देवेशि कलाचतुष्टमात्मकं॥ इच्छाशक्तिर्भवेद्ब्रह्मा विष्णु
श्च ज्ञानशक्तिमान्॥ क्रियाशक्तिर्भवेद्रुद्रः सर्व्वे प्रकृतिमूर्त्तिमान्
आत्मविद्याशिवैस्तत्वैः सदाशिवः प्रतिष्ठितः॥ शून्येषु संस्थिता का
ली कैवल्यपददायिनी॥ मूर्द्धिनी संस्थिता तस्य दक्षभागे च मूर्त्ति
मान्॥ वामभागे स्थिता लक्ष्मीश्चतुर्वर्गप्रदायिनी॥ तेषां गर्भे स्थि
ता देवि सुन्दरी परदेवता॥ त्रयाणां गर्भसम्भूता त्रिपुरा अतएव हि

परमात्मस्वरूपत्वात्तासांगर्भेप्रतिष्ठिता॥ अन्याश्चप्रभवत्सर्वाः कालिकाद्याचपार्व्वति॥ अत्रस्थित्वासृजेद्ब्रह्माविष्णुःपालनतत्परः॥ रुद्रःसंहारकर्त्ताचईश्वरस्तुसदाशिवः॥ ईश्वरोऽपन्तुदेवेशित्रिकोणेतस्यसंस्थितिः॥ त्रिकोणमेतत्कथितंयोनिमंडलमुत्तमं॥ ककाराज्जायतेदेविसर्व्वेचवरवर्णिनी॥ ककारात्सर्वमुत्पन्नंकामंकैवल्यमेवच॥ अर्थवज्जायतेदेवितथाधर्म्मवदन्यथा॥ सर्वेषांदेवतानांचककारंमूलमेवच॥ आसनंत्रिपुरादेव्याःककारंपंचदैवतं॥ ककारात्कामदाकामरूपिणीस्फुरदव्ययः॥ मातासासर्वदेवानांकैवल्यपददायिनी॥ कैवल्यंप्रददेयस्मात्कामिनीसाप्रकीर्त्तिता॥ जवायावकसिन्दूरसदृशींकामिनींपरां॥ चतुर्भुजांत्रिनेत्रांचबाहुवल्लीविराजितां॥ कदम्बकोरकाकारस्तनद्वयविभूषितां॥ शंखकंकणकेयूरअङ्गदैरुपशोभितां॥ रत्नहारैःपुष्पहारैःशोभितांपरमेश्वरीं॥ एवंहिकामिनींध्यात्वाककारंदशधाजपेत्॥ प्रफुल्लञ्चततोजप्त्वाजपस्यफलभाग्भवेत्॥ एतत्तेकथितंदेविककारतत्त्वमुत्तमं॥ एतत्तुकालीबीजंहिप्रफुल्लंशृणुसुन्दरि॥ पृथ्वीबीजंततोभूत्वावामाक्षिसंयुतंयदि॥ विन्दुद्वैसंयुतोभूत्वाप्रफुल्लंभवतिप्रिये॥ लकारःपृथिवीसाक्षात्सर्वरत्नप्रदायिनी॥ पीतांगींपीतवसनांपीतविद्युल्लताकृतिं॥ सुखप्रसन्नवदनांरत्नकुंडलमण्डितां॥ एवंहिसंस्मरेद्बीजंतदूर्द्ध्वेकामिनींपरां॥ लकारसंयुतंकृत्वाप्रफुल्लंभावयेत्प्रिये॥ मर्द्दिनीयामहेशानिसावमोपरमेश्वरी॥ प्रतप्तकांचनाभासादशबाहुसमन्विता॥ त्रिभंगललिताकाराजटाजूटविभूषितां॥ त्रिलोचनांचंद्ररेखांमहिषासुरमर्द्दिनीं॥ सिंहासनगतांदेविभावयेद्वैष्णवोत्तमः॥ वहुरूपमयींदेवींककारःकामिनींपरां॥ शुक्लवर्णारक्तवर्णापीतचम्पकहासिनी॥ हरिद्वर्णाकृष्णवर्णानानाचित्रस्वरूपिणी॥ उत्पत्तेःकारणंभूमिर्देवानाञ्चैवपार्वति बीजमेतन्महागुह्यंविष्णोर्जन्मस्थलंसदा॥ तदूर्द्ध्वेनादरूपंचयोनिरूपांसनातनीं॥ प्रतप्तकाञ्चनप्रख्यांत्रिकोणांशशिशेखरां॥ शृंगाररससन्दोहैःपूजितांपरमेश्वरीं॥ तदूर्द्ध्वेभावयेद्बिन्दुंशिवशक्ति

मयंसदा॥ शून्यरूपंशिवंसाक्षाद्विन्दुंपरमकुण्डलीं॥ शून्यभागफ
लाप्युक्तंविन्दुञ्चमोक्षमव्ययं॥ सार्द्धत्रिवलयाकारंकोटिविद्युत्स
मप्रभं॥ सर्पाकारंशिवंवेष्ट्यतत्रतेसंस्थितंसदा॥ एवंहिसंस्मरेद्ध
त्त्याबीजशक्तिंसमाश्रयेत्॥ वीजात्तुजायतेब्रह्माज्ञानात्मापरमे
श्वरः॥ शब्दब्रह्ममयोभूत्वाईश्वरःकार्य्यकारणः॥ कृष्णस्यचंच
लापाङ्गिमातासाकामिनीपरा॥ वीजात्तुअङ्कुरेजातेबीजंनिष्फ
लत्तांव्रजेत्॥ एतद्वीजंवरारोहेसदासारमयंविभुं॥ लकारसंयुतो
भूत्वाशक्तिराविरभूत्स्वयं॥ जन्मकर्म्माणिसर्व्वाणिब्रह्मणोनास्ति
भाविनि॥ जपेध्यानेचपूजायांप्रकृतिःसुप्रतिष्ठिता॥ ककारस्योर्द्ध
कोणेषुप्राणोवायुःप्रतिष्ठितः॥ अपानोवामकोणेषुसंस्थितश्चस
दाप्रिये॥ समानोदक्षिणेकोणेशुद्धस्फटिकसन्निभः॥ उदानोऽङ्कु
शाकारोमात्रायांव्यानएवच॥ एतत्तेकथितंदेविककारतत्त्वम
द्भुतं॥ नवतत्त्वंककारस्यज्ञात्वायःकुरुतेजपं॥ तज्जपंचंचलापा
ङ्गिजपमेवनसंशयः॥ एतत्तत्त्वमविज्ञायप्रजपेद्यदिकोटिधा॥
तज्जपञ्चवरारोहेसदाआवर्त्तनेभवेत्॥ देवतत्त्वंप्राणतत्त्वंवि
न्दुतत्त्वञ्चसुन्दरि॥ ज्ञानतत्त्वंशक्तितत्त्वंयोनितत्त्वंतथैवहि॥
अङ्गतत्त्वंरूपतत्त्वंगर्भतत्त्वंवरानने॥ नवतत्त्वमिदंप्रोक्तंकाम
धेनुमतंप्रिये॥ कीलितंनहिदेवेशिविद्यावामन्त्रमेववा॥ नस
प्तंपरमेशानिनविङ्गवरवर्णिनि॥ सर्व्वेषांजङ्गमादीनांस्थाव
राणांचयोगिनि॥ देवतामातृकामायास्थितिस्थित्यन्तकारिणी
॥ एकाक्षरविहीनत्वाद्ब्रह्महत्यावरानने॥ कस्यस्याद्दशगादेवि
हृदयेभावयेत्प्रिये॥ भावनादक्षरश्रेण्याब्रह्मसाक्षान्नसंशयः॥
अक्षरेदूषणंनास्तिसत्त्वादिकमलानने॥ दूषणंयत्कृतंदेविहृदये
भावयप्रिये॥ रक्षार्थंसुरगणानाञ्चआत्मनागोपनायच॥ मान
वाःपरमेशानिदराकाःक्षुद्रबुद्धयः॥ मानवस्यचरक्षार्थंरक्षार्थं
पन्नगस्यच॥ अतएवमहेशानिआसुराःक्षयमागताः॥ नक
दाचिन्महेशानिविद्यामंत्रौचकीलितौ॥ नसप्तंचतथाविद्धिकी
लितंनहिकामिनि॥ संदेहंत्यजचार्व्वङ्गिसप्तादिषुवरानने॥ न

स्मात्सर्वप्रयत्नेनजपंकुरुवरानने॥ यामले॥ देवतायाः शरीरा
णिबीजादुत्पद्यतेध्रुवं॥ भूतशुद्धौ॥ ध्यानेनपरमेशानिपद्रूपंस
मुपस्थितं॥ तदेवपरमेशानिमन्त्रार्थंविद्धिपार्व्वति॥ मंत्रस्थान
माह तंत्रे॥ स्थानस्थावरदामंत्राध्यानस्थाश्चफलप्रदाः॥ ध्या
नस्थानविनिर्मुक्ताःसुसिद्धाअपिवैरिणः॥ मंत्रघटकीभूतस्वर
व्यञ्जनभेदेनवर्णचिंतनमेवध्यानमित्यर्थः॥ मन्त्रस्थानं प्रवक्ष्या
मिशृणुदेविवरानने॥ सकलंनिष्कलंसूक्ष्मंतथासकलनिष्कल
म्॥ कलाभिन्नंकलातीतंषोढामंत्रंशिरोऽब्रवीत्॥ सकलंब्रह्मरन्ध्र
स्थंतदधोविद्धिनिष्कलं॥ मानसंसूक्ष्ममात्मानंहृदिस्थंसकलनिष्क
लम्॥ बिन्दुस्थितंकलाभिन्नंकलातीतंततऊर्द्ध्वतः॥ कलाकुण्डलि
नीसेवनाट्शक्तिशिवोदिवा॥ षट्सुस्थानस्थितामन्त्राःस्थानस्था
परिकीर्त्तिताः॥ भूतशुद्धौ॥ चैतन्यरहितंमन्त्रंयोजयेत्सचपाप
कृत्॥ मन्त्राश्चैतन्यसहिताःसर्व्वसिद्धिकराःस्मृताः॥ चैतन्यंसर्व्व
मन्त्राणांशृणुष्वकमलानने॥ सहस्रारंशिवपुरंकल्पवृक्षमनो
हरं॥ चतुःशाखचतुर्द्दलंनित्यपुष्पफलान्वितं॥ पीतंरक्तंतथाश्वे
तंकृष्णञ्चहरितन्तथा॥ भ्रमरैःकोकिलैर्द्देविबहुपुष्पोपशोभितं
॥ एवंकल्पद्रुमध्यात्वातदधोरत्नवेदिकां॥ तत्रोपरिमहेशानिपर्य
ङ्कंसुमनोहरं॥ नानापुष्पसंयुतेनरचितंहेममालया॥ तत्रोपरिम
हादेवंमहाकुंडलिनीयुतं॥ एवंभाव्यजपेन्मन्त्रंध्यात्वादेवींत्रि
वर्गदां॥ आनन्दाश्रूणिपुलकोदेहावेशःसुरेश्वरि॥ सकृदुच्चरिते
ऽप्येवंमन्त्रेचैतन्यसंयुते॥ इत्येतत्कथितंदेविमन्त्रचैतन्यमुत्तमं
विष्णुमंत्रेतथाशैवेशक्तिमंत्रेसुरेश्वरि॥ मंत्रार्थंमंत्रचैतन्यंयत्नतः
समुपाचरेत्॥ योनिमुद्रामाह मंत्रमुक्तावल्यां॥ उपविश्यासनेमं
त्रीप्राङ्मुखोवाउदङ्मुखः॥ षट्चक्रंचिंतयेद्देविप्राणायामपुरःस
रं॥ चतुर्द्दलंस्यादाधारंस्वाधिष्ठानन्तुषड्दलं॥ नाभौदशदलंपद्मं
सूर्य्यसंख्यदलंहृदि॥ कण्ठेस्यात्षोडशदलंभ्रूमध्येद्विदलंतथा॥
सहस्रदलमाख्यातंब्रह्मरंध्रेमहापथे॥ आधारेकंदमध्यस्थंत्रि
कोणमतिसुन्दरं॥ त्रिकोणमध्येदेवेशिकामबीजंसुलक्षणम्॥

कामवीजोद्भवंतत्र स्वयंभूलिंगमुत्तमं ॥ तस्योपरि पुनर्ध्यात्वा चित्क
लांहंसमाश्रितां ॥ ध्यायेत्कुंडलिनीं देवीं स्वयंभूलिंगवेष्टितां ॥ चित्क
लायां कुंडलिनीं तेजोरूपां जगन्मयीं ॥ आधारादीनि पद्मानि भित्वा
तेजःस्वरूपिणीं ॥ हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत्सुधीः ॥ सदाशिवे
न देवेशि क्षणमात्रं रमेत्प्रिये ॥ अमृतं जायते देवि तत्क्षणात्परमेश्व
रि ॥ तत्तद्भवामृतं देवि लाक्षारससमोपमं ॥ तेनामृतेन देवेशि तर्प
येत्परदेवतां ॥ षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया ॥ आनयेत्ते
नमार्गेण मूलाधारं पुनः सुधीः ॥ ततस्तु परमेशानि अक्षमालां विचिं
तयेत् ॥ चित्रिणीविषतन्त्वाभा ब्रह्मनाडीगतांतरा ॥ तयासंग्रथिता ध्येया
साक्षाज्ज्ञाग्रत्स्वरूपिणी ॥ अनुलोमविलोमेन मंत्रवर्णविभेदतः ॥ मंत्रेणा
न्तरितान्वर्णान् वर्णानांतरितंमनुं ॥ कुर्य्याद्वर्णमयीं मालां सर्वमंत्र
प्रकाशिनीं ॥ चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ॥ सबिन्दुं वर्णमु
च्चार्य पश्चान्मंत्रं जपेत्सुधीः ॥ अष्टोत्तरशतं मूलमन्त्रं ज्ञानेन संजपेत्
॥ वर्गाणामष्टवर्णेन अष्टवारं जपेत्सुधीः ॥ अकचटतपयशाद्यैस्त्येव
श्चाष्टवर्गकाः ॥ योनिमुद्रां महेशानि तव स्नेहात् प्रकाशिता ॥ मंत्रार्थं
मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ॥ शतकोटिजपे नापि तस्य सिद्धि
र्न जायते ॥ इति योनिमुद्रा ॥ मंत्रशिखामाह यामले ॥ शृणु देवि प्रव
क्ष्यामि सर्वज्ञानोत्तमोत्तमं ॥ येन विज्ञानमात्रेण क्षिप्रं विद्या प्रसीद
ति ॥ मूलकन्दे तथा देवि भुजगाकाररूपिणी ॥ मंत्रमावर्त्तमानोयः
प्राण इत्युच्यते बुधैः ॥ मंजीराव्यक्तमधुराः कूजन्ती सततोत्थि
ता ॥ गच्छन्ति ब्रह्मरंध्रेण प्रविशन्ति स्वकेतनं ॥ यातायातक्रमेणैव
तत्र कुर्य्यान्मनोदयं ॥ तेन मंत्रशिखा जाता सर्वमंत्रप्रदीपिका ॥ त
मः पूर्णगृहे तत्र न किञ्चित् प्रतिभावयेत् ॥ शिखाहीनास्तथा मंत्रा
न सिद्ध्यन्ति कदाचन ॥ शिखोपदेशः सर्वत्र गोपितः परमेश्वरि ॥ वि
नायेन न सिद्धिः स्यात् वर्षकोटिशतैरपि ॥ तस्मात्त्वयापि गिरिजे
गोपनीयं प्रयत्नतः ॥ रुद्रयामले ॥ जातसूतकमादौ स्यादंते च मृ
तसूतकं ॥ सूतकद्वयमुक्तये मनोरादौ ब्रह्मबीजं प्रणवं दत्वा सप्त
वारं जपांते च जपेदित्यर्थः ॥ सूतकद्वयसन्त्यक्तः स मंत्रः सर्वसिद्धिदः

॥ चतुर्दशस्वरं पुण्यं दीर्घं प्रणवमुच्यते ॥ विशेषमाह तन्त्रे ॥ विप्राणां प्रणवः सेतुः क्षत्रियाणां तथैव च ॥ वैश्यानां तु फडन्तः स्यान्मायाशूद्रस्य कथ्यते ॥ भूतशुद्धौ ॥ तंत्रोक्तप्रणवं देवि विद्विजा याश्च सुंदरि ॥ प्रजपेत्सततं शूद्रो नात्र कार्या विचारणा ॥ यामले ॥ गणनाविधिमुल्लंघ्य यो जपेत् तज्जपं यतः ॥ गृह्णन्ति राक्षसास्तेन गणयेत्सर्वथा बुधः ॥ नाक्षतैर्हस्तपर्वेण धान्यैर्न न च पुष्पकैः ॥ न चन्दनैर्मृत्तिकया जपसंख्यां तु कारयेत् ॥ लाक्षा द्रवी दसिंदूरं गोमयञ्च करीषकं ॥ करीषकं विलोड्य गुटिकां कृत्वा जपसंख्यां तु कारयेत् ॥ इति शाक्तानंदतरंगिण्यां जपलक्षणादिनिर्णयनवमोल्लासः ॥ ॥ महासेतुं विना देवि यो जयेत्स तु पापभाक् ॥ आदौ जप्त्वा महासेतुं ततः सेतुं ततो मनुं ॥ एवं क्रमैर्वरारोहे यथेष्टं जपमाचरेत् ॥ सेतुर्मंगलतंत्रे ॥ यो जपेत्परमेशानि विना सेतुं महामनुं ॥ तस्य सर्वार्थहानिः स्यान्मृते च नरकं व्रजेत् ॥ यामले ॥ महासेतुश्च देवेशि सुन्दर्या भुवनेश्वरी ॥ कालिकायाः स्वबीजन्तु तारायाः कूर्च उच्यते ॥ अन्येषां तु वधूबीजं महासेतुर्वरानने ॥ वधूबीजमाह रुद्रयामले ॥ आकाशाद्यं चतुर्थाद्यं यकारान्तं सबिंदुकं ॥ लक्ष्मीयुक्तञ्च देवेशि वधूबीजमुदाहृतं ॥ आकाशाद्यं सकारः चतुर्थाद्यं तकारः यकारांतं रेफं ॥ एतत्त्रितयं युक्तं च ततो लक्ष्मीयुक्तं तेन स्त्रीं इति ॥ महासेतुं विना देवि न जप्तव्यं कदाचन ॥ शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥ सेतुमंत्रं महेशानि सर्वेषां कुल्लुकां शृणु ॥ सेतुर्विद्यान्महेशानि साक्षाद्ब्रह्मस्वरूपिणीं ॥ आदावंते च देवेशि सेतुं दत्वा जपेन्मनुं ॥ ततः सिद्धो भवेद्देवि मंत्रो विद्याविशेषतः ॥ अन्यथा विफलं देवि निश्चयं वचनं मम ॥ पार्श्वयोः सेतुमादाय जपकर्म समाचरेत् ॥ निःसेतुश्च यथा तोयं क्षणान्निम्नं प्रसर्पति ॥ यामले ॥ शृणु देवि प्रवक्ष्यामि सुन्दर्याः सेतुमुत्तमम् ॥ मायाबीजं समुद्धृत्य सौभाग्यं च ततः परं ॥ पुनर्मायां समुद्धृत्य विद्यैत्र्यक्षरी परा ॥ सुन्दरीविषये सेतुं कथितं परमेश्वरि ॥ मंत्रं यथा ह्रीं सौः ह्रीं ॥ अथ वक्ष्ये महेशानि भैरव्याः सेतुमुत्तमं ॥ हरप्रियां समुद्धृत्य सुरसारं ततः परं ॥ औदर्घ्यसंयुतं कृत्वा विन्दुद्वैसंपुतं कुरु ॥

इयंविद्यावरारोहेभैरव्याःसेतुरूपिणी॥ हेसौं॥ प्रणवंपूर्वमुद्धृत्यहृ
ल्लेखांतदनन्तरं॥ एषाचत्र्यक्षरीविद्यातारायाःसेतुरुच्यते॥ मंत्रंय
था॥ ॐ ह्रीं श्यामायाः॥ ऐश्वर्य्यबीजमुद्धृत्यविन्दुद्वंसंयुतंकुरु॥ कू
र्च्चबीजंततोदेविपुनरैश्वर्य्यमुद्धरेत्॥ सेतुरेषामहेशानिश्यामायाः
परिकीर्त्तिता॥ ऐंक्रूंक्रीं भुवनेश्याः॥ प्रणवं प्रथमंदेविहृल्लेखाद्वितय
न्ततः॥ ततश्चपरमेशानिप्रणवद्वयमुच्यते॥ एषाविद्यामहेशानि
भुवनेश्याःसेतुरुच्यते॥ मंत्रंयथा॥ ॐ ह्रींह्रींॐॐ॥ अथवस्ये
महेशानिह्रींवन्हिजायांसमुद्धरेत्॥ मंत्रंयथा॥ ह्रींस्वाहा॥ अन्ये
षुदेविदेवेषुप्रणवंसेतुरूपिणं॥ सर्वेषांशूद्रजातीनामोंकारंसेतुरु
च्यते॥ अथकवचसेतुनिरूपणं॥ यत्रयत्रविनिर्दिष्टंसेतुमंत्रंशुचि
स्मिते॥ तन्मंत्रंत्रिगुणंकृत्वासेतुमंत्रंकुरुप्रिये॥ कवचस्यमहेशा
निसेतुर्भवतिसुन्दरि॥ सेतुंविनामहेशानिकवचंयःपठेन्नरः॥ सभ
स्मो जायतेदेवियोगिनीनांशुचिस्मिते॥ वैष्णवेगाणपत्येचशैवेशा
क्तेशुचिस्मिते॥ आदावंतेचसेतुं दत्वासुकवचंपठेत्॥ रुद्रयामले
॥ अज्ञात्वाकुल्लुकांदेविमहामंत्रंजपेत्तुयः॥ तस्यनश्यंतिचत्वारिआ
युर्विद्यायशोबलं॥ वाराहीतंत्रे॥ जपंसमारभेन्मन्त्रीकुल्लुकांचयथा
विधिः॥ जपपूजांसमाप्यैवंस्तुत्वाचकवचंपठेत्॥ विशुद्धेश्वरतंत्रे॥
कुल्लुकांमूर्ध्निसंजप्यहृदिसेतुंविचिंतयेत्॥ महासेतुंविशुद्धौतुषोड
शारंसमुद्धरेत्॥ मूलाधारेकामवीजंनिर्वाणंमणिपूरके॥ जपादौ
चमहासेतुंजपांतेचतथाकृतं॥ निर्वाणमंत्रोयथा॥ अंआंइंईंउंऊं
ऋंॠंऌंॡंएंऐंओंऔंअंअः॥ कंखंगंघंङंचंछंजंझंञं। टंठंडंढंणं।
तंथंदंधंनं। पंफंबंभंमंयंरंलंवंशंषंसंहंक्षंहूंह्रींश्रीं इत्येभिर्वर्णैर्मंत्रं
संपुटीकृत्यसर्व्ववर्णस्यतेजएकीकृत्यसुषुम्नावर्त्मनासहस्रारदले
नीत्वातन्मंत्रंप्रणवंजपेत्॥ ततोजपःपुनस्तथेति॥ तारायाःकुल्लु
कादेविमहानीलसरस्वती॥ पंचाक्षरीकालिकायाःकुल्लुकापरिकीर्त्ति
ता॥ कालीकूर्च्चवधूमायाफडंतापरमेश्वरि॥ छिन्नायास्तुमहेशा
निकुल्लुकाष्टाक्षरीभवेत्॥ वज्रवैरोचनीयेचअंतेवर्म्मप्रकीर्त्तयेत्
प्रसादबीजंशम्भोस्तुमञ्जुघोषंषडक्षरं॥ भुवनेश्याश्चह्रींबीजं

विष्णोर्वैचाष्टवर्णिका॥ नमोनारायणायेतिप्रणवाद्यान्चकुल्लुका॥ वर्मबीजंतुभैरव्याः कुल्लुकापरिकीर्त्तिता॥ श्रीमत्त्रिपुरसुन्दर्य्याः कुल्लुकाद्वादशाक्षरी॥ वाग्भवंप्रथमंबीजंकामबीजमनन्तरं॥ लज्जाबीजंततःपश्चात्त्रिपुरेतिततःपरं॥ भगवतीतिपदंदद्यादन्तेचहृदयमुद्धरेत्॥ लज्जाबीजंक्रोधबीजंफडन्तञ्चसमुद्धरेत्॥ अथमत्कामबीजाख्याकुल्लुकापरिकीर्त्तिता॥ सरस्वत्यावाग्भवञ्च अन्नदाया अनङ्गकं॥ अपराणांचदेवानांमंत्रमेततत्प्रकीर्त्तितं॥ इत्येतत्कथितंदेविसंक्षेपात्कुल्लुकामया॥ सेतुमंगलतंत्रेपि॥ वाग्भवंपूर्वमुद्धृत्य मन्मथंतदनन्तरं॥ भृगुबीजंसमुद्धृत्य अनुस्वारंयुतंकुरु॥ सुंदरीविषयेबोध्यंकुल्लुकेयंमहेश्वरि॥ मंत्रंयथा॥ ऐं क्लीं सौं ॥ कामधेनुंसमुद्धृत्यलोकवंद्यांततःपरं॥ वामनीयकबीजंतुपुनरुद्धृत्यसुन्दरि॥ इतिबीजयुतंकृत्वाविन्दुद्वंद्वसंपुतंकुरु॥ कुल्लुकेयंमहाविद्याभैरव्याः परिकीर्त्तिता॥ क्रीं नीं तारायाः॥ मायाबीजंसमुद्धृत्यततश्चप्रणवद्वयं॥ पुनर्मायांसमुद्धृत्यकुल्लुकाजपमाचरेत्॥ कुल्लुकाजपमात्रेण सर्वसिद्धीश्वरोभवेत्॥ मंत्रंयथा॥ ह्रीं ॐ ॐ ह्रीं॥ पंचाक्षरीकालिकायाःकुल्लुकापरिकीर्त्तिता॥ कालीकूर्च्चवधूमायाफडंतापरमेश्वरि॥ मंत्रंयथा॥ क्रीं हूं स्त्रीं ह्रीं फट् स्वाहा॥ अथभूवनेश्याः॥ कालकूटप्रशमनीबीजमुद्धृत्यसुन्दरि॥ वामनीयकबीजेनसंयुतंकुरुसुंदरि॥ बिन्द्वन्तसंपुतंकृत्वात्रिगुणंकुरुसुंदरि॥ एषाविद्यामहेशानि कुल्लुकाविष्णुपूजिता॥ मंत्रंयथा॥ ह्रीं ॐ ह्रीं॥ आद्यन्तेपरमेशानि कूर्च्चबिजद्वयंकुरु॥ तदाभवतिविद्येयंमर्दिन्याकुल्लुकाप्रिये आद्यन्ते ॐ क्रूं ह्रीं स्वाहा। ॐ आद्यंतेइत्यर्थः॥ तेनक्रूं ॐ ह्रीं स्वाहा ॐ क्रूं॥ पशुभावेस्थितामंत्राः केवलंवर्णरूपिणः॥ एवंकृते महेशानिमंत्रेवीरमतंस्मृतं॥ अन्यथापशुवद्देविनजपेत्तुकदाचन ॥ ॥ इतिशाक्तानंदतरङ्गिण्यांसेतुमहासेतुकुल्लुकानियमोदशमोल्लासः॥ ॥ मुखशोधनमाह॥ सारस्वततंत्रे॥ अथवक्ष्येमहेशानि मुखशोधनमुत्तमं॥ यत्कृत्वावरारोहेजपपूजावृथाभवेत्॥ दशधाप्रजपित्वावैजिह्वाशोधनमाचरेत्॥ महात्रिपुरसुंदर्याबीज

षोडशीविद्याप्राइति॥ त्रिपुरायामहेशानिमुखस्यशोधनंशृणु॥
श्रीं ॐ श्रीं ॐ श्रीं ॐ॥ इतिषडक्षरंमंत्रंसुंदर्य्यादशधाजपेत्॥ बाला
याःशृणुचार्व्वङ्गिमुखशोधनमुत्तमं॥ ऐं ह्रीं ऐं॥ महाविद्याजिह्वाशो
धनमुत्तमं॥ त्रिपुरायाःप्रवक्ष्यामिमुखशोधनमुत्तमं॥ श्रीं ॐ श्रीं
ॐ॥ महेशानि श्रीं ॐ वैपरमेश्वरि॥ एषाषडक्षरीविद्याजिह्वाग्रेः
मृतवर्षिणी॥ भैरव्याःशृणुचार्व्वंगिमुखशोधनमुत्तमं॥ ॐ हसौं
ॐ इमंत्र्यक्षरंमंत्रंदशधाप्रथमंजपेत्॥ शृणुसुंदरिश्यामायाःमुख
शोधनमुत्तमं॥ क्रीं क्रीं क्रीं ॐ ॐ ॐ क्रीं क्रीं क्रीं॥ एषानवाक्षरीविद्या
जिह्वाशोधनकारिणी॥ तारायाःशृणुचार्व्वंगिमुखशोधनमुत्तमं
॥ ह्रीं ह्रीं ह्रीं॥ त्र्यक्षरीविद्याजिह्वाग्रेःमृतवर्षिणी॥ भुवनेश्याःशृणु
चार्व्वङ्गिमुखशोधनमुत्तमं॥ ऐं ॐ। द्व्यक्षरीयंसमाख्यातालीला
सुखविलासिनी॥ दशधाप्रजपित्वावैभुवनेशींजपेत्सुधीः॥ अपरे
कंप्रवक्ष्यामिबगलामुखशोधनं॥ ऐं ह्रीं ऐं॥ एषातुत्र्यक्षरीविद्यास
दामृतमयीप्रिये॥ मातंगीशोधनंदेवीकथयामिवरानने॥ क्रौं ऐं क्रैं
त्र्यक्षरीयंसमाख्यातामुखशोधनदुर्लभा॥ अपरैकंप्रवक्ष्यामिसिं
हवाहिनीशोधनं॥ ऐं ह्रीं ऐं दुर्गायैस्वाहाह्रीं ऐं ऐं॥ इयंदशाक्षरीवि
द्यासदाममहृदिस्थिता॥ अपरैकंप्रवक्ष्यामिनवधामुखशोधनं॥
ॐ श्रीं द्व्यक्षरीविद्याधनदायाःप्रकीर्त्तिता॥ ॐ धूं ॐ॥ इयंतुत्र्यक्षरी
विद्याधूमावत्याश्चशोधनं॥ अन्येषुसर्व्वदेवेषुदेवीषुचवरानने॥
दशधाप्रणवञ्चोक्त्वा मुखशोधनमाचरेत्॥ मुखशोधनमात्रेणजि
ह्वामृतमयीभवेत्॥ अन्यथामूत्रविड्युक्ताजिह्वाभवतिसर्वदा॥
भक्षणैर्दूषिताजिह्वामिथ्यावाक्येनदूषिता॥ कलहैर्दूषिताजिह्वा
नानादोषेणदूषिता॥ तत्कथंपामरोलोकोजिह्वायांप्रजपेन्मनुं॥ सं
शोधनमनाचार्य्यनजपेत्सनरः क्वचित्॥ शाक्तोवावैष्णवोवापिग
णेशःसौरएववा॥ शैवोवानान्यभक्तोवाकारयेन्मुखशोधनं॥ देवोय
दिजपेन्मंत्रंमोहेनयदिभाविनि॥ सर्वंतस्यवृथादेविजपसिद्धिर्नजाय
ते॥ तस्मात्प्रयत्नतोदेविजिह्वाशोधनमाचरेत्॥ अन्यथाप्रजपेन्मंत्रं
अकृत्वामुखशोधनं॥ पतनंतस्यदेवेशि योजपेत्सचपापभाक्॥

तस्मात्सप्रयत्नतो देवि जिह्वाशोधनमाचरेत्॥ इति सारस्वततंत्रोक्त जिह्वाशोधनं॥ पूजाकाले महेशानि यदि निद्रातुरो मनुः॥ तत्कथं सिध्यते मंत्रः किं कर्त्तव्यं तदा प्रभो॥ प्रजपेत्केन विधिना तज्जपेह्यवद प्रभो॥ निद्रा पार्श्वे वदेवेशि लक्षणं वद मे प्रभो॥ ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि॥ इडायां च गते वायौ शक्तिमंत्रं जपेत्प्रिये॥ रात्रौ जपेकमात्रेण चंडिका वरदा भवेत्॥ पिंगलायां गते वायौ विद्या निद्रातुरो भवेत्॥ इडायां च गते वायौ तदा निद्रातुरो मनुः॥ एषा ते कथिता देवि निद्रायाः लक्षणं प्रिये॥ प्रजपेद्यदि निद्रायां किं तस्य जपपूजने॥ सर्वं तस्य वृथा देवि अरण्ये रोदितं यथा॥ रहस्येन च वाव्हिः स्यक्त निद्रा सनातनी॥ आदौ कामकलाबीजं स्वमस्तान्ते तु तं जपेत्॥ प्रायश्चित्तमिदं देवि कृत्वा मंत्रं जपेद्यदि॥ किन्तस्य दक्षिणवायुस्तस्य निद्रातुरे पार्कि॥ विश्वसारे॥ मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः स्मृताः॥ पुंमंत्रा हूं फडंताः स्युर्द्विठंताः स्युस्त्रियो मताः॥ नपुंसका नमोन्ताः स्युरित्युक्ता मनवस्त्रिधा॥ दीपिनीमाह तंत्रे॥ योनिमंत्रं मनोदत्वा चायंते परमेश्वरि॥ सप्तवारं जपित्वा च दीपनी यं प्रकीर्त्तिता॥ योनिमंत्रं ईकारं॥ तन्त्रे॥ योनिमंत्रेण वयवं सकलं तु विभावयेत्॥ स्वकीयात्मानं कामकलां विभाव्य जपपूजादिकं कार्य्यं॥ ध्यात्वा कामकलां देहे विद्याजापं समाचरेत्॥ कामं कामकलारूपं आत्मानं चिंतयेत्सदा॥ तंत्रे॥ ऊर्द्ध्वं विंद्वात्मकं वक्त्रमधोविन्दुस्तनद्वयं॥ ईकारार्द्धं कामपुरं स्वमात्मानं विचिंतयेत्॥ एतत्कामकलाध्यानं गुह्याद्गुह्यतरं महत्॥ नाशिष्याय प्रवक्तव्यं नाभक्ताय कदाचन॥ लोभान्मोहाच्च देवेशि यत्र कुत्र प्रकाशयेत्॥ सोचिरान्मृत्युमाप्नोति शस्त्रघातरिवारिभिः॥ योनिमंत्रमाह यामले॥ तूर्य्यस्वरं बिन्दुयुक्तं नादेन परिभूषितं॥ कामकलामहामंत्रं महाकालेन कीर्त्तितं॥ तस्मात्स्वकीयमात्मानं देवीरूपं च भावयेत्॥ ॥ इति शाक्तानंदतरङ्गिण्यां मुखशोधननिर्णय एकादशोल्लासः॥ ॥ अथ पुरश्चरणं॥ पुरश्चरणलक्षणमाह॥ माहेश्वरे॥ जपहोमौ तर्पणं च सेको ब्राह्मणभोजनम्॥ पंचाङ्गोपासनं लोके पुरश्चरणमुच्यते। यामले। पंचांगोपासनं लोके शाक्तवैष्णवभेदतः॥ जीवहीनो यथा देही सर्वकर्मसु न क्षमः॥ पुर

श्चरणहीनोपि तथा मंत्रः प्रकीर्त्तितः ॥ रुद्रयामले ॥ पुरश्चरणसंपन्नो मंत्रो
हि फलदायकः ॥ अतः पुरस्क्रियां कुर्यान्मंत्रवित् काङ्क्षसिद्धये ॥ किं
होमैः किं जपैश्चैव किं मंत्रन्यासविस्तरैः ॥ रहस्यानां च मंत्राणां यदि न
स्यात्पुरस्क्रिया ॥ पुरस्क्रिया हि मंत्राणां प्रधानं जीवमुच्यते ॥ पुरश्चरण
पूर्वदिनकृत्यं ॥ हविष्येनैव भोक्तव्यं कृत्वा देहविशोधनं ॥ प्रातः स्नात्वा
थ सावित्र्या जपेत् पंच सहस्रकं ॥ त्रिसहस्रं सहस्रं वा जपेदष्टोत्तरं
शुचिः ॥ ज्ञानाज्ञानस्य पापस्य क्षयार्थं प्रथमं ततः ॥ विप्रान् संतर्पयेद
न्नभोजनाच्छादनासनैः ॥ वैशंपायनसंहितायां ॥ आदावमुकमंत्र
स्य पुरश्चरणसिद्धये ॥ ममेयं गृह्यते भूमिर्मंत्रो मे सिध्यतामिति ॥ भू
मेः परिग्रहं कृत्वा परिमाणं च सर्वशः ॥ ग्रामं क्रोशमितं स्थानं नद्यादौ
स्वेच्छया मितं ॥ नगरादावपि क्रोशं क्रोशयुग्ममथापि वा ॥ आहारादि
विहारार्थं तावतीं भुवमाक्रमेत् ॥ दीपस्थानं समाश्रित्य वातते यमहा
कुटीं ॥ निर्माय विधिवत्कुर्य्याज्जपं तत्र शुभे दिने ॥ चंद्रतारानुकूले च
शुक्लपक्षे शुभेहनि ॥ आरभेन्मकरादौ च सुप्ते विष्णौ जपेन्न च ॥ यद्दक्षि
णायनं निषिद्धमुक्तं तद्विष्णुविषयेबोध्यम् ॥ शक्तिविषये दक्षिणाय
ने पुरश्चरणं कर्त्तव्यं ॥ तथा चोक्तं यामले ॥ शरत्काले महापूजा क्रियते
या च वार्षिकी ॥ तस्मिन्पक्षे विशेषेण पुरश्चरणतत्परः ॥ अन्यत्रापि
शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः ॥ भक्तितः पूजयित्वा तु रात्रौ
साष्टसहस्रकं ॥ एकाकी विजने देशे जपेच्च तिमिरालये ॥ अथ पुरश्च
रणदिनकृत्यं ॥ बहुभिर्वस्त्रभूषाभिः संपूज्य गुरुमात्मनः ॥ आरभेत
जपं पश्चात्तदनुज्ञापुरस्सरं ॥ प्रातः स्नात्वा महेशानि कीलानादाय
साधकः ॥ कुटीनिकटमागत्य कुर्य्यात्तंत्रोदितां क्रियां ॥ क्षीरवृक्षोद्भवा
न् कीलान् अस्त्रमंत्राभिमंत्रितान् ॥ निखनेद्दशदिग्भागे तेष्वस्त्रं च प्रपू
जयेत् ॥ क्षेत्रे तु कीलिते मंत्री न विघ्नैः परिभूयते ॥ अश्वत्थोदुम्बरप्लक्ष
वटश्च क्षीरशाखिनः ॥ क्षेत्रपालं पूजयित्वा बलिं दत्वा विधानतः ॥ दि
क्पतिभ्यो बलिं दत्वा ततः क्षेत्रं समर्च्चयेत् ॥ क्षेत्रपालमंत्रमाह तन्त्रे
॥ वर्णान्तमो बिन्दुयुक्तो क्षेत्रपालाय हृन्मनुः ॥ ताराद्यो वसुवर्णोयं क्षे
त्रपालस्य कीर्त्तितं ॥ षड्दीर्घभाजा बीजेन षडङ्गं न्यस्य योजयेत् ॥ ॥

ॐनीलांजनाद्रिनिभमूर्द्धपिशंगकेशंवृत्तोग्रलोचनमुखंतुगदाकला
पं॥आशांबरंभुजगभूषणमुग्रदंष्ट्रंक्षेत्रेशमद्भुतमहं प्रणमामिदेवं
॥इतिध्यात्वा क्षेत्रपालमावाह्य अष्टदलपद्मेपूजयेत्॥ अनलाख्यं
अग्निकेशंकरालंतदनंतरं॥घण्टावरंमहाकेशंपिशितासनमंतरं॥
पिंगलाख्यंऊर्द्ध्वकेशंपत्रेषुपरितोऽर्च्चयेत्॥ लोकपालंनदस्त्राणियथा
पूर्वंप्रपूजयेत्॥ततोमाषभक्तबलिंदद्यात्॥ मंत्रमाह शारदायां॥पूर्वं
मेहिद्वयंपश्चाद्देव्यपस्यकुरुद्वयं॥भंजयद्वितयंभूयोनर्त्तयद्वितयंपु
नः॥ततोविघ्नपदद्वन्द्वंमहाभैरवतत्परं॥क्षेत्रपालबलिंगृह्णद्वयंपावक
सुंदरी॥बलिमंत्रसमाख्यातः सर्वकामफलप्रदः॥ बद्धाञ्जलिः॥
ॐतीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम ॥भैरवायनमस्तुभ्यंअ
नुज्ञांदातुमर्हसि॥ इत्यनुज्ञांलब्ध्वाइंद्रादिदिक्पतिं पूजयित्वामा
षभक्तबलिंदद्यात्॥कुटीनिकटमागत्यसामान्यार्घ्यंविधायच॥द्वा
रपूजांविधायाथजपस्थानंविशोधयेत्॥ वीक्षणंमूलमंत्रेणशरेण
प्रोक्षणंमतं॥तेनैवताडनंदर्भैर्ब्रह्मणाभ्युक्षणंमतं॥सनत्कुमारसं
हितायां॥प्रणवंतत्सदद्येतिमासपक्षतिथावपि ॥अमुकगोत्रोमु
कोहंमूलमुच्चार्य्यततःपरं॥सिद्धिकामस्यमंत्रस्यइयत्संख्यंजप
स्ततः॥ दशांशेहरणंहोमाद्दशांशंतर्पणंततः॥दशांशंमार्जनंतस्माद्द
शांशंविप्रभोजनम्॥पुरश्चरणमेवंहिकरिष्येप्रागुदङ्मुखः॥भूतशु
द्धिंविधायादौप्राणायामंसमाचरेत्॥ऋष्यादिकंततःकृत्वाकल्पो
क्तन्यासमाचरेत्॥शनैःशनैरविस्पष्टंनद्रुतंनविलंबितं॥क्रमेणो
च्चारयेद्वर्णान्आद्यंतक्रमयोगतः॥देवतांचिन्तगांकुर्य्यात्कुर्य्याच्च
हृदयस्थिरं॥प्रातःकालात्समारभ्यघटिकादशकंक्रमात्॥कुलार्ण
वे॥यत्संख्ययासमारब्धंतज्जप्तव्यंदिनेदिने॥ न्यूनाधिकंनकर्त्तव्यं
आसमाप्तंसदाजपेत्॥न्यूनातिरिक्तकर्माणिनफलंतिकदाचन॥स्ना
नंत्रिसवनंप्रोक्तंअशक्तौद्विःसकृत्तथा॥मंत्रंसाध यमानस्तुत्रिसंध्यं
देवमर्च्चयेत्॥त्रिकालंएककालंवानमन्त्रंकेवलंजपेत्॥उपचारै
र्यथाशक्तिदेवतामन्वहंजपेत्॥ नसंजृम्भणहिक्कादि विकलीकृत
मानसः॥मन्त्रसिद्धिमवाप्नोतितस्मात्तत्परोभवेत्॥यदिदैवाज्जृंभ

णादिभवतितदाचम्यप्राणायामंषडंगन्यासंकृत्वाशेषंजपेत्॥
सूर्य्येंदृष्ट्वावा॥ यथायोगिनीहृदये॥ पतितानामन्त्यजानांदर्शनेभा
षणेकृतेक्षुतेधोवायुगमनेजृम्भणेजपमुत्सृजेत्॥ तथाचम्यच
तत्कालेप्राणायामंषडङ्गकं॥ कृत्वाचम्यजपेच्छेषंयद्वासूर्य्यादिद
र्शनं॥ शयनंदर्भशय्यायांविन्यसेद्भुविचात्मनः॥ तद्वासंक्षालये
न्नित्यंअन्यथाविघ्नमाहरेत्॥ नदिवाशयनंकुर्य्यात् कुक्कुरादीन्नसं
स्पृशेत्॥ नसेवेतस्त्रियंमांसंमधुवासाधकोत्तमः॥ एतानिसेव्यमा
नस्यनसिद्ध्यंतिपुरस्क्रियाः॥ भुञ्जानोवाहविष्यान्नंशाकञ्चविहि
तंतथा॥ क्षीराहारीफलाहारीशाकाशीवाहविष्यभुक्॥ भिक्षा
शीवाजपेद्यद्वाकृच्छ्रचान्द्रायणादिकृत्॥ आम्रआमलकंचैवफ
लंकेशरिसंभवं॥ रम्भाफलंतिन्तिडिकंनवनीनागरङ्गकं॥ फला
न्येतानिभोज्यानितदन्यानिविवर्ज्जयेत्॥ विहितशाकंयथा॥ क
लायंकालशाकञ्चवास्तूकंहिलमोचिका॥ हविष्यान्नंयथा॥ है
मंतिकंशितास्विन्नंधान्यमुद्गास्तिलायवाः॥ मूलंकेमूककेन्दु
नांवर्जयन्विहितंमुनि॥ पयोदधिफलंवापिनारिकेलंयथोचितं
॥ हविष्यन्तुतथाश्नीयात्सत्कुंयवसमुद्भवं॥ नेन्द्रियाणांयथावृद्धि
स्तथाभुंजीतसाधकः॥ गृहस्थानांवदान्यानांभिक्षाशीलोग्रजन्म
नां॥ पुरश्चरणमध्येतुयदिस्यान्मृतसूतकं॥ तथापिकृतसंकल्पो
व्रतंनैवपरित्यजेत्॥ संकल्पोक्तक्रमेणैवजपंकृत्वावरानने॥ होमये
त्तद्दशांशेनतद्दशांशेनतर्पणं तर्पणस्यदशांशेनअभिषिञ्चेज्जग
न्मयीं॥ अभिषेकेदशांशेनकुर्य्याद्ब्राह्मणभोजनं॥ गुरवेदक्षिणान्दत्वा
दीनांधकृपणानवहून्॥ ज्ञातीन्द्विजान्परंभक्त्याभोजयेच्चयथेप्सि
तान्॥ एवंकृतपुरश्चर्य्यः साधयेदिष्टमात्मनः॥ जपांतेप्रत्यहंमंत्रीहोम
येत्तद्दशांशतः॥ तर्पणंचाभिषेकञ्चकृत्वादशांशतोमुने॥ प्रत्यहंभो
जयेद्विप्रान्न्यूनाधिकप्रशान्तये॥ अथवासर्वसंपत्तौहोमादिकमथा
चरेत्॥ होमांतेदेवतायाश्चमंत्रंतोयेविचिन्तयेत्॥ अथवाहोमपात्रा
दौयंत्रंकृत्वाततःपरं॥ पूजयित्वातत्रदेवींपरिवारगणान्विताम्॥ तर्प
येत्तांपरांदेवींतत्प्रकारमिहोच्यते॥ तर्पयित्वागुरुमादौमूलदेवींचत

र्पयेत्॥मूलान्तेनामचोच्चार्य्यतर्प्पयामिततः परं॥स्वाहान्तेतर्पयेन्म
न्त्री यथासंख्यविधानतः॥तर्प्पणञ्चप्रकुर्वीतद्वितीयांतमयोच्चरन्
॥एकैकांचाञ्जलिंदत्वासंतर्प्यरश्मिवृन्दकं॥तर्प्पणद्रव्यमाह विश्वदे
श्वरे॥तर्प्पणंचंदनमत्तोयैस्तीर्थतोयैरथापुनः॥गुरूपदिष्टमार्गेणम
धुनावाथतर्पयेत्॥तंत्रान्तरे॥तीर्थतोयेनदुग्धेनसर्पिषामधुनापि
वा॥गंधोदकेनवाकुर्य्यात्सर्वत्रसाधकोत्तमः॥कालागुरुद्रवोपेतैर्व
शयेज्जगदाद्रिनां॥सचंदनेनतोयेनसौभाग्यंलभतेनरः॥तोयैःकुंकु
ममिश्रैश्चस्तम्भयेदखिलंजगत्॥सितामिश्रिततोयेनवृहस्पतिस
मोभवेत्॥ कर्पूराक्तजलेनैव आकर्षयेन्नरःसुरान्॥रोचनायुततोये
नमुच्यतेसर्वदुर्ग्रहात्॥ध्यात्वादेवींमुखेतस्यास्तर्पणञ्चसमाच
रेत्॥सर्वशाक्तेषुकथितंतर्पणंशुभदायकं॥एवञ्चतर्पणंकृत्वाभिषेकं
तद्दशांशतः॥आत्मानंदेवताबुद्ध्यासंपूज्य तन्मयःसुधीः॥मूलवि
द्यांसमुच्चार्यतदन्तेदेवताभिधां॥तदन्तेचाभिषिञ्चामिनमोऽन्तेचा
भिषेचकं॥इत्युच्चार्य्यमूर्द्धदेशेचिन्तयित्वास्वमंत्रकं॥अभिषेकंस्वी
यसंख्याविधायतदनन्तरे॥तत्रसंचिंतयेद्देवींसांगावरणदेवतां॥
क्षिपेत्तोयंयथासंख्यंगणान्सिञ्चेत्सकृत्सकृत्॥अभिषेकंसमा
प्यैवंअभिषेकदशांशतः॥ब्राह्मणान्देवताबुद्ध्याभोजयेत्साधकोत्तमः
॥यामले॥ब्राह्मणान्भोजयेद्देवितथैवचकुमारिकां॥साधकःपञ्चता
मेतिकुमारीभोजनादृते॥तत्तन्मंत्रयुतान्विप्रान् भोजयेद्देवताधिया
॥ततःसंपूजयेद्भक्त्यासंभावैर्विविधैर्गुरुं॥दक्षिणांगुरवेदद्यात्य
थाविभवविस्तरैः॥दत्वाचसाधकश्रेष्ठोमहापूजांसमाचरेत्॥सिद्ध
मंत्रोभवेन्मंत्रीनात्रकार्य्याविचारणा॥तंत्रे॥विभवस्सतियोमोहान्न
कुर्य्याद्विधिविस्तरं॥नैतत्फलमवाप्नोतिदेवद्रोहीसउच्यते॥मुंडमाला
यां॥यद्यदंगविहीयेततत्तस्यद्विगुणोजपः॥कर्त्तव्यंसांगसिद्ध्यर्थंत
दशक्तेनभक्तितः॥रुद्रयामले॥होमकर्म्मण्यशक्तानांविप्राणांद्विगु
णोजपः॥इतरेषांतुवर्णानांत्रिगुणादिःसमीरितः॥योगिनीहृदये॥
होमाशक्तौजपंकुर्य्याद्धोमस्यद्विगुणंप्रिये॥ब्राह्मणादित्रिवर्णानां
स्त्रीणांसंख्याविधीयते॥पंचवर्णमाश्रितःशूद्रोदीक्षांकुर्य्याद्यथेप्सितां॥

तस्यस्त्रीणांतुयासंख्यासासंख्यातस्यविद्यते॥शूद्रस्ययादृशीसंख्या
द्विगुणासास्त्रियाःप्रिये॥अन्यत्रापि॥शूद्रस्यविप्रभृत्यस्यतत्तत्स्त्रीस
दृशोजपः॥होमशून्यस्यविप्रस्ययोजपःसतुतत्स्त्रियाः॥इतरेषांतु
वर्णानांक्षत्रियवैश्यस्त्रिगुणचतुर्गुणसंख्याबोध्याः॥शूद्रस्यद्विगुणं
शक्तिविषयेत्येयं॥वैष्णवानां चतुर्वर्णानांतुचतुर्गुणाष्टगुणंबोध्यं॥
अन्यथाविरोधापत्तेः॥कुत्रापिद्विगुणादि कुत्रापिचतुर्गुणादिरिति
संगतिः॥तथागौतमीये॥होमाभावेजपःकार्य्यःहोमसंख्याचतुर्गु
णः॥विप्राणांक्षत्रियाणांचवसुसंख्यागुणःस्मृतः॥वैश्यानांवसुसं
ख्याकमेषांस्त्रीणामयंविधिः॥इतिवचनात्॥यामले॥यदिहोमेन
शक्तःस्यात्पूजायांतर्पणेपिवा॥तावत्संख्याजपेनैवब्राह्मणाराधने
नच॥भवेदङ्गद्वयेनैवपुरश्चरणकर्मवै॥तावत्संख्याजपेनैवस्वस्व
वर्णोक्तसंख्यजपेनैवइत्यर्थः॥यामले॥कुत्रापियदिहीनंस्याद्दश
कस्याङ्गकर्म्मणि॥तत्तद्दशैवकर्म्माणिदशशून्यंनकारयेत्॥यामले
॥लक्षमेकंजपेद्विद्यांहविष्याशीदिवाशुचिः॥ततस्तुतद्दशांशेनहो
मयेद्धविषाप्रिये॥तर्पयेत्तद्दशांशेनतीर्थतोयेनपार्वति॥देवींचाभि
षिंचेत्तोयैस्तर्पणस्यदशांशतः॥तद्दशांशंहविष्यान्नैर्भक्तितोभोज
येद्द्विजान्॥गुरवेदक्षिणान्दद्याद्यथाविभवविस्तरैः॥तथाचादि
विषये तोडलतंत्रे॥ककारंधर्म्मदंदेविईकारंचार्थदायकं॥रकारंका
मदंकान्तेमकारंमोक्षदायकं॥एकत्रोच्चारणाद्देविनिर्व्वाणमोक्ष
दायिनी॥माहात्म्यंदेवदेवेशिकिंवक्तुंशक्यतेमया॥जिह्वाकोटिस
हस्रेणवर्णितुंनैवशक्यते॥विधिवल्लक्षजापे नपुरश्चरणमुच्यते॥
कथितंमंत्रराजस्यरात्रौपुरश्चरणंशृणु॥दिवालक्षंजपेन्मंत्रंहविष्या
शीजितेन्द्रियः॥दिव्यवीरमतेदेविरात्रौलक्षंजपेत्सुधीः॥अथपं
चाक्षरस्यास्यशृणुदेविपुरस्क्रियां॥दिव्यवीरमतेनापिविंशत्येकेन
पार्वति॥तथात्र्यक्षरमंत्रंप्रजपेत्साधकाग्रणीः॥ध्यानपूजादिकं
सर्व्वंसमानंवीरवन्दिते॥एतस्यासदृशीविद्याफलदानास्तियोगिनि
॥पाशवंकथितंकल्पंशृणुवीरमतःपरं॥मुंडमालायां॥मत्स्यमांसा
शनेशक्तःकुर्य्यान्मंत्रपुरस्क्रियां॥रात्रौतांबूलपूरास्यशय्यायांच

समाहितः॥ ततस्तुतद्दशांशेन होमयेद्दविषानले॥ दशांशंतर्पये
द्देव्यैमांससमिश्रैःसुसाधकः॥ तर्पणस्यदशांशंतु अभिषिंचेज्जगन्म
यीं॥ दशांशंभोजयेद्देविसाधकंदेवताप्रियं॥ मधुमांसंचमत्स्यंच
चर्व्वणंचप्रदापयेत्॥ ततस्तुतोषयेद्भक्त्यागुरुंस्वर्णादिभिःप्रिये॥ एत
त्कल्पद्वयाद्देविमंत्रंसिद्ध्यतिनिश्चितं॥ अत्रलक्षपदंस्वस्वकल्पोक्त
संख्ययापरं॥ तथाचोक्तंकुमारीतंत्रे॥ तस्मिन्कालेसाधकेन्द्रः संक
ल्पोक्तजपंचरेत्॥ तस्मिन्कालेपुरश्चरणकाले॥ यत्तुकुमारीतंत्रे॥
लक्षमेकंजपेन्मंत्रंहविष्याशीदिवाशुचिः॥ रात्रौतांबूलपूरास्यःश
य्यायांलक्षमानतः॥ एवंलक्षद्वयंजप्त्वातद्दशांशेनमंत्रवित् इति
वचनात् स्वलक्षद्वयेनविशिष्टपुरश्चरणमिति॥ तन्नमनोरमं यद्दिने
हविष्याशीतद्दिनेमत्स्याद्यशनेहविष्यान्नव्याघातत्वात् नानाचार
त्वाच्च॥ तथाचोक्तंयामले॥ नानाचारेणकर्त्तव्योनचारणमितस्त
तः इतिवचनात्तस्मात् कुमारीतंत्रोक्तवचनस्यपुरश्चरणद्वयेता
त्पर्य्यं॥ एतत्कल्पद्वयेनैवेतिवचनात्॥ एतत्कल्पद्वयंतुदीव्यवी
रयोःकर्त्तव्यं॥ दिव्यस्तुतत्वज्ञानीसन्मानसक्रियावान्॥ वीर
स्तुतत्वज्ञानीसन्बाह्यान्तक्रियावान्॥ उक्तमानसत्वात् सर्वग्रा
ह्यं॥ दिव्यस्तुदेववत् प्रायोवीरश्चोद्धतमानसः॥ कामक्रोधलो
भमोहरागद्वेषविवर्जितः॥ पूजयमानेसंतुष्टोप्यधिकारीसएव
हि॥ योगिनीहृदये॥ सर्वहिंसाविनिर्मुक्तःसर्व्वप्राणिहितेरतः
सोऽस्मिन् शास्त्रेऽधिकारीस्यात्तदन्योभ्रष्टसाधकः॥ पशुस्तुसंश
यज्ञानीसन्क्रियावान्॥ मत्स्यमांसादिकंनप्राश्येनस्त्रियंमन
सास्मरेत्॥ नताम्बूलंभक्षयेत्किन्तुहविष्यान्नंसभक्षयेत्॥ ऋ
तुकालंविनानस्वैस्त्रियमपिनगच्छेत्॥ दक्षिणमार्गेणपूजाकर्त्तव्या
पि॥ तथाचोक्तंयामले॥ योब्राह्मण्यंविनादेविमहामायांसमर्च्चति
॥ सपापःस्वर्गलोकेभ्यश्च्युतोभवतिनान्यथा॥ दिव्यवीरविषयेपि
दिवाविषयेवोध्यम॥ तथाचोक्तंरुद्रयामले॥ दिवादक्षिणमार्गेण
वामेनचतथानिशि॥ यदित्तूर्णफलावाप्तौयुष्माकंमतमेवच इति
वचनात्॥ अथग्रहणपुरश्चरणं॥ श्रीवीजार्णवतंत्रे॥ षोडशपटले

देवींप्रतिशिववाक्यं॥ एकदापरमेशानिकामाख्यायांमहेश्वरि॥ दृष्टोपरागंयत्कर्मतत्शृणुष्व वरानने॥ कुतःस्नानंकुतःसंध्याप्राणायामंकुतःप्रिये॥ भूतशुद्धिः कुतो भद्रे कुतःपूजावरानने॥ कालातीतभयाद्देविसर्वंसंत्यज्यकामिनि॥ संकल्पंमानसंकृत्वाजपंकृत्वावरानने॥ पंचांगविधिनादेविसिद्धोभवतिनान्यथा॥ मंत्रविद्यामहेशानिकवचंस्तवमेवच॥ ध्यानंवापरमेशानिन्यासंवाकमलानने॥ एकोच्चारेणदेवेशि भवंति दशकोटयः॥ असंख्यंतज्जपंदेविग्रहणेचंद्रसूर्ययोः॥ तत्कथंपरमेशानिक्रियतेजपसंख्यकं॥ अतएवमहेशानिहोमोनास्तिसुनिश्चितं॥ अभिषेकंचदेवेशितथाचतर्पणादिकं॥ भोजनंचमहेशानिनास्त्येवकमलानने॥ चन्द्रसूर्य्यग्रहेदेवीपंचाङ्गं,नास्तिकामिनी॥ पंचाङ्गेनविनादेविसिद्धोभवतिनान्यथा॥ संकल्पंविद्धिदेवेशिमानसंयदुपस्थितं॥ तत्संकल्पंविजानीयाद्ग्रहणेचंद्रसूर्ययोः॥ तस्मात्तुचंचलापांगिसंकल्पंनैवकारयेत्॥ संकल्पमानसंदेविचतुर्वर्गफलप्रदं॥ अतएवमहेशानिसंकल्पंमानसंस्मृतं॥ स्थूलंहिपरमेशानिसंकल्पंव्यर्थमुच्यते॥ संकल्पेनविनादेवियत्किंचित्कुरुतेसुधीः॥ व्यर्थमेवहिदेवेशितत्सर्वंमानसेनच॥ प्रथमेप्रहरेदेविचंद्रग्रासोयदाभवेत्॥ चंद्रग्रहणकालेतुजपयज्ञादिकंचरेत्॥ दिवसेचयदाभद्रेभास्करग्रहणंभवेत्॥ रात्रौभुक्त्वाचपीत्वाचजपयज्ञादिकंचरेत्॥ सर्वेषुविष्णुमन्त्रेषुशिवेगाणपतेतथा॥ शक्तिमंत्रंमहेशानिप्रशस्तंसततंजपं॥ इतिवीजार्णवेतंत्रे शिवेनैवप्रकाशितं॥ एतत्कल्पंज्ञानिनामेवकर्त्तव्यं॥ अज्ञानिनामपिपश्चूनांकर्त्तव्यमाह॥ गंधर्वतंत्रे॥ अथ वान्यप्रकारेणपुरश्चरणमुच्यते॥ ग्रहणेर्कस्यचेंदोर्वाशुचिःपूर्वमुपोषितः॥ नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः॥ ग्रहणादिविमोक्षांतंजपेन्मंत्रंसमाहितः॥ दृष्ट्वास्नात्वासुसंकल्पोविमोक्षांतंजपंचरेत्॥ जपस्यचदशांशेनहोमंकुर्य्याद्यथाविधिः॥ होमार्थेद्विगुणंवापिजपेन्मंत्रंसमाहितः॥ होमस्यतद्दशांशेनतर्पणंसमुपाचरेत्॥ तर्पणस्यतद्दशांशेनअभिषेकंसमाचरेत्॥ अभिषेकदशांशेनकुर्याद्ब्राह्मणभोजनं

तदंते महतीं पूजां कुर्य्यात्साधकसत्तमः॥ गुरवे दक्षिणां दद्याद्भक्त्याः विप्रान्प्रतर्पयेत्॥ शामादिविद्यायां विशेषमाह कालीतंत्रे॥ अथ वान्यप्रकारेण पुरश्चरणमिष्यते॥ चंद्रसूर्य्यग्रहे चैव ग्रासावधि विमुक्तिदः॥ यावत्संख्यमनुं जप्त्वा तावद्धोमादिकं चरेत्॥ यदा नक्रादिदूषिता नदी भवति तदा समुद्रगामिनी भवति॥ तदा यत्कर्त्तव्यं तदाह॥ रुद्रयामले॥ अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः॥ ग्रहणान्मुक्तिपर्यंतं जपेन्मंत्रमनन्यधीः॥ इति कृत्वा न संदेहो जपस्य फलभाग्भवेत्॥ ग्रहणपूर्वदिने उपवासाशक्त्याह विष्यान्ने फलं दुग्धं वा भुंजीत॥ तन्न मनोरमं प्रमाणाभावात्॥ उपवासस्यावश्यकत्वात्॥ यत्तु वदंति॥ अत्र श्राद्धमकुर्व्वाणः पंके गौरिव सीदति॥ इति निंदावादश्रवणाच्छ्राद्धस्यावश्यकत्वं न जपस्येति॥ तन्न॥ सनत्कुमारतंत्रे॥ यः श्राद्धमनुरोधेन यदि जापं त्यजेन्नरः॥ स भवेद्देवताद्रोही पितॄन्सप्त नयत्यधः॥ महिषमर्दिनीतंत्रे॥ चंद्रसूर्यग्रहे जप्त्वा कैवल्यं प्राप्नुयान्नरः॥ अकृत्वा मंत्रजापं च स त्वरं नरकं व्रजेत्॥ गुप्तदीक्षातंत्रे॥ चंद्रसूर्यग्रहे देवि सम्यग्जापं न चाचरेत्॥ स भ्रष्टः स च पापिष्ठः सहसा शूकरो भवेत्॥ तस्यान्नमुदकं देवि मूत्रशोणितविट्समं॥ जायते नात्र संदेहो मम वाक्यं वरानने॥ अन्यत्रापि॥ जपयज्ञं विना देवि यः करोत्यन्यचिंतनं॥ स भवेद्रौरवे मग्नो यावदाहूतसंप्लवं॥ रौरवात्तु नरा गत्य पापयोनिषु जायते॥ निष्कृतिर्नास्ति चार्व्वङ्गि तस्यापि च कदाचन॥ तस्मात्सर्वं परित्यज्य चंद्रपर्वे जपं चरेत्॥ सूर्य्यपर्वे यथा देवि चंद्रपर्वे तथा प्रिये॥ सर्वं त्यक्त्वा महेशानि जपपूजां समाचरेत्॥ इत्यादिनानातंत्रवचनेभ्यो निंदावादश्रुतेर्जपस्यैवावश्यकत्वात्॥ राश्यादिगणनायां दोषमाह यामले॥ अज्ञानाद्यदि मूढात्मा राश्यादिगणनं प्रिये॥ विचार्य चंचलापाङ्गि न पश्येद्ग्रहणं यदि॥ पूर्वजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति॥ चंद्रपर्वे सूर्य्यपर्व्वे न विचार्य्यं कदाचन॥ सूर्यपर्वे वरारोहे न पश्येद्यदि पामरः॥ अस्तु तावत्परो धर्म्मः पूर्वधर्मो विनश्यति॥ यामले॥ जन्मसप्ताष्टरिष्फाङ्कदशमस्थे निशाकरे॥

दुष्टोरिष्टप्रदोराहुर्जपपूजांविनाभवेत्॥भैरवतंत्रे॥ अथवक्ष्ये महेशानिकवचानांपुरस्क्रियां॥ अष्टोत्तरशतंजप्त्वापुरश्चर्यांसमाचरेत्॥ दशांशतोःङ्ग कर्म्माणिहोमादीनिपृथक्पृथक्॥ननतश्चसिद्धकवचःपुण्यमानन्मदनोपमः॥स्वपमशक्तःप्रतिनिधिद्वाराकर्त्तव्य॥पूजाप्रदीपे॥ विदधीतपुरश्चर्यां गुरुणातादृशेनवा॥ ॥इतिशाक्तानंदतरङ्गिण्यांपुरश्चरणनिर्णयद्वादशोल्लासः॥ ॥

विनामंत्रेणपूजायांदेवतानप्रसीदति॥ सर्वेषामपिदेवानांयंत्रेपूजाप्रशस्यते॥सुवर्णरजतंताम्रंश्रेष्ठंमध्यमथामधं॥ताम्रेलक्षगुणंप्रोक्तंरौप्येकोटिगुणंभवेत्॥सुवर्णेनन्तफलदंस्फाटिकंचतथासमं॥एकतोलंद्वितोलंवात्रितोलंपंचतोलकं॥रसतोलंचतुस्तोलंसप्ततोलंपलंतुवा॥साधकस्यमनोज्ञात्वाकृत्वापीठंतुसाधकः॥ अथवाप्रतिमांकृत्वानिजदेवस्वरूपिणीं॥सम्मोहनतंत्रे॥मंत्रमुच्चारयन्सम्यक् अलिखेनमंत्रमुत्तमं॥तंत्रे॥तन्मध्येविलिखेन्मंत्रंसुवर्णेनकुशेनवा॥ ऊर्द्ध्वाम्नाये॥ प्राणनाथजगन्नाथब्रह्मविष्णुप्रपूजित॥ इदानींयंत्रराजस्यप्रतिष्ठाकर्म्मेवद॥ईश्वरउवाच॥यथामंत्रस्यसंस्कारस्तथायंत्रस्यकारयेत्॥ असंस्कृतेमंत्रयंत्रेरोगशोकभयप्रदे॥कथितोमंत्रसंस्कारोदशधासर्वतंत्रके॥यंत्रसंस्कारमधुनाशृणुदेविसमाहिता॥यंत्रराजेनिर्मीयततःसंस्कारमाचरेत्॥प्रतिष्ठाद्विविधादेविमध्यमाचोत्तमातथा॥स्नात्वासंकल्पयेन्मंत्रीगुरोर्वचनमादरात्॥प्रणवंतत्सदद्येतिमासपक्षतिथावपिअमुकोमुकगोत्रोहंपूजार्थप्रीतयेतथा॥यंत्रेस्मिन्अमुकीदेव्याःप्राणजीवेन्द्रियेतिच॥प्रतिष्ठाकर्म्मशब्दांतेकरिष्येप्रागुदङ्मुखः॥ततोगुरुंचवृणुयाद्वस्त्रालंकारचंदनैः॥भूतशुद्ध्यादिकान्यासान्विन्यसेत्तदनंतरं॥पंचगव्यंनिजेमंत्रैःशिवोमंत्रेणमंत्रितं॥तस्मिन्यंत्रंक्षिपेन्मंत्रीप्रणवेनविलोकयेत्॥ततश्चक्रंसमुद्धृत्यस्थापयेच्चक्रभाजनेशंखतोयेनदेवेशितथापुष्पोदकेनच॥वारिणाचंदनेनापिस्नापयेत्परमेश्वरीं॥नारिकेलोदकैश्चैवसर्वौषधिजलैरपि॥पंचामृ

तैः पंचगव्यैः स्नापयेत्परमेश्वरीं॥ तत्र शीतजलं वर्ज्यं किंचिदुष्णेन
स्नापयेत्॥ अत्युष्णं वज्रतुल्यं स्यात् तस्मात्तत्परिवर्जयेत्॥ पंचा
मृतमाह यामले॥ घृतं क्षीरं तथा नीरं शर्करामधुसंयुतं॥ पंचामृतमि
दं ख्यातं प्रत्येकं तु पलं पलं॥ पंचगव्यपरिमाणमाह तंत्रे॥ पलमा
त्रं दुग्धभागं गोमूत्रं तावदिष्यते॥ घृतं च पलमात्रं स्याद्गोमयं नोल
कद्वयं॥ दधिप्रसृतिमात्रं स्यात् पंचामृतमिदं स्मृतं॥ अथवा पंचग
व्यानां समानो भाग इष्यते॥ दधिपात्रावशेषं यत् तत्तु स्नाने विवर्ज
येत्॥ सम्वत्सरात्परं चाज्यं षण्मासात्परमाक्षिकं॥ गुडं च शर्करा
श्चैव सर्व्वा व्रीहिश्च वत्सरात्॥ एतान्न दद्यात् इत्यर्थः॥ देवानां प्र
तिमा यत्र घृताभ्यंगक्षमा भवेत्॥ पलानि तत्र देयानि श्रद्धया सप्त
विंशतिः॥ अष्टोत्तरशतपलं स्नाने देयं तु सर्वदा॥ द्वे सहस्रे पलानां तु
महास्नाने न संख्यया॥ पलं तु लौकिकैर्मानैः साष्टरत्तिद्विमासकं॥ तो
लकत्रितयं ज्ञेयं ज्योतिर्वित्तैः स्मृतिसंमतं॥ पलं पलं पंचगव्यं नित्यं स्नाने
तदर्द्धकं॥ अशक्तस्य विधिं तस्यैव सानां परमेश्वरि॥ गुणतोलकहीनं
च न कुर्यात्स्नानकर्मणि॥ स्नानं समाप्य तां देवीं स्थापयेत्स्वर्णपीठके
॥ तस्मादुद्धृत्य मतिमान् नाभेरूर्द्ध्वं निवेशयेत्॥ तत्रैव पीठं संपूज्य
चार्घ्यपात्रादिकं चरेत्॥ स्पृष्ट्वा यंत्रं कुशाग्रेण गायत्र्या चाभिमंत्रयेत्
॥ गायत्रीमाह॥ प्रणवं मंत्रराजाय विद्महे तदनंतरं॥ महायंत्राय
धीमहि तन्नो यंत्रं प्रचोदयात्॥ आवाह्य पंचमुद्राभिः प्राणस्थापनमा
चरेत्॥ मुद्रामाह ज्ञानार्णवे॥ ऊर्द्ध्वांजलिमधः कुर्य्यादियमावाह
नी भवेत्॥ इयं तु विपरीता स्यान्मुद्रा स्थापनकर्म्मणि॥ बाह्यांगुष्ठ
द्वये मुष्टीमुद्रा स्यात्सन्निधापनी॥ अंगुष्ठगर्भिणी सैव मुद्रा स्या
त्सन्निरोधनी॥ देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः॥
करावेकत्र संयोज्य अवोत्रिकमिव प्रिये॥ परमीकरणं नाम मुद्रेयं
तु ततः परं॥ वंबीजेनामृतीकृत्य ततश्च धेनुमुद्रया॥ धेनुमुद्रया म
हादेवि अमृतीकरणं भवेत्॥ प्रतिष्ठाप्यार्च्चयेद्देवीमन्यथा निष्फलं
भवेत्॥ प्राणमंत्रमाह यामले॥ उच्चार्य मुं वं नेशानीं पाशांकुशपु
टन्तथा॥ सबिन्दुयादिसप्तार्णान् प्रासादं तेजपेन्मनुं॥ नाम्ना देव्या

स्ततः प्राणा इह प्राणास्ततः प्रिये॥ पुनर्मन्त्रं पुरस्कृत्वा तथैव साध
कोत्तमः॥ नाम्ना च देवतायास्तु ततो जीव इह स्थितः॥ तथैव देवदेवे
शि उक्त्वा सर्वेन्द्रियाणि च॥ वाङ्मनश्चक्षुरित्यन्ते श्रोत्रघ्राणपदन्तथा
॥ ततः प्राणा इहागत्य सुखमुक्त्वा चिरं पठेत्॥ तिष्ठं तु वन्हिजायांतः
प्राण मंत्र उदीरितः॥ स्वस्वनाम्ना महेशानि मंत्रोऽयं सर्वदैवतः॥
इति प्राणं प्रतिष्ठाप्य ततः पूजां समाचरेत्॥ स्वकल्पोक्तविधानेन
मुद्रां प्रदर्श्य साधकः॥ उपचारैः षोडशभिर्देवीं प्रपूजयेत् क्रमात्॥
देव्याज्ञया परीवारान् पूजयेत् परमेश्वरी॥ ततो जपेत् सहस्रं तु शतम
ष्टोत्तरं प्रिये॥ बलिदानं ततः कृत्वा प्रणमेच्चक्रराजकं॥ अष्टोत्तरश
तं होमं कुर्य्याच्च साधकोत्तमः॥ निजमंत्रेण देवेशि जुहुयाच्चक्रसि
द्धये॥ आहुत्यान्ते चक्रराजे हुतशेषं विनिःक्षिपेत्॥ पूर्णान्दत्वा
तु होमान्ते तज्जलैरभिषेचयेत्॥ मंत्राभिषिक्तं चक्रन्तत् सर्वेपासि
द्धिदायकं॥ गुरवे दक्षिणां दद्यात् यथाविभवविस्तरैः॥ संहारमुद्र
याद्देव्या विसर्जनमतः परं॥ प्रतिष्ठये चक्रराजं अनेन विधिना यदि
पुरश्चर्या फलं तस्य सर्वसिद्धियुतस्य च॥ गुरोराज्ञाप्रमाणेन यंत्रं
मूर्द्ध्नि निधापयेत्॥ गृहीतं यंत्रमेवेदं क्वापि नैव प्रकाशयेत्॥ यंत्रमं
त्रप्रकाशे तु क्रुद्धा भवति पार्वती॥ निजमंत्राभिषिक्तं च गुरोरपि न
दर्शयेत्॥ यंत्रग्रहणकाले तु यदि स्यान्मेघगर्जनं॥ उल्लुलुध्वनिरा
कस्माद् अथवा शंखनिस्वनः॥ तदा मंत्री झटित्येव सिद्धकार्य्यो नसं
शयः॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ ग्रहणं यंत्रमंत्राणां
शुभदं तत्र कीर्त्तितं॥ अथ बलिदानविधिः मुंडमालायां॥ नरश्छा
गस्तथा मेषो महिषः शशकस्तथा॥ शल्लकी शूकरश्चैव बलयः
परिकीर्त्तिताः॥ नरबलिस्तु राज्ञामेव॥ राजा नरबलिन्दद्यान्ना
न्योपि परमेश्वरि॥ युवानं व्याधिहीनं च सुश्रीकं लक्षणान्वितम्
सर्वावयवसंपन्नं बलिं दद्यात् सुशोभनं॥ तरुणं सुंदरं कुष्ठाक्षता
दिदोषवर्जितं॥ स्नापयित्वा बलिं तत्र भूषयेत् पुष्पचन्दनैः॥
भूषयेद्रक्तमाल्येन सिंदूरेण विशेषतः॥ उत्तराभिमुखो भूत्वा
बलिं पूर्वमुखं तथा॥ समानीय स्ववामे च मूलेन प्रोक्षणं चरेत्॥

संप्रोक्ष्यान्तं विधायाथ बलिं संपूजयेत्ततः॥ ब्रह्मरन्ध्रे च ब्रह्माणं न
न्नासायां च मेदिनीं॥ कर्णयोश्च तथाकाशं जिह्वायां सर्व्वतोमुखं
॥ ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूजयेत्॥ ललाटे पूजयेच्चंद्रं श
क्रं दक्षिणगंडके॥ वामगंडे तथा वह्निं ग्रीवायां समवर्त्तनं॥ रोमकू
पे धृतिश्चैव भ्रुवोर्मध्ये ग्रचेतसं॥ नासामूले च शमनं स्कंदे चैव महे
श्वरं॥ हृदये सर्वराजेन्द्रं पूजयित्वा पठेदिदं॥ ॐ महातपोभिर्दीने
श्च यज्ञैर्यत् साध्यते नृणां॥ तन्मे देहि महाभागे सत्वरं स्वानुहिंश्रि
यं॥ शिवबुद्ध्या सुसंपूज्य उत्सृज्य च ततः परं॥ ततो देवीं समुद्दि
श्य कामसुद्दिश्य चात्मनः॥ इत्युत्सृष्ट बलिं पश्चात्करवालं प्रपू
जयेत्॥ खड्गाग्रे पूजयेन्मंत्री ब्राह्मीं वागीश्वरीं तथा॥ मध्ये च पूज
येद्देवि लक्ष्मीनारायणावपि॥ मूले च पूजयेद्देवि उमया सह शंकरं
एवं विधं च संपूज्य नमस्कुर्यात् प्रयत्नतः॥ खड्ग त्वं शिवरूपोसि
क्रोधभैरवसंज्ञकः॥ दुर्गाप्रीतिकरो नित्यं काली शक्तिरिवापरः॥
खड्गाय खरनाशाय शक्तिकार्य्यार्थतत्पर॥ पशुश्छेद्यस्त्वया शी
घ्रं खड्गनाथ नमोस्तु ते॥ एवं संपूज्य तं खड्गमुत्तोल्य साधकोत्तमः
॥ छेत्ता पूर्वमुखो भूत्वा बलिमुत्तरवक्त्रकं॥ आं ह्रूं इति मंत्रेण छेद
यित्वा ततः पशुं॥ ततो बलीनां रुधिरं तोयसैन्धवसत्फलैः॥ मधु
भिर्गन्धपुष्पैश्च स्वाधिवास्य प्रयत्नतः॥ गन्धपुष्पान्वितं कुर्य्यात्
उत्सृजेन्मंत्रमुच्चरन्॥ प्रणवं वाग्भवं लक्ष्मीं ततः कौशिकिशब्दतः
॥ रुधिरेण ततः पश्चादाप्यायतां समुच्चरेत्॥ निवेद्य रुधिरं देवि शी
घ्रं दद्यात् प्रदीपकं॥ ततो निवेदयेन्मंत्री ताम्बूलं सुमनोहरं॥ रुधिर
मस्तकस्थापनक्रममाह॥ तंत्रे॥ नारं सव्ये शिरो रक्तं देव्याः सम्यङ्
नियोजयेत्॥ छागं तु वामतो दद्यात् माहिषं वितरेत्सुरः॥ पक्षिणं वा
मतो दद्यात् अग्रतो देहशोणितं॥ यामले॥ यदा कटकटाशब्दो दंता
नां श्रूयते क्वचित्॥ तदा तु मरणं विद्यात् हानिर्वा तत्र निर्दिशेत्॥ यदा
मुहृष्यते नेत्रे नदा हानिर्विनिर्दिशेत्॥ पूर्व्वोत्तरे च दिग्भागे पतते य
दि मस्तकं॥ सर्वसम्पत्करी विद्यात् राज्ञो राज्यं विनिर्दिशेत्॥ ईशाना
ग्नेर्मध्यभागे पतते यदि मस्तकं॥ ततः संकल्पकाले न सर्वसिद्धिर्भवे

ध्रुवम्॥ यदिवायव्यदिग्भागेनैरृत्येदक्षिणेपिवा॥ मस्तकंपतते जातुनस्यहानिंविनिर्दिशेत्॥ यामले॥ ब्राह्मणांकच्छपानांचगोधायाश्चविशेषतः॥ मत्स्यानांपक्षिणांचैवनदीपंदापयेच्छिवे॥ शीर्षेपरिज्वलद्दीपो यावत्कालंप्रवर्त्तते॥ तावत्कालंवसेत्स्वर्गेत स्माद्यत्नेनदापयेत्॥ रुद्रयामले॥ रोमदाहोद्भवंगन्धंघ्रात्वादेवी प्रसीदति॥ तस्मात्संवर्द्धयेद्दीपंनस्मात्यात्रंविवर्जयेत्॥ विधिवद्बलिदानेनचतुर्वर्गफलंलभेत्॥ अविधानेनदोषमाह॥ कुलार्णवे॥ अविधानेनयोहन्यांआत्मार्थंप्राणिनःप्रिये॥ निवसेन्नरके घोरेयुगानिपशुरोमभिः॥ सरक्तबिंदुपातीचतिर्यक्योनिप्रजायते॥ अनुमंताविशसितानिहंताक्रयविक्रयी॥ संकर्त्ताचोपभोक्ताचप्रोक्ताअष्टोचतेसति॥ रुद्रयामले॥ धनेनक्रयिकोहंतिखादितोचोपभोगतः॥ घातकोवधबन्धाभ्यांइत्येवत्रिविधोवधः॥ यामले॥ पितृदैवतयज्ञेषुवेदहिंसाविधीयते॥ अन्यत्रापि॥ अहिंसा परमोधर्म्मःनास्त्यहिंसापरंसुखं॥ विधिनायाभवेद्धिंसासात्वहिंसैव कीर्त्तिता॥ भूतहिंसानकर्त्तव्यापशुहिंसाविशेषतः॥ बलिदानंविनादेविहिंसासर्वत्रवर्जयेत्॥ यामले॥ हन्यान्मंत्रेणचानेन अभिमंत्र्यपशुंशिवे॥ गंधपुष्पाक्षतैःपूज्यमन्यथानरकंव्रजेत्॥ पापैरजनिताहिंसातत्कथंस्वर्गसाधनं॥ अश्वमेधादियज्ञेषुवाजिहत्यांकथंचरेत्॥ दृष्टांतमाह यामले॥ येनैवविषखंडेन म्रियन्तेसर्वजन्तवः॥ तेनैवविषखंडेनभेषजोनाशयेद्विषं॥ तस्मादविधानहिंसापापजनिका॥ विधिबोधिताहिंसास्वर्गजनिकाइतितुनिष्कर्षार्थः॥ ॥ इतिशाक्तानंदतरंगिण्यांयंत्रप्रतिष्ठादिनिर्णयस्त्रयोदशोल्लासः॥१३॥ उपचारंप्रवक्ष्यामिशृणुपार्वतिसादरं॥ विनोपचारैर्यापूजासापूजानप्रसीदति॥ अष्टादशोपचारास्तुसर्वेषामुत्तमाःप्रिये॥ षोडशातिप्रधानाश्चदशधातदनुस्मृताः॥ पंचधातदनुप्रोक्ताःकर्त्तव्याभूतिमिच्छता॥ फेत्कारिण्यां॥ आसनावाहनंचार्घ्यंपाद्यमाचमनन्तथा॥ स्नानवासोपवीतंचभूषणानिचसर्वशः॥ गंधंपुष्पंतथादीपंधूपान्नंचतर्पणं॥ माल्यानुलेप

नंचैवनमस्कारंविसर्जनं॥अष्टादशोपचारैस्तुमंत्री पूजांसमाचरेत्
॥तंत्रे॥ आसनंस्वागतंपाद्यं अर्घ्यमाचमनीयकं॥मधुपर्काचमनः
स्नानंवसनाभरणानिच॥सुगंधिसुमनोधूपदीपनैवेद्यवंदनं॥प्र
योजयेदर्च्चनायामुपचारांस्तुषोडश॥पाद्यार्घाचमनस्नानमधुप
र्काचमनान्यपि॥गन्धाद्योनैवेद्यान्ताः उपचारादशात्मकाः॥गंधं
पुष्पंचधूपंचदीपंनैवेद्यमेवच॥प्रदद्यात्परमेशानि पूजापंचोपचारि
का॥पादार्थमुदकंपाद्यंचंदनागुरुसंयुतं॥सनतत्श्यामकदूर्वाच
विष्णुक्रांतापराजिता॥पाद्यपात्रेचदातव्यंअर्घ्यैचैवार्घ्यपात्रके
॥रक्तविल्वाक्षतैः पुष्पैर्दधिदूर्वान्वितैर्जलैः॥सामान्यःसर्वदेवानां
अर्घ्योयंपरिकीर्त्तितः॥ अभावेदधिदूर्वाद्येर्म्मानसंपरिकल्पयेत्
अन्तःशून्यंत्रिपत्रंचदूर्वाचार्घेविनिःक्षिपेत्॥जातीलवंगकक्को
लैर्दद्यादाचमनीयकं॥तत्तैजसेनपात्रेणशंखेनैवप्रदापयेत्॥उ
दकंदीयतेयत्ततत्सुगंधंफेनवर्ज्जितं॥आचमनीयंदेव्यैचतदा
चमनमुच्यते॥दद्यादाचमनीयंतुसुगंधिसलिलैःशुभैः॥बृहत्
श्रीक्रमे॥नारिकेलोदकंस्वल्पंसितादधिसमंघृतं॥सर्वेषामधिकं
क्षौद्रंमधुपर्कंप्रयोजयेत्॥ तद्द्यात्कांस्यपात्रेणशोभनेनविशेष
तः॥वस्वंगुलविहीनंतुनपात्रंकारयेद्बुधः इतिवचनात् कां
स्यपात्रेमधुपर्केनारिकेलोदकदानेदोषाभावः॥यथाताम्रपात्रेच
रुपाकेदोषाभावः॥तथाचोक्तं॥ततश्चसंस्कृतेवन्हौगोक्षीरेणचरुं
पचेत्॥अस्त्रेणक्षालितेपात्रेनवेताम्रमयादिके॥पयोनुद्धृतसारं
चताम्रपात्रेनदुष्यति इतिवचनात्॥सर्वेषुगंधजातेषुप्रहृष्टोम
लयोद्भवः॥तस्मात्सर्वप्रयत्नेनदद्यान्मलयजंसदा॥मध्यमानामि
काङ्गुष्ठाङ्गुल्यग्रेणचपार्व्वति॥दद्यात्तुविमलंगंधंमूलमंत्रेणसाध
कः॥सर्वेषांपुष्पजातीनांरक्तःशस्तस्तथाजवा॥देवीप्रीतिकरंप्राज्ञेस
र्व्वकामफलप्रदं॥रक्तपुष्पंचदेवेशितथास्वर्णादिनिर्मितं॥रक्तप
द्मेनवज्रेणतुलांनायांतिकर्हिचित्॥पंचदेवमयंपुष्पंकरवीरंमनो
हरं॥विष्णुर्लंबोदरंसूर्य्योब्रह्माचकालिकातथा॥पंचदेवाःपंचद
लेसदातिष्ठंतिनान्यथा॥जवापुष्पंमहेशानिकरवीरापराजिता॥

महादेव्यैनिवेद्यैवकोटिपूजाफलंलभेत्॥एषांमध्येवसेद्ब्रह्मा
एषांमूलेजनार्द्दनः॥एषामग्रेवसेद्रुद्रःसर्व्वेदेवाःस्थितादले॥एषां
करवीरजवापराजितानां॥रक्षेविकसितेकालेदेवतादिग्विनि
र्णयं॥विष्णुस्तत्पश्चिमदलेउत्तरेगणनायकः॥ऐशान्यांसूर्य्यदे
वश्चपूर्व्वेब्रह्माप्रकीर्त्तितः॥दक्षिणेकालिकादेवीयामुक्तिःपरिगी
यते॥करवीरंयथादेविजवापुष्पन्तथैवहि॥यथाशुक्लंतथारक्तं
हरितंकृष्णमेवच॥गंगादिसर्वेतीर्थानितिष्ठंतिविंदुगंधवे॥तन्म
ध्येशिवलिंगंचमहाकुंडलिनीयुतं॥गंधर्वबिंदुरूपंचकैवल्यप
दमुत्तमं॥शिवशक्तिमयंपुष्पंचतुर्वर्गफलप्रदं॥सर्वपुष्पाणिचैक
त्रजवाश्चपारिजातकैः॥नसमंजायतेदेविलक्षकोटिशतैरपि॥य
त्रापराजितापुष्पंकरवीरजवापिच॥तिष्ठंतितत्रवैदेवाब्रह्माविष्णु
पुरंदराः॥गंगादिसर्व्वेतीर्थानितन्मूलेनिवसंतिवै॥तन्मूलंसिंचये
द्यस्तुपूजितातेनदेवताः॥अपरायाश्चमाहात्म्यंवक्तुंनशक्यतेम
या॥मल्लिकामुत्पलंरम्यंशमीपुन्नागचम्पकं॥अशोकंकर्णिका
रंचद्रोणपुष्पंविशेषतः॥करवीरंशमीपुष्पंकुंकुमंनागकेसरं॥यत्र
यच्छतिदुर्गायैसगच्छेत्परमंपदं॥पुष्पमध्येवसेद्ब्रह्मापुष्पमुले
जनार्द्दनः॥पुष्पाग्रेचवसेद्रुद्रःसर्वेदेवाःस्थितादले॥चराचराश्च
सकलाःसदापुष्पवशाःस्मृताः॥सर्वदेवमयंपुष्पंतस्माद्देवापत
र्पयेत्॥पुष्पैररण्यसंभूतैःपत्रैर्गिरिसमुद्भवैः॥अपर्य्युषितनिश्छि
द्रैःप्रोक्षितैर्जलवर्जितैः॥आत्मारामोद्भवैर्व्वापिपुष्पैःसंपूजयेच्छि
वं॥परारोपितवृक्षेभ्यःपुष्पान्यानीययोर्च्चयेत्॥अविज्ञाप्यचत
त्सर्वंनिष्फलंतस्यपूजनं॥इतितुसाक्षात्स्वामीपरं॥देवार्थेकुसुम
स्तेयंनकुर्य्यान्मनुरब्रवीत्॥सर्वपर्युषितंवर्ज्यंपत्रंपुष्पंफलंजलं
॥अवर्ज्यंजान्हवीतोयंअवर्ज्यंतुलसीदलं॥अवर्ज्यंबिल्वपत्रंः
स्यादवर्ज्यंजलजन्तथा॥पुष्पैःपर्य्युषितैर्देविनार्चयेत्स्वर्णजैरपि
॥बिल्वपत्रंचमाघ्यंचतमालामलकीदलं॥कल्हारंतुलसीपत्रं
पत्रंचमणिपुष्पकं॥एतत्पर्युषितंनस्याच्चान्यद्यत्कालिकात्मकम्
॥तिष्ठेद्दिनत्रयंमुद्गंपद्मामामलकंतथा॥दिनैकंकरवीराणियोजये

गनिच्चतपोधनं॥ पद्मानिसितरक्तानिकुमुदान्युत्पलानिच॥ एषां
पर्य्युषिताशंकाकार्य्यापंचदिनोर्द्धतः॥ अन्येषांकुसुमानांचयावद्गं
धविपर्य्ययः॥पुष्पंचपंचगव्यंचउपचारांस्तथापरान्॥ घ्रातान्निवे
द्यदेवेशिघोरंनरकमाप्नुयात्॥ अंगसंस्पृष्टमाघ्रातंत्यजेत्पर्य्युषि
तंबुधः॥केशकीटप्रदृष्टानिस्विन्नपर्य्युषितानिच॥स्वयंपतितपु-
ष्पाणित्यजेदुपहतानिच॥सेफालंवकुलंचैवस्वयंशीर्णंनदुष्यति॥
सर्वंभूमिगतंत्याज्यंसेफालिवकुलंविना॥कृमिभक्ष्याणिभग्ना
निवर्ज्यानिपतितंभुवि॥ तमालस्यचपद्मस्यछिन्नभिन्नेनदुष्यति
॥विष्णुक्रांतायवानागकेशरंनागवल्लभम्॥बंधूकेचैवमंदारेस
वृन्तेनसमर्च्चयेत्॥नागवल्लभंनागचंपकंइत्यर्थः॥ स्वयंविकसि
तंपुष्पंस्वयंचपतितंभुवि॥स्वयंविकसितंपुरुषेणइत्यर्थः॥मा
घादिसर्वमासेषुपूज्यपुष्पाणिद्वादश॥कुन्दंकुरुंकेतकंचबकेझि
ण्टीलवन्नथा॥ नीलंचरविकंशीर्षंसुद्रभृङ्गरजस्तथा॥बकुलं
रंगनंचैवमाघमासेयजेत्क्वचित्॥नाक्षतैरर्च्चयेद्विष्णुंनतुलस्या
विनायकं॥नदूर्वयायजेद्दुर्गांविल्वपत्रैर्दिवाकरं॥ दूर्वानिषिद्धायद्दु
क्तंतत्श्वेतदूर्वापरं॥ तथाचोक्तंयामले॥ रक्तमाघ्यंश्वेतदूर्वां
नीलकण्ठंकुरुण्डकं॥नदद्याच्चमहादेव्यैयदीच्छेच्छुभमात्मनः॥
पुष्पाभावेयजेत्पत्रैःपत्राभावेतुतत्फलैः॥अक्षतैर्वाजलैर्वापिनपू
जांव्यतिलङ्घयेत्॥शिवेविवर्जयेत्कुन्दंउन्मत्तंचहरेस्तथा॥
देवीनांअर्कमंदारौसूर्य्यस्यतगरंतथा॥ तगरंकाष्ठतगरमित्यर्थः
॥मालतीमल्लिकाजातियूथिकामाधवीतथा॥तगरंकर्णिकारश्च
द्रोणश्चोत्पलचम्पकौ॥ अशोकंकुमुदश्चैवशेफालिकाकदम्बकौ
॥केतकीवनमालाचकुसुंभकिंशुकौतथा॥कल्हारंवकुलंचैवल
वंगनागकेशरौ॥एतान्यपिप्रियाणिस्युर्नपत्रैरर्च्चयेच्छिवां॥
जवाभावेतुगंधाढ्यंदूर्वावाश्रीफलच्छदं॥विनावैदूर्वयादेविपू
जानास्तिचकर्हिचित्॥तस्माद्दूर्वाग्रहीतव्यासर्वपुष्पमयीहिसा
देवेभ्यःसर्वगंधाढ्यंअभावेतुलसीदलं॥तुलस्यापूजयेद्देवान्ना
त्रकार्य्याविचारणा॥विनातुलस्यास्नानंगंश्राद्धयत्रार्च्चनेप्रिये

नसंपूर्णफलंप्राहुःसर्व्वएवविपश्चितः॥दूर्वांतुतुलसीतस्माद्
हीनव्याचसाधकैः॥सुंदरीभैरवीकालीब्रह्मविष्णुविवस्वतां॥वि
नातुलस्यायापूजासापूजानिष्फलाभवेत्॥शक्तियामले॥सावि
त्रींचभवानींचदुर्गांदेवींसरस्वतीं॥योऽर्चयेत्तुलसीपत्रैःसर्वका
मैःसमेधते॥यामले॥रात्रौरहस्यपूजायांतुलसींवर्ज्जयेत्सदा
॥तुलसीघ्राणमात्रेणक्रुद्धाभवतिचण्डिका॥तुलसीब्रह्मरूपाच
सर्वदेवमयीशुभा॥सर्वदेवमयीसातुगणेशस्यप्रियानहि॥ल
क्ष्मीदेव्याश्चाप्रियाहितस्माद्देव्यास्तथैवच॥अंगुष्ठतर्ज्जनीयोगा
तदक्षिणेपुष्पपातनं॥पुष्पंवायदिवापत्रंफलंनैवमधोमुखं॥
दुःखदंतत्समाख्यातंयथोत्पन्नंतथार्पणम्॥पुष्पांजलिविधिं
वक्ष्येयथोत्पन्नंतथार्पणम्॥यामले॥स्नानंकृत्वातुयेकेचित
पुष्पंछिन्दंतिवैद्विजाः॥देवतास्तन्नगृह्णन्तिनचापिपितरस्त
था॥एतत्तुमध्यान्हस्नानपरं॥तंत्रे॥स्नात्वामध्यान्हसमये
नछिंद्यात्कुसुमंबुधः॥तत्पुष्पेणार्च्चने देविनिरयेपरिपच्यते
॥नपुष्पच्छेदनंकुर्य्यातदेवार्थंवामतस्ततः॥नदद्यात्तेनदेवेभ्यः
संस्थाप्यवामहस्ततः॥अगुरूशीरगुग्गुलशर्करामधुचंदनैः
॥सामान्यःसर्वदेवानांधूपोऽयंपरिकीर्त्तितः॥सर्वेषामेवधूपानां
दुर्गापागुग्गुलःप्रियः॥घृतयुक्तोविशेषेणसततंप्रीतिवर्द्धनं॥धू
पभाजनंमंत्रेणप्रोक्ष्याभ्यर्च्यकृदात्मना॥अस्त्रेणपूजितांघंटां
वादयन्गुग्गुलंदहेत्॥धूपस्थानंसमभ्यर्च्यतर्ज्जन्यावामयास्पृ
शन्॥जयध्वनिंततोमंत्रमातःस्वाहेत्युदीर्य्यच॥अभ्यर्च्यवाद
यन्घंटांसधूपैर्धूपयेत्ततः॥मध्यमानाभिकाभ्यांतुमध्यपर्वं
णिदेशिकः॥अंगुष्ठाग्रेणदेवेशिधृत्वाधूपंनिवेदयेत्॥उत्तीर्य्य
मूर्द्धपर्य्यन्तंघण्टावादेनधूपितः॥धूपयेदाज्यसंमिश्रैर्नीचैर्दे
वस्यदेशिकः॥नभूमौविभजेद्धूपंनासनेनघटेत्तदा॥यथायथा
धावगतंकृत्वातंविनिवेदयेत्॥राशीकृतेनचैकत्रएतैर्धूपैर्विधू
पयेत्॥तुषाग्निवत्तथाकृत्वानतत्फलमवाप्नुयात्॥नाभिश्रीकूलं
दद्यात्तुदीपस्नेहाह्वृतादिकं॥कृत्वाभिश्रीकृतंतस्नेहंतमिस्रंनरकंव्र

जेत्॥ वर्त्त्यांकर्पूरगर्भिण्यासर्पिषातिलजेनवा॥ आरोप्यदर्शयेद्दी
पान् उच्चैः सौरभशालिनः॥ उच्चैर्देवस्यमस्तकोपरि॥ उत्तोलनंतथा
कृत्वागायत्रींमूलयोगतः॥ ततोनीराजनंकृत्वादशवावर्णदीप
कैः॥ वृक्षेचदीपोदातव्योनतुभूमौकदाचन॥ कुर्व्वीतपृथिवीतापं
योदीपमुत्सृजेन्नरः॥ तामिस्त्रनरकंघोरंप्राप्नोत्येवनसंशयः॥
सर्व्वसहावसुमतीसहतेनत्विदंद्वयम्॥ अकार्य्यपादघातंचदी
पतापन्तथैवच॥ तस्मात्तथाचपृथिवीतापंनाप्नोतिवैतथा॥ नैव
निर्व्वापयेद्दीपंदेवार्थमुपकल्पितं॥ दीपहर्त्ताभवेदन्धःकालो
निर्व्वापकोभवेत्॥ नतेनकरहारेपिकर्त्तव्यःसाधकोत्तमैः॥ नैवे
द्यमाह॥ कंदुपक्वंस्नेहपक्वंघृतसंयुक्तपायसं॥ मनःप्रियंचनैवे
द्यंदद्याद्देव्यै पुनःपुनः॥ कंदुपक्वइतिभ्रष्टतंडुलंपृथुकादिकं॥ प
द्यट्टोच्छिन्नवस्त्राणितत्तद्दद्याद्देवपूजने॥ बालप्रियंचनैवेद्यंदद्या
द्देवींप्रपूजयेत्॥ स्त्रीणांप्रीतिकरंयच्चतच्चापिविनिवेदयेत्॥ ता
म्बूलस्यप्रदानेनदेवीप्रीतिमतीभवेत्॥ शंखहस्तेनसर्व्वत्रप्रद
क्षिणंप्रकीर्त्तितं॥ सकृत्तद्विवेष्टयेत्तुदेव्याःसम्यक्प्रजापते॥ त्रि
धाचरचयेत्सम्यक्देवतायाःप्रदक्षिणं॥ एकंचण्ड्यांरवौसप्तत्रीणि
दद्याद्विनायके॥ चत्वारिकेशवेदद्यात्शिवेचार्द्धप्रदक्षिणं॥ दक्षिणा
द्वापवींगत्वादिशंतस्माच्चशाम्भवीं॥ ततोपिदक्षिणांगत्वानमस्का
रस्त्रिकोणवत्॥ त्रिकोणोऽयंनमस्कारस्त्रिपुराप्रीतिवर्द्धनः॥ नति
स्त्रिकोणकाराचनाराद्देव्याःसमीरिता॥ दर्शयन्दक्षिणंपार्श्वं
मनसापिचदक्षिणः॥ सचप्रदक्षिणोज्ञेयःसर्व्वदेवौघतुष्टये॥ प
श्चात्कृत्वातयोर्देवींभ्रमित्वाप्रणमेन्नरः॥ तस्यचैवैहिकंनास्तिन
परत्रदुरात्मनः॥ नमनंमानसंप्रोक्तंवाचिकंकायिकंतथा॥ त्रिवि
धश्चनमस्कारःकायिकश्चोत्तमःस्मृतः॥ कायिकस्तुनमस्कारैर्देवा
स्तुष्यंतिनित्यशः॥ जानुभ्यामवनिंगत्वाशिरसास्पृश्यमेदिनीं॥
क्रियतेयोनमस्कारउत्तमःकायिकःस्मृतः॥ पद्भ्यांकराभ्यांजानुभ्या
मुरसाशिरसातथा॥ मनसावचसादृष्ट्याप्रणामोऽष्टांगउच्यते॥
पद्भ्यांकराभ्यांशिरसापंचांगःप्रणतिःस्मृता॥ पुटीकृत्यकरौशीर्षे

यतेतद्यथातथा॥ अस्पृष्टाशीर्षजानुभ्यांक्षितिमध्यमउच्यते॥का
यिकस्त्रिविधः प्रोक्तो अष्टांगोद्विभेदतः॥ अष्टांगउत्तमः प्रोक्तः
पंचाङ्गोमध्यमः स्मृतः॥ अधमः करशीर्षाभ्यांनमस्कारंविवर्जये
त्॥ अयमेवनमस्कारोदण्डादिप्रतिनमेतिः॥ प्रणामइतिविज्ञेयः
सुपूर्वाप्रतिपादतः॥ यः स्वयंगद्यपद्याभ्यांघटिताभ्यांनमस्कृतिः
॥क्रियतेभक्तियुक्तेनवाचिकस्तुनमस्तुसः॥ पौराणिकैर्वैदिकैर्वा
मंत्रैर्याक्रियतेनतिः॥ समध्यमोनमस्कारोभवेद्वैवाचिकः सदा॥
यत्तुमानुषवाक्येननमनंक्रियतेसदा॥ सवाचिकोऽधमोज्ञेयोनम
स्कारेषुपार्वति॥ अथोपचारान्कुर्वीतमंत्रवित्स्वागतादिकान्॥
आसनंकुसुमंदद्यात्स्वागतंकुशलंवदेत्॥ अर्घ्यादिशेत्ततोमूर्ध्नि
शिवमंत्रेणदेशिकः॥ नमंतंपादयोः पाद्यंस्वधेत्याचमनीमुखे॥
स्वधेत्याचमनीयंचत्रिवारंसुखपंकजे॥ स्वधांतेनैवमनुनामधुप
र्कंमुखांबुजे॥ स्नानंगंधहृदादद्यात्पुष्पाधिवौषडितिच॥ स्नाना
र्थमुदकंदद्यात्सर्वांगेपरमेश्वरि॥ दुकूलेप्रोञ्छनंकृत्वादुकूलंवि
निवेदयेत्॥ स्नानेवस्त्रेचनैवेद्येदद्यादाचमनीयकं॥ सर्वांगेचंद
नंदद्यात्पुष्पंदद्यात्शिरोपरि॥ हारमाल्यंचदेवेशिग्रीवायांविनि
वेदयेत्॥ सर्वमलंकरणंदद्यात्यत्नेनविराजितं॥ प्रतिमादिषुय
योग्यंगात्रेदत्तंचतत्तनौ॥ दद्याद्देवायपुरतोनैवेद्यंभोजनादिकं॥
अन्नंभक्ष्यंस्वधांतेतुधूपदीपंस्वधानमः॥ नैवेद्यंचतथेत्युक्त्वा
कल्पयामिनमोवदेत्॥ प्रोक्तोनैवेद्यमंत्रोयंअनेनैवनिवेदयेत्
॥ ततोनिवेदयामीतिसर्वंदद्यान्महेश्वरि॥ देव्यानैवेद्यदानेवै
योविधिस्तुकथ्यते॥ असंस्कृतेनदातव्यंदेवतानन्नगृह्यते॥ सं
स्कारमाह यामले॥ आनीयदेवीपुरतः संप्रोक्ष्यचार्घ्यवारिणा॥
अस्त्रमंत्रेणसंप्रोक्ष्यधेनुमुद्रांप्रदर्शयेत्॥ तस्योपरिमूलमंत्रमष्ट
वारंजपेत्सुधीः॥ चक्रमुद्रापिधानेनचिंतयेत्तत्सुरक्षितं॥ यंमंत्रे
शोधनंकृत्वारंमंत्रेदाहयेत्ततः॥ वंमंत्रेचामृतंभाव्यंलंमंत्रेप्लावये
च्चतत्॥ सर्वभक्षणद्रव्येषुएवंसंस्कारमाचरेत्॥ अमृतोपस्तरण
मसिस्वाहेतिजलमर्पयेत्॥ अमुकीदेव्यैएतज्जलं॥ ॐ अमृतो

पस्तरणमसिस्वाहेतिदद्यात्॥ आपोशानजलं दत्वास्वाहादेव्यै नि
वेदयत्॥इदमन्नं सोपकरणंमहादेव्यैस्वधेतिच॥ प्रणवाद्यैरेभिरेव
देवी वक्त्रे हुनेद्गुरुः॥गुरुरिस्त्रुपरुलक्षणं॥अत्यादरेणहस्ताभ्यांउत्था
प्यमुखस न्निधौ॥जगन्मातर्जगद्धात्रि अमुकीदेवि ततः परं॥निवे
दयामियत् किंचित्जुषाणेदं हविर्मम॥अनेनमनुनादेविनिवेद्य
प्रणवादिना॥वामेचदक्षिणेनापिपंचमुद्राः प्रदर्शयेत्॥अंगुल्यः
कुटली भूताविरला श्चपरस्परं॥ग्रासमुद्रासमाख्याता सव्यपा
णिनियोजिता॥प्राणोपानस्ततो पंतुव्यानश्चोदानएवच॥स
मानःपंचमोज्ञेयः प्राणाः पंचसमीरणाः॥ प्राणमुद्राः समाख्याताः
प्राणाहरणकर्म्मणि॥ तर्जनीमध्यमांगुष्ठैस्त्रिभिरेकीकृतं यदि
॥स्यादापा नाहुतौमुद्रातथानामिकमध्यमा॥अंगुष्ठेनसमायु
क्तानियुक्ताव्यानहोमसु॥ निष्कनिष्ठेनयामुद्रावसोदाहरणास्मृता
॥सर्व्वाभिःसंयुतामुद्रासमानाहुतिकर्म्मणि॥क्षणंविलम्ब्यदेव्या
तुस्वीकृतं तद्विभावयेत्॥यावद्भुंक्ते हविर्देवितावन्मूलंजपेत्तथा॥
ततोमूलेनसलिलंदत्वाहविषिसाधकः॥तस्मात्तेजःसमुद्धास्य
दत्वापोशानमुत्तमं॥एतज्जलं॥ॐअमृतापिधानमसिस्वाहे
तिदद्यात्॥ततआचमनंतोयंदत्वाचमुखवासनं॥स्थानंविशो
ध्यतन्मंत्रीताम्बूलंचनिवेदयेत्॥उक्तेष्वेतेषुद्रव्येषुयत्किंचित्
दुर्ल्लभंयदि॥कल्पनीयंमहादेविमनसाभावनैवहि॥तत्रतत्रजलं
देयंउपचारांतरांतरे॥योगिनीहृदये॥मणिमुक्तासुवर्णानिदेव
दत्तानियानिच॥अनिर्म्माल्यंहृादशाब्दंताम्रपात्रंतथैवच॥पटीशा
टीचषण्मासंनैवेद्यंदत्तमात्रतः॥मोदकंकुपरं चैवयामार्द्धं नचसुं
दरि॥पट्टवस्त्रंत्रिसाभाश्चपत्तसूत्रस्त्वहस्मृतः॥यावदन्नंभवेदुष्ण
परमान्नंतथैवच॥मस्तकंरुधिरंचैव अहोरात्रेणपार्व्वति॥मुहू
र्त्तंदधिदुग्धंचआज्यंयामेनसुंदरि॥करवीरमहोरात्रं बिल्वपत्रं
तथैवच॥यवारक्तंचनिर्माल्यं भवेत्सार्द्धैकयामके॥निर्माल्यंकर
वीरञ्चपद्मस्यबिल्वकस्यच॥यामार्द्धेनमहेशानिताम्बूलंदत्त
मात्रतः॥ननिर्म्माल्यंचदाडिम्बं तथाबिल्वफलंप्रिये॥ इतिश्या

ज्ञानंदतरङ्गिण्यां उपचारनिर्णयचतुर्दशोल्लासः॥ अथशाक्ता
चारनिर्णयः॥कुलचूडामणौ॥देव्युवाच॥शृणुपुत्ररहस्यंमेस
मयाचारतत्परः॥येनकेननसिद्ध्यंतिजन्मकोटिसहस्रशः॥अनि
त्यकर्मसंन्यासीनित्यानुष्ठानतत्परः॥परस्यांदेवतायांतुसर्व्वक
र्मनिवेदयेत्॥त्यानकालंगमयेत्द्यूतक्रीडादिनासुधीः॥गमये
द्देवतापूजाजपयज्ञादिकर्म्मसु॥अंतःशाक्ताबहिःशैवासभायां
वैष्णवामताः॥सर्वदाविष्णुभावस्तुभवेत्साधकपुंगवः॥यदि
पश्येत्कुलतरुंप्रणमेत्साधकस्तथा॥कुलवृक्षमाह॥अशोकः
केशरःकर्णिकारश्चूतस्तिलस्तथा॥नमेरुश्चपीयालश्चसिंधुवा
रकदंबकौ॥मरुबकश्चम्पकःशमीकुलवृक्षाद्वादशस्मृताः॥न
मेरुरुद्राक्षपीयालोवृक्षविशेषः॥सिंधुवारनिसुंधरव्याता॥मरु
वकोफिंटीअन्यत्रापि॥श्लेष्मांतककरञ्जश्चारव्यनिम्बाश्वत्थकदं
वकः॥बिल्वोवाप्यथवाशोक इत्यष्टौकुलपादपाः॥श्लेष्मातक
वरुडाइतिरव्यातो॥तिष्ठंतिकुलयोगिन्यःसर्वेष्वेतेषुसर्वदा॥न
खयेत्कुलवृक्षाधोनचोपद्रवमाचरेत्॥यामले॥पर्व्वतेचैवआ
रामेनिर्जनेशून्यमंडपे॥चतुष्पथेकलामध्येयदिदैवाद्गतिर्भवे
त्॥क्षणंस्थित्वामनुंजप्त्वानत्वागच्छेद्यथासुखं॥चतुष्पथेदेव्याः
पीठइत्यर्थः॥तथाचोक्तंयामले॥चतुष्पथंसविज्ञेयोयत्रस्यात्तारि
णीशुभा॥तारणकर्तृत्वात्तारिणीत्यर्थः॥पीठमाहगंधर्वे॥कामरू
पंमहापीठंवाराणसीततःपरं॥नेपालंचमहापीठंयोगपट्टवर्द्धमेव
च॥पुंवस्थिरंमहादेविचिरस्थिरमतःपरं॥पूर्णशैलंमहापीठंअ
र्वुदंचततःपरं॥काश्मीरंचतथापीठंकान्यकुब्जमथोभवेत्॥दा
रुकेशंमहापीठमेकाग्रंचतथाशिवे॥त्रिस्रोतःपीठमुद्दिष्टंकामको
टिमतःपरं॥कैलासंभूतनगरंकेदारंपीठमुत्तमं॥श्रीपीठंचतथो
ङ्कारंजलन्धरमतःपरं॥मानवञ्चकुलान्तञ्चदेवमातृकमेवच
॥ गोकर्णंचतथादेविमारुतेश्वरमेवच॥अट्टनादंचविरजं
वाजगारमतःपरं॥पीठंकोल्लगिरिंचैवएनापुरमतःपरं॥
कालेश्वरंमहापीठंप्रणवंचजयंतिका॥पीठमुज्जयनीचैवन

क्षीकापीठमेवच॥ हस्तिनापूरकंपीठंपीठमुड्डीशमेवच॥ प्रयागंचै
वषष्ठीशंमायापुरप्रमेश्वरी॥ मलयंचमहापीठंश्रीशैलंचतथाप्रि
ये॥ मेरुंगिरिंमहेन्द्रञ्चवामनंचमहेश्वरि॥ हिरण्यपूरकंपीठंमहा
लक्ष्मीपुरंतथा॥ उड्डीयानंमहापीठंदारुपुरमतःपरं॥ पीठान्येतानि
देवेशिप्रशस्तंजपकर्मसु॥ फलमाह योगिनीहृदये॥ वाराणस्यां
सदापूजासंपूर्णफलदायिनी॥ ततस्तद्द्विगुणाप्रोक्तापुरुषोत्तम
सन्निधौ॥ ततोपिद्विगुणाप्रोक्ताद्वारावत्यांविशेषतः॥ सर्वक्षेत्रेषु
तीर्थेषुपूजाद्वारावतीसमा॥ विन्ध्येशतगुणाप्रोक्तागंगायामपित
त्समा॥ आर्यावर्त्तेमध्यदेशेब्रह्मावर्त्तेतथैवच॥ विन्ध्यवत्फलः
दाप्रोक्ताप्रयागेपुष्करेतथा॥ ततश्चतुर्गुणंप्रोक्तंकरतोपानदीजले
॥ ततश्चतुर्गुणंप्रोक्तंनन्दीकुण्डेचभैरवे॥ ततश्चतुर्गुणंप्रोक्तंवः
ल्मीकेश्वरसन्निधौ॥ तत्रसिद्धेश्वरीयोनौततोपिद्विगुणास्मृता॥ त
तश्चतुर्गुणाप्रोक्तालोहित्येनंदकुंडके॥ तत्समाकामरूपेतुसर्वत्रै
वजलेस्थले॥ देवीपूजातथाशस्ताकामरूपेसुरालये॥ देवीक्षेत्रंका
मरूपंविद्यतेन्यत्रतत्समं॥ अन्यत्रविमलादेवीकामरूपेगृहेगृह
॥ ततश्चतुर्गुणंप्रोक्तंनीलकूटस्यमस्तके॥ ततोपिद्विगुणंप्रोक्तंहा
रुकेशिवलिंगके॥ ततोपिद्विगुणाप्रोक्ता शैलपुत्र्यास्वयोनिषु॥ त
तःशतगुणंप्रोक्तंकामाख्यायोनिमंडले॥ कामाख्यायांमहामाया
जपपूजांसकृच्चरेत्॥ सचेहलभतेकामंपरत्रशिवरूपतां॥ एषुस्था
नेषुदेवेशियदिदेवाज्ञतिर्भवेत्॥ तदाजपपूजादिकंकृत्वानत्वागः
च्छेद्यथासुखं॥ कलामध्येकलाप्रकृतिस्तस्याः समूहमध्येगत्वापू
जादिकंकृत्वानत्वायथासुखंगच्छेदित्यर्थः॥ तथाचोक्तंसमयातं
त्रे॥ स्त्रीसमीपेकृतापूजाजपश्चपरमेश्वरि॥ कामरूपाच्छतगुणं
समुदीरितमव्ययं॥ कुलार्णवेपि॥ एकलिङ्गश्मशानंचसमूहोयो
षितामपि॥ नारींचरक्तवसनांदृष्ट्वावंदेतभक्तितः॥ गृध्रंवीक्ष्यम
हाकालींजम्बुकींयमदूतिकां॥ कृष्णमार्जारभूकाकौश्येनंक्षेमंक
रींतथा॥ कुररंचनमस्कुर्यात्इदंमंत्रंपठेन्नरः॥ ॐकृशोदरिमहाचं
डेमुक्तकेशिबलिप्रिये॥ कुलाचारप्रपन्नास्येनमस्तेशंकरप्रिये॥

पितृभूमिं द्युमूं दृष्ट्वा प्रदक्षिणमनुव्रजन्॥ प्रणम्यानेनमनुनामं
त्री सुखमवाप्नुयात्॥ ॐ घोरदंष्ट्रे कोटराक्षि किटिशब्दप्रसारिणी
॥ गुरू आववरास्कालिनमस्ते चित्तिवासिनि॥ रक्तवस्त्रं तथापुष्पं
विलोक्य त्रिपुरात्मिकां॥ प्रणम्य दंडवद्भूमौ इमंमंत्रं पठेन्नरः॥ ॐ
वंधूकपुष्पसंकाशे त्रिपुरे भयनाशिनी॥ भाग्योदयसमुत्पन्ने नम
स्तेवरवर्णिनि॥ कृष्णवस्त्रं तथापुष्पं राजानंराजपुत्रकं॥ हस्त्य
श्वरथशस्त्राणि फलकानवीरपुरुषान्॥ महिषं कुलदेवं च दृष्ट्वा
महिषमर्द्दिनीं॥ प्रणम्यजयदुर्गांत्वांसचविघ्नैर्नलिप्यते॥ फलका
नटाः इतिख्यातं॥ ॐ जयदेवि जये चंडे त्रिपुराद्ये त्रिदैवते॥ भ
क्तेभ्योवरदे देवि महिषघ्नि नमोस्तुते॥ गंगाजलं समालोक्य कृ
षं पल्लवरानन॥ दृष्ट्वा च भैरवींदेवीं प्रणम्य विमृषेन्मनुं॥ ॐ घोर
विघ्नविनाशाय कुलाचारसमृद्धये॥ नमामि वरदे देवि मुण्डमा
लाविभूषिते॥ रक्तधारसमाकीर्णे वरदेत्वां नमाम्यहं॥ सर्वविघ्न
हरे देवि नमस्ते हरवल्लभे॥ यः शिवारुदितंश्रुत्वा शिवदूतीं शुभप्र
दां॥ प्रणम्य साधको भूत्वा तस्य कामः करे स्थितः॥ एतेषां दर्शने
चैव यदि नैवं प्रकुर्वते॥ शक्तिमंत्रं पुरस्कृत्य न स्य सिद्धिर्न जायते
॥ एतेषां मारणोच्चाटन हिंसनं वाग भवादिषुभिः॥ क्रियते यदि पा
पामो देवीभक्तः कथं भवेत्॥ एतत्कर्तुमशक्तोपस्तस्यार्थस्तव
मालिखेत्॥ कुलचूडामणौ॥ देव्युवाच॥ ॐ त्रिपुरा त्रिपुरेशी च
सुंदरी परसुंदरी॥ श्रिमानिनीचसिद्धात्मा महात्रिपुरसुन्दरी॥ प्रक
टास्यात्तथागुप्ता तथागुप्ततरापरा॥ सम्प्रदाया कुला कौला रहस्या
तिरहस्यगा॥ परापररहस्याचतथाकामेश्वरीतथा॥ भगमालि
नीनित्यक्लिन्ना भेरुण्डवन्हिसुंदरी॥ महाविद्येश्वरी दूतीत्वरिता
कुलसुंदरी॥ नित्यानीलपताका च विजयासर्वमंगला॥ ज्वलांशुमा
लिनी चित्रा वशिनी शुभगाकुला॥ पूर्णाख्या च तथावत्सकामेशी
मेदिनीतथा॥ विमलाअरुणादेवीजयंतीकुलभैरवी॥ सर्वेश्वरी
तथाकौली वागीशीसर्वकामिनी॥ सिद्धेश्वरीतथा चोग्रादुर्गामहि
षमर्द्दिनी॥ स्वप्नावतीशूलिनीचमातंगीसुरसुंदरी॥ महाकालीम

होग्राचचित्ररूपामहोदरी॥त्राणविद्यातथैकाक्षीचैकपादामहां
कुशा॥वामाशिवातथाज्येष्ठास्वरूपाचारुहासिनी॥त्रिखंडात्रि
शिखागौरीविन्ध्याचलनिवासिनी॥क्षोभिनीनादिनीभद्राललि॰
ताबहुरूपिणी॥सर्वसम्पत्करीताराभवानीविश्ववासिनी॥कुटे
श्वरीमहाविद्याकथितास्तवभैरवी॥उपासकान्महादेविशृणुचै
कमनाःस्वयं॥मनुश्चन्द्रकुबेरश्चमन्मथास्तदनन्तरं॥लोपामुद्रा
मुनिर्नन्दीशक्रःस्कंदशिवस्तथा॥क्रोधभट्टारकश्चैवपंचमीचप्रकी
र्त्तिता॥दुर्वासाव्याससूर्य्योचवसिष्ठश्चपराशरः॥और्व्वोवान्हिर्य
मश्चैवनिर्ऋतोवरुणस्तथा॥वायुर्विष्णुःस्वयंभुश्चभैरवोगाणप
स्तथा॥अनिरुद्धोभरद्वाजोदक्षिणामूर्तिरेवच॥गणपाकुलपाश्चै
वलक्ष्मीगङ्गासरस्वती॥धात्रीशेषःप्रमत्तश्चउन्मत्तःकुलभैरवः
॥क्षेत्रपालोहनूमांश्चदक्षोगरुडएवच॥काश्यपःकौत्सकुम्भौ
चजमदग्निर्भृगुस्तथा॥बृहस्पतिर्यदुश्रेष्ठोदत्तात्रेयोयुधिष्ठिरः॥
अर्जुनोभीमसेनश्चद्रोणाचार्य्योवृषाकपिः॥दुर्योधनस्तथाकुंती
सीताचरुक्मिणीतथा॥सत्यभामाद्रौपदीचउर्व्वशीचतिलोत्त॰
मा॥पुष्पदंतोमहावृद्धोवाणःकालश्चमंदरः॥कैलासःक्षीरसिंधु
श्चउदधिर्हिमवांस्तथा॥नारदश्चमहावीराःकथितावीरसाधकाः
॥महाविद्याप्रसादेनस्वस्वकर्मसमन्विताः॥एतेषांवत्सनामानिवि
द्याविद्योपसेवितः॥प्रातःकालेशुचिर्भूत्वायःपठेत्प्रयतात्मवान्
॥पूजयेच्चशुचिर्भूत्वाप्रसीदामिकुलीनये॥अशुचिर्व्वानिरालंबा
लम्ब्यचैवकुलांतिके॥नित्यपूजाफलंतस्यददामिवरमीप्सितं॥चक्र
संकेतकंवत्सगुरुसंकेतकन्तथा॥नामसंकेतकंचैवमंत्रसंकेत
कन्तथा॥समयाचारसंकेतंनज्ञात्वायोऽप्रवर्त्तते॥जपपूजार्च्चना
होमो अभिचारायकल्पते॥इदंस्तोत्रंपठित्वातुभवेत्संकेतमा
न्ध्रुवम्॥ इतिकुलचूडामणौनित्यसंकेतस्तोत्रंसमाप्तम्॥ देह
पातेपिमोक्षःस्यात्सम याचारपालनात्॥ इतियामलवचनात्॥
फलश्रुतेः काम्यमपि॥ अथशिवाबलिः॥ विश्वसारे॥ शिवाबलिं
निवेद्याथतोषयेज्जगदम्बिकाम्॥ नददातिबलिंयस्तुशिवायाः

शिवत्वन्नये॥सपापिष्ठोनसज्येतकुलदेव्याःप्रपूजने॥इतियाम
लवचनात्॥पशुरूपांशिवांदेवींयोनार्च्चयतिनिर्ज्जने॥शिवा
रवेणतस्याशुसर्व्वंनश्यतिनिश्चितं॥जपपूजाविधानानियत्किंचि
त्सुकृतानिच॥गृहीत्वाशापंदत्वाचशिवारोदतिनिर्जने॥तंत्रे॥
कालीकालीतिवक्तव्येतत्रोमाशिवरूपिणी॥पशुरूपधरायाति
परिवारगणैःसह॥अवश्यमन्नदानेननिपतंतोवधेच्छिवां॥नि
त्यश्राद्धंयथासंध्यावन्दनंपितृतर्पणं॥तथैवकुलसेव्यानांनित्य
ताकुलपूजने॥यामले॥बिल्वमूलेनदीतीरेश्मशानेवापिसाधकः
॥मांसप्रदानंनैवेद्यंसंध्याकालेनिवेदयेत्॥बलिमंत्रमाह॥ॐ
गृह्णदेविमहाभागेशिवेकालाग्निरूपिणी॥शुभाशुभफलंव्यक्तं
ब्रूहिगृण्हबलिंतव॥एवमुच्चार्यदातव्योबलिंकुलजनप्रियः॥
एकदात्यज्यतेयत्रसाधकानांहितायच॥तदैवसर्व्वशक्तीनांप्री
तिःपरमदुर्लभा॥पशुशक्तिर्नरःशक्तिःपक्षिशक्तिर्यथाक्रमात्॥
पूजनाद्द्विगुणंकर्म्मसगुणंसाधयेद्यतः॥तेनसर्व्वप्रयत्नेनकर्त्तव्यं
साधनंमहत्॥भुक्त्वारौतिपदेशान्यामुखेवनरौतिसुस्वरं॥तदेवमंगलं
तस्यनान्यथाभवतिध्रुवं॥यदिनगृह्यतेनूनंतदानैवशुभंभवेत्
॥एवंज्ञात्वामहेशानिशांतिस्वस्त्ययनंचरेत्॥इतिशिवाबलिः
॥दहेत्तृणंयथावह्निस्तथाशत्रूनजयेत्सदा॥अन्यत्रापि॥स्वयं
ब्रह्मास्वयंविष्णुःस्वयंरुद्रोनसंशयः॥अंतेनिरामयंब्रह्ममंत्रीभव
तिनान्यथा॥यानारीप्रजपेद्विद्यांसाभवेत्परमेश्वरी॥काकवंध्या
चयानारीवन्ध्यावामृतपुत्रिणी॥पूजयित्वालभेत्पुत्रंसत्यंसुचिर
जीविनं॥स्वामिनोदुर्लभासास्यात्धनधान्यसमन्विता॥अंतेचजायते
गौरीसत्यंसत्यंनसंशयः॥योगिनीहृदये॥महाविद्यांजपेन्नित्यंस्मरे
द्वापिसमाहितः॥तस्यगेहेवसेल्लक्ष्मीर्जिव्हायांचसरस्वती॥हृदये
चवसेद्देवीनारायणइतिश्रुतिः॥ब्रह्मास्तिकण्ठदेशेचअहंतिष्ठामि
सन्मुखे॥एकीभूयसमंतैश्चदेवीरक्षतिसाधकं॥योगिनीहृदये॥ल
क्षमेकंजपेद्देवीमहापापैःप्रमुच्यते॥लक्षद्वयेनपापानिसप्तजन्म
कृतान्यपि॥लक्षत्रयेणपापानिहन्तिजन्मसहस्रकं॥चतुर्लक्षज

पान्मंत्रीवागीश्वरसमोभवेत्॥ पंचलक्षाद्दरिद्रोपिसत्वरंश्रीस
मोभवेत्॥ जप्त्वाषड्लक्षंदेवेशिमहाविद्याधरोभवेत्॥ जप्त्वैव
सप्तलक्षाणिखेचरीसदृशंभवेत्॥ अष्टलक्षप्रमाणंतुजप्त्वावि
द्यांमहेश्वरि॥ अणिमाद्यष्टसिद्धीशोजायतेनात्रसंशयः॥ नव
लक्षजपाद्देविरुद्रमूर्त्तिरिवापरः॥ कर्त्ताहर्त्तामहादेविलोकमति
मतःप्रभुः॥ दशलक्षफलंदेवि वर्णितुंनैवशक्यते॥ श्रीकमे॥
मंत्रपाशेनदेवेशिदेवतानीयतेध्रुवं॥ साधकस्यविनाकार्य्यसिद्धिं
कृत्वागमिष्यति॥ आगमिष्यतीस्वत्रनिषेधार्थोकारोविद्यते॥ अ
थदेवीप्रणामफलं॥ अष्टोत्तरशतंयस्तुदेव्याःकुर्य्यात्प्रदक्षिणं॥
सर्वकामंसमासाध्यपश्चान्मोक्षमवाप्नुयात्॥ भविष्ये॥ येवंदं
तिनरादुर्गांश्रद्धयापरयान्विता॥ अश्वमेधफलंतेषांविष्णुलोकं
व्रजंतिच॥ शाठ्येनापिनमस्कारंयःकरोतिसकृन्नरः॥ भगवत्यै
तथाभक्त्यासगच्छतिसुरालयम्॥ सर्वयज्ञोपवासेषुसर्वतीर्थेषु
यत्फलं॥ तत्फलंलभतेवीरसयातिपरमांगतिं॥ दशमेरुक्मि
णीवचनं॥ कात्यायनिमहामायेमहायोगिन्यधीश्वरि॥ नंदगोप
सुतंदेविपतिंमेकुरुतेनमः॥ हेकात्यायनिकात्यायनमुनिनिमित्त
प्रादुर्भूते॥ हेमहामायेमहतीचासौमायाचेतिमहामाया॥ ब्रह्म
विष्णुशिवादीनामपिमोहहेतुत्वान्महामाया॥ विष्णुःशरीरग्रह
णमहमीशानएवच॥ कारितास्तेयतोस्तत्वांकस्तोतुंशक्तिमान्
भवेत्॥ इतिमार्क्कंडेयपुराणाच्च॥ हेमहायोगिनिमहायोगोज
गतःस्थ्यादिकारणं॥ त्रिगुणात्मिकामायाविद्यतेयस्याःसामहा
योगिनी॥ हेअधीश्वरिईश्वराणांशिवविष्णुब्रह्मणामीश्वरि॥ सै
वसर्वेश्वरेश्वरीतिमार्क्कंडेयवचनात्॥ नंदगोपसुतंनंदनंदनत्वेना
भिमतं॥ परमेश्वरंश्रीकृष्णंतथैवदेवतारूपं॥ मेममपतिंपाणिग्र
हीतारंकुरुत्वत्प्रसादंविनाकिमपिकार्यंनसिद्ध्येत्॥ अतश्चतुभ्यं
नमः॥ कायिकवाचनिकमानसोनमस्कारः॥ इतिशाक्तानंदतरं
गिण्यांजपादिफलनिर्णयःपंचदशोल्लासः॥ महिषमर्द्दिनीतंत्रे॥
देव्युवाच॥ केनवापूज्यतेविद्याकेनवानप्रजप्यते॥ फलाभावश्च

नियतंकथंनाथप्रजायते॥श्रीमहादेवउवाच॥तवनाविदितंकिं
चिज्जगदेतच्चराचरं॥तथापिशृणुचार्वंगिरहस्यंपरमेश्वरि॥क
लिकालेमहेशानिपाखंडाबहवोजनाः॥संगदोषान्महेशानितत्क्ष
णाद्धानितांव्रजेत्॥तस्मात्सयत्नतोदेविसंसर्गंवर्जयेत्सुधीः॥वरं
चंडालसंस्पर्शंकुर्य्यात्तुसाधकोत्तमः॥तथाप्यस्पृश्यगणकंसर्वदा
तंपरित्यजेत्॥दूषितावहुकालेषुभारतेवहवःप्रजाः॥अतएवम
हेशानिसर्व्वेसंसर्गदूषिताः॥घटकंब्राह्मणंदेविसंस्पर्शेयत्नत
स्त्यजेत्॥अदीक्षितंमहादेविसंस्पर्शेयत्नतस्त्यजेत्॥अदीक्षि
तानांसंसर्गेसिद्धिहानिःपदेपदे॥अतएववरारोहेसंसर्गंयत्नत
स्त्यजेत्॥भारतेवहवोदोषाःकलिकालेसुरार्च्चिते॥ब्राह्मणाःकलि
कालेतुशूद्रगेहेवरांगिनि॥पुराणवाचनाशक्तादम्भमात्सर्य्यतत
पराः॥पापिष्ठाब्राह्मणास्तेतुचांडालसदृशाःप्रिये॥नतूच्चरेत्पुरा
णानिशूद्रगेहेकलौयुगे॥शूद्रगेहेमहेशानिपुराणंप्रपठेद्द्विजः॥
एषांसंसर्गमात्रेणसर्वावस्थाभवेतिहि॥संसर्गात्सिद्धिहानिः
स्यान्नसिद्ध्यतिकदाचन॥कलौचभारतेदेविनिंदकावहवोज
नाः॥शिवनिंदापराश्चैवविष्णुनिंदापरायणाः॥सर्वेषांदेवतानां
चदेवीनांचतथैवच॥सततंकुर्व्वतेनिंदांनात्रकार्याविचारणा॥
परस्त्रीसंगमाच्चैवपुत्रमुत्पादयन्तिच॥आत्मानंवैष्णवंमत्वा
अधमाभारतेकलौ॥कर्णेकण्ठेतथाहस्तेहृदयेनगनंदिनि॥वि
धृत्यतुलसीमालांतिलकंहरिमंदिरं॥गृण्हीयाद्धरिनामानिसु
स्वराणिगृहेगृहे॥अन्नस्यसंचयंकृत्वापाषंडामानवाधमाः॥
तस्यपापंमहेशानिवर्णितुंनैवशक्यते॥स्वधर्म्मेनिरतोभूत्वा
हरेर्नामवदेद्यदि॥तदापापान्यशेषाणिनाशयत्येवनिश्चितं॥वि
हायसंध्यांगायत्रींहरिनामस्मरेद्यदि॥यान्यक्षराणिनाम्नश्चवसं
तिचशुचिस्मिते॥तानिसंख्यान्यनेकानिपापानिचपदेपदे॥अन्नं
जलंतथापुष्पंयद्दत्तंविष्णवेप्रिये॥अन्नंविष्ठासमन्तस्यजलंमू
त्रसमंस्मृतं॥गृहेगृहेमहेशानिवैष्णवीवैष्णवागणाः॥संकरावै
ष्णवायत्रतद्देशःपतितंसमं॥गीतमत्तावाद्यमत्ताब्राह्मणान्नृत्यतत्पराः

गीतेनजायतेभावोब्राह्मणानांगृहेगृहे॥सम्प्रवानहिचार्वंगिनर
कस्यपदंध्रुवं॥भारतेब्राह्मणाःसर्व्वेपृथिव्यांपादताडनं॥येकरि
ष्यंतिचार्वंगिविष्णोरग्रेद्विजाधमाः॥पादताडनसंख्याश्चतस्य
वैपुरुषान्व हून्॥स्वर्गाच्चनरकंदेवितेगच्छंतिनचान्यथा॥पू
जाकालेतुचार्वंगिध्यानानंदोभवेद्यदि॥तदैवनित्यंचार्व्वंगियेकु
र्व्वन्तिद्विजातयः॥विष्णुदुर्गाशिवाग्रेवातदापापंविनश्यति॥
गीतभावमयोभूत्वायदिनृत्यंकरोतिहि॥कोटिवंशान्समादाय
सद्विजोनरकंव्रजेत्॥कलिकालेभारतेचब्राह्मणागीततत्पराः
॥सदावाद्यरताभूत्वा नृत्यंतिब्राह्मणाधमाः॥तेषांसंसर्गमात्रे
णसर्व्वंचहानिताभियात्॥तस्मात्तुयत्नतोदेविसंसर्गंनैवकार
येत्॥कलौतुभारतेवर्षेसंसर्गान्नैवसिद्ध्यति॥यदिसिद्ध्यतिचार्वं
गितदाबहुदिनैःप्रिये॥भारतंकलिकालेचसर्वदोषमयंसदा॥
अत्रैवचंचलापांगिवर्त्ततेमोक्षसाधनं॥महाविद्यांमहामायांए
कदायदिचोच्चरेत्॥सर्वपापविनिर्मुक्तोमहामोक्षंसगच्छति॥वर्ण
संकरजातीनांसंसर्गंनैवकारयेत्॥वर्णसंकरजातीनांवैष्णवानां
सहप्रिये॥शाक्तःशैवोवैष्णवश्चसंसर्गंयत्नतस्त्यजेत्॥अथप्राय
श्चित्तम्॥पापनाशककर्ममात्रंप्रायश्चित्तं॥देहस्थंसर्वपापंचनाश
[illegible]च्छति॥तत्पापस्यापनेदेविविद्यात्मनांजपंकुरु॥कामम
थाचे[illegible]विमन्मथंपरमेश्वरि॥अष्टोत्तरशतंजप्त्वातस्मात्सापाद्वि
मुच्य[illegible]॥यामले॥जम्बूनदस्यमालिन्यंपरिशुद्ध्यंयथाग्निना॥अ
नात्म[illegible]स्यकलुषंप्रायश्चित्ताग्निनातथा॥प्रायश्चित्तंतुपापानांमू
लमंत्रसहस्रकं॥गायत्रींवाजपेद्देविसर्वपापप्रणाशिनीं॥अथधृ
तंकवचनाशप्रायश्चित्तं॥यामले॥विधृतंकवचंदेवियदिनश्यति
कर्हिचित्॥तत्रोपायंप्रवक्ष्यामिशृणुष्वकमलानने॥उपविश्यत
थाचम्यभूतशुद्धिमथाचरेत्॥षट्चक्राणिविचिंत्याथगुरुंशिर
सिचिंतयेत्॥अनुलोमविलोमाभ्यांमातृकाबीजसंपुटं॥कवचंतत्
पठेद्देविद्यकोरत्तमनुक्रमात्॥ततोजपेन्महाविद्यांसहस्रंवाशतं
क्रमात्॥धारयेत्तुप्रतिष्ठाप्यनूतनंकवचंततः॥विलिख्यकवचं

देविरक्तसूत्रेण वेष्टयेत्॥ वेष्टयित्वा महादेवि स्वर्णादौ स्थापयेद्बु
धः॥ पंचामृतैः पंचगव्यैः स्नापयित्वा शुभेऽहनि॥ प्राणप्रतिष्ठामा
त्रेण प्राणांस्तत्र नियोजयेत्॥ संपूज्य देवतारूपं कवचं सर्वकाम
दं॥ कवचं धारयेद्देवि यथास्थानेषु साधकः॥ तत्तद्देवताप्राणांस्त
त्र नियोजयेदित्यर्थः॥ अथ यंत्रनाशप्रायश्चित्तम्॥ नवरत्नेश्व
रे॥ यदि प्रतिष्ठितं यंत्रं देवाद्देवि विनश्यति॥ उपोषणमहोरात्रमा
दरेण समाचरेत्॥ येन स्वर्णादिना यंत्रं द्रव्येण परिनिर्म्मितं॥ विलि
ख्य यंत्रं तत्पात्रे देवतां परिपूजयेत्॥ उपचारैः षोडशभिः शक्तितः
सुसमाहितः॥ अयुतं प्रजपेन्मंत्रं पूजयित्वा यथाविधिः॥ विलोड्य
तत्तोयं मंत्री पीत्वा भक्षणमाचरेत्॥ तावत्कालं ब्रह्मचर्य्यं यावद्यं
त्रं समाहरेत्॥ पुनर्यंत्रं नवं चान्यदाहरेत् श्रद्धयान्वितः॥ आहृत्य
तु पुनर्यंत्रं प्रतिष्ठां च समाचरेत्॥ अथ पूजाकाले यंत्रादिपतनप्रा
यश्चित्तम्॥ यंत्रं यदि पतेद्देवि पूजाकाले कदाचन॥ लिंगं वापि शि
लां वापि तत्फलं शृणु पार्वति॥ आयुर्हानिर्धनहानिर्बन्धुनाशस्त
थैव च॥ भवतीति विनिश्चित्य प्रायश्चित्तमथाचरेत्॥ त्रिरात्रमेक
रात्रं वा उपवासमथाचरेत्॥ मूलमंत्रं जपेद्देवि सहस्रं साष्टकं तथा
॥ जवापुष्पैर्जुहुयाच्च शतमष्टोत्तरं तथा॥ ब्राह्मणान्भोजयेच्छक्त्या
भक्तिनम्रः समाहितः॥ अथ मालानाशप्रायश्चित्तं॥ मालास्व
द्धस्तात्तथा चैव विनश्यति॥ सहस्रं तत्र संजप्य ब्राह्मणं॥ वि
येन्नतः॥ भोजनं ब्राह्मणानां तु सर्वानिष्टस्य नाशनं॥ गायासु
पेत्साष्टशतं भक्त्या समाहितः॥ ततोऽपरां नवां मालां तज्ज्ञा॥
वरानने॥ गृह्णीयात्तु कृते चैवं न विघ्नैरभिभूयते॥ गायत्रीं जपेदि
ति तत्तद्देवतागायत्रीं जपेदित्यर्थः॥ यामले॥ महापातकयुक्तोपि
गायत्रीं प्रजपेद्यदि॥ सत्यं सत्यं महादेवि मुक्तो भवति तत्क्षणात्॥
अशुचिर्न स्पृशेन्मालां करभ्रंशं न कारयेत्॥ शब्दे जाते भवेद्रोगः क
रभ्रष्टा विनाशकृत्॥ छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत्॥
॥ जपेन्न सिद्धसंस्पर्शे क्षालयित्वा यथोचितं॥ पंचगव्येन मंगल
वारिणा वा॥ प्रमादात्पतिता हस्तात् शतमष्टोत्तरं जपेत्॥ तंत्रांतरे॥

हस्तात्पततिचेन्मालानजप्तव्यात्रसंबुधैः॥ प्रायश्चित्तंविधातव्यंजपे
न्मंत्रंसहस्रकं॥ सहस्रंशतंच उभयमपिशास्त्रार्थः॥ समर्थासमर्थ
भेदेनव्यवस्थेति॥ जीर्णेसूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत्॥ मूलमं
त्रंशतंजपेत्॥ छिन्नाभवतिचेन्मालापूजांकृत्वाततोधिकां॥ प्रति
ष्ठांपूर्ववत्कृत्वापुनर्जापंसमाचरेत्॥ शिवेरुष्टेगुरुस्त्राता गुरौरुष्टे
नकश्चन॥ गुरुक्रोधोपशमनप्रायश्चित्तम्॥ उपवासंगुरुक्रोधेकृ
त्वातंतुप्रसादयेत्॥ यावत्प्रसादंनायातितावद्वैभोजनंसजेत्॥ गु
रौप्रसन्नेभुंजीनएवंदोषोन[illegible]यते॥ अथानिवेदितभोजनप्रायश्चि
त्तम्॥ मत्स्यपुराणेसूक्तं॥ अनिवेद्यमभुंजीतमत्स्यमांसादिकंचय
त्॥ अन्नंविष्टासमंतेयंजलंमूत्रसमंस्मृतं॥ अन्यत्रापि॥ अदत्तंनै
वभोक्तव्यमभक्ष्येणसमंस्मृतं॥ पत्रंपुष्पंफलंमूलंअन्नपानौषधं
प्रिये॥ अनिवेद्यंचभुंजीतप्रत्याहारायकल्प्यते॥ कालिकापुराणे॥
महावीरोमुनिर्वापिब्राह्मणश्चेतरोपिवा॥ मद्यंभक्ष्यंसमर्थंतुप्रद
त्तःस्याद्यथातथा॥ प्रदद्यादिष्टदेवेभ्योगृह्णातिचततःस्वयं॥ याम
ले॥ यद्यथाभक्ष्यतेभक्ष्यंतत्तथैवप्रदापयेत्॥ अन्यथातत्रदानेन
तत्तत्फलमवाप्नुयात्॥ यद्यद्द्रव्यंयेनयेनप्रकारेणभोक्तव्यम्॥ तत्त
द्द्रव्यंतेनतेनप्रकारेणदातव्यं। नान्यथाप्रकारेणदातव्यं॥ अनिवेद्य
[illegible]नअप्रहस्तीनारकी॥ हरेरि[illegible]त्यपलक्षणम्॥ तथाचोक्तंका
लोपेनाकर्त्तव्याधोमुखीतथा॥ [illegible]नादिकंचयत्॥ अदत्ता
नथा॥ नाभिपद्मंलसहोमेनन्नविद्भिः[illegible]नश्वतं॥ प्रायश्चित्तीभ
रग्रेतुमेखलानांपरिस्थितां॥ गजकुम्भ[illegible]वेन्क्रारां[illegible]व्याउपलक्षण
[illegible]॥ पश्चिमाभिमुखीयोनिंकुंडकोणे[illegible]यामले॥ अनिवेद्यमहेशा
निभुंजानःपातकीभवेत्॥ इष्टमंत्रशतंजप्त्वातस्मात्पापाद्विमुच्य
ति॥ नचपोयदेवार्चनरतःसतन्नैवेद्यभक्षकः इतिवचनाद्देवतां
तरदत्तनैवेद्यभक्षणं नकर्त्तव्यमितिवाच्यम्॥ अग्राह्यंशिवनिर्मा
ल्यमितिवचनम[illegible]निनामेव॥ किंतुज्ञानिनांप्रसादभक्षणमावश्य
कमेव॥ तथाचोक्तंयामले॥ शिवदत्तंविष्णुदत्तंगिरिजादत्तमेवच॥
प्राप्तिमात्रेणभोक्तव्यमन्यथापातकीभवेत्॥ अग्निपुराणे॥ शिवद

त्तंविष्णुदत्तंगिरिजादत्तमेवच॥ नैवेद्यमुदरेकृत्वानरःसायुज्यमा
प्नुयात्॥ लैङ्गे॥ लैङ्गंत्यक्त्वातुनैवेद्यंभुंक्तेमोहाद्धिमूढधीः॥ कुंभी
पाकेषुघोरेषुपच्यतेनात्रसंशयः॥ एतद्भिन्नलिंगपरं॥ स्कंदपुराणे
॥ वाणलिंगेस्वयम्भूतेस्फाटिकेहृदिसंस्थिते॥ अत्रशतक्रतोःपुण्यं
शंभोर्नैवेद्यभक्षणात्॥ आदित्यपुराणे॥ निर्माल्यंधारयेद्यस्तु
शिरसापार्व्वतीपतेः॥ राजसूयस्ययज्ञस्यफलमाप्नोत्यनुत्तमं॥ त
थाच ब्रह्मत्वं[illegible]वान्ब्रह्मायोगंचान्येमहर्षयः॥ विष्णुत्वमपिवि
ष्णुश्चशिरःकेननसेव्यते॥ फलंहरतिनिर्माल्यंपेयंतुचरणोदकं॥
नैवेद्यसर्वपापानिशंभोर्हरतिनिश्चितं॥ निवेदितंचनैवेद्यंभुंजीत
नात्रसंशयः॥ नहियेभुंजतेमूर्खानरकंतेप्रपच्यते॥ नैवेद्यंचोपभु
जीततत्वात्तद्भक्तिशालिने॥ अन्यथानैवसिद्धिःस्याद्द्वैकोनरकंव्र
जेत्॥ इत्यादिनातंत्रोक्तानिवचनानीतिनिवेदितमात्रंभोक्तव्य
म्॥ नत्वनिवेदितं॥ नैवेद्यनिंदकंदृष्ट्वानृत्यंतियोगिनीगणाः॥ रक्ता
णोद्यताःसर्व्वामांसास्थिचर्व्वणोद्यताः॥ तस्मान्निवेदितंदेव्यैदृष्ट्वा
श्रुत्वाचमानवः॥ ननिन्देन्मनसावाचाकुष्ठव्याधिपरांमुखइतिव
चनात्॥ कालीकुलसर्वस्वे॥ कुमारीतन्त्रे॥ देवतानांचनैवेद्यंस्त्री
भ्योदद्यान्नकुत्रचित्॥ तंत्रे॥ स्वशक्तिभ्योन्यशक्तिभ्योदत्वाचस्व
यमाहरेत्॥ यामले॥ अनेकधायशोरन्तं[illegible]
भ्यःप्रकुप्यतेदेवितत्व[illegible]॥ सहस्रंतत्रसंजप्यब्राह्मणान्॥ वि
तंकृत्वाचदक्षि[illegible]पेत्॥ तुसर्वोनिष्ठस्यनाशनं॥ गायनिसु
त्॥ यामले॥ [illegible]सपपूजनः॥ ततोऽपरांनवांमालांनज्ञाः॥
चवलिंतत्रमूलं[illegible]अष्टशतंजंनविघ्नैरभिभूयते॥ [illegible]॥ स
हस्रिये॥ शाक्तःशैवोवैष्णवश्चसंसर्गयेत्नतत्त्यजेत्॥ तेषांमुखंस
मालोक्यसूर्यदर्शनमाचरेत्॥ इष्टमंत्रंशतंजप्त्वातस्मात्पापाद्वि
मुच्यति॥ इतिवैदिककर्ममात्रंइष्टदेवताप्रीत्यर्थंकार्य्यम्॥ तंत्रे
॥ देवताप्रीतिकामस्तुकर्मकुर्यात्सदाशिवे॥ अन्यकामस्तुचेत्क
र्मकरोतिविधिमोहितः॥ फलंनजायतेतस्यदेवस्तस्मैप्रकुप्यति
॥ अन्यच्च॥ येत्वकामानराःसम्यग्भक्तिंकुर्वंतिशोभने॥ तेषांदद्या

तिविश्वेशो भगवान्मुक्तिमीश्वरः॥ सकामानां सायुज्यादि मुक्तिः॥ सा
युज्यं न मुक्तिः शरीरसंबंधात्॥ अकामानां निर्वाणमेव मुक्तिः परम
पुरुषत्वात्॥ न स पुनरावर्त्तत इति श्रुतेः॥ अन्यत्रापि देवताप्रीति
कामस्तु कर्म कुर्यात् सदाशिवे॥ देवताप्रीतिमुत्पन्ने भुक्तिमुक्ति
फलप्रदः॥ अकामः सात्विको लोके परत्रैव हि निवेदयेत्॥ तेनैव
स्थानमाप्नोति यत्र गत्वा न शोच्यते॥ अत्यंतदुःखविरहं मुक्तिरित्युच्य
ते बुधैः॥ यामले॥ धर्माधर्माविति प्रोक्तौ द्वौ पाशौ कर्मसंगिनौ॥ दे
वताप्रीतिकर्माणि न बन्धाय विमुक्तये॥ मूढ्या प्रतीयन्ते देवस्त्वकामे
न हि जोत्तमाः॥ इत्यादिवचनात्॥ स्वकीयभोगजनककर्मनाश
त्वेन निष्फलमेव॥ ईश्वरप्रत्युद्देश्यकर्मशरीरावच्छिन्नादृष्टविशेष्या
त्मकलिङ्गशरीरनाशकत्वे सफलमेव॥ लिंगशरीरध्वंसं विना न मो
क्षः॥ लिंगदेहमाहगन्धर्वे॥ अंतःकरणमध्ये तु ज्योतिरात्मा प्रवर्त्तते
॥ लिंगदेहं तु तं प्राहुर्योगिनस्तत्त्ववेदिनः॥ श्रीभागवते द्वादशे॥ घटे
भिन्ने घटाकाश आकाशः स्याद्यथा पुनः॥ एवं देहे मृते जीवो ब्रह्म सं
पद्यते पुनः॥ देहे मृते लिंगदेहे ध्वस्त इत्यर्थः॥ अन्यथा पुनः पुनर्जन्म
मृत्युश्च भवत्येव॥ तथा चोक्तं॥ विष्णुधर्मोत्तरे॥ तत्क्षणादेव गृह्णा
ति शरीरमातिवाहिकं॥ केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचि
नोह ... जीवश्च हस्तान्मे बान्धवैः सह कृते नरः॥ पूर्णे संवत्सरे देहमतो
लोपेन कर्त्तव्याधोमुखी तथा॥ पैतृकेन कर्मणा॥ तत्क्षणान्मृ
तथा॥ नाभिपद्मं लसद्धोमेनान्त्र विद्धि प्रकल्पितं ... हमार्कंडेय
रग्रे तु मेखलानां परिस्थितां॥ गजकुम्भवदाकारां ... णं वपोवस्था
...स्थीं ... त्रिमाभिमुखीं योनिं कुंडकोपे ... नाशयेदर्कं प्रमाणमि
तिचेत्॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं॥ ॥ इति शाक्तानं
दतरङ्गिण्यां संसर्गदोषादिनिर्णयः षोडशोल्लासः॥ ॥ अथ कुण्डवि
धिः॥ गोविन्दवृन्दावने॥ भूमेः परिग्रहं कुर्यात् यावदायतनं भवेत्॥ मा
षभक्तबलिं दद्यात् यथाविधि विधानतः॥ गुरुराचम्य विधिवत् आ
सने उपविश्य च॥ स्वर्गपातालमध्ये च ये देवा वास्तुदेवताः॥ गृह्णन्तु
मं बलिं दृष्टा सुप्रीता यान्तु स्वमंदिरं॥ ॐ मातरो भूतवेतालापैशाचान्येव

लिकांक्षिणः॥ देव्याः परिसदा ये च ते ते पि गृण्हंत्विमं बलिं॥ एवं वलि
हृ पे दत्वा मंडपं कारयेद्गुरुः॥ शारदायां॥ पुण्याहं वाचयित्वा तु मंड
पं रचयेच्छुभं॥ पंचभिः सप्तभिर्हस्तैर्नवभिर्वामितान्तरं॥ षोडशस्तं
भसंयुक्तं चत्वारस्तेषु मध्यगाः॥ चतुर्विंशत्यंगुलाढ्यं हस्तं चंद्रवि
दो विदुः॥ गृहादि कुंडकरणं मंडपं वेदिकं तथा॥ मानांगुलेन कर्त्तव्यं
नान्यैरपि कदाचन॥ मानांगुलमाह तंत्रे॥ कर्तुर्दक्षिणहस्तस्य मध्य
मांगुलपर्वणः॥ मध्यस्य दीर्घमानेन मानांगुलमुदीरितं॥ सिद्धांत
शेखरे॥ स्थूलादर्कांगुलोच्छ्रायं मंडपं स्थलमीरितं॥ नारिकेलद
लैर्वंशैः छादयेन्मंडपं ततः॥ चतुर्द्वारसमायुक्तं कदलीस्तंभभूषितं॥
आम्रपत्रसमायुक्तं रज्जुभिः परिवेष्टितं॥ अष्टदिक्षु ध्वजानष्टौ चतु
र्दिक्पालवर्णतः॥ दिक्पालवर्णमाह शारदायां॥ पीतरक्तासितौ
धूम्रः शुक्लो धूम्रः शितावुभौ॥ गौरोऽरुणक्रमादेते वर्णतः परिकीर्त्ति
ताः॥ नास्ति होमो विना कुंडं तस्मात्कुंडं प्रशस्यते॥ कुंडस्य रूपं जानी
यात् परमं प्रकृतेर्वपुः॥ प्राच्यां शिरः समाख्यातं बाहू दक्षिण सौ
म्ययोः॥ उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे॥ पूर्वापरायतं
सूत्रं विन्यसेद्धस्तमानतः॥ दक्षिणोत्तरगं सूत्रं तथैव च प्रविन्यसे
त्॥ तदग्रयोः प्रविन्यस्य तथा सूत्रं चतुष्टयं॥ चतुरस्रं महाकुंडं स
र्वयागे प्रशस्यते॥ यावान्कुंडस्य विस्तारः [illegible]
परिमाणमाह॥ यामले॥ शतो [illegible] यसजपाब्ब [illegible] ह्य [illegible] नि॥ वि
होमे रत्निम [illegible] ते॥ [illegible] तुसवानि ष्टस्य नाशनं॥ गायनिसु
दीरितम्॥ नि [illegible] ासम [illegible] पपूर्ज [illegible] ः॥ ततोऽपरां नवां मालां नज्जाः॥
तस्वनं नैरेकहस्तो [illegible] त [illegible] नविघ्नैरभिभूयते॥ गायत्रीं [illegible]
के॥ ततो द्विहस्तमाने तु त्रिंशदंगुलकं स्मृतं॥ चतुर्हस्ते तथा माने अष्ट
त्रिंशत्प्रकल्पितं॥ अंगुलं यवभून्यं स्यात् लक्षहोमे प्रकल्पितं॥ ऋतु
हस्ते तथा माने चतुर्विंशत्र याधिके॥ अंगुलानि युतं प्रोक्तमधिकं यवच
तुष्टयं॥ चत्वारिंशत् अंशायुतं यवसप्तसमन्वितं॥ वसुहस्ते तथा माने
अंगुलं कथितं बुधैः॥ शोभनं कमलं कुर्यात् कुंडमध्ये सरन्ध्रकं॥ सर्वे
षामेव कुंडानां मेखलास्तिस्र एव च॥ एकांगुलं विहायांते मेखलास्तस्य

कारयेत्॥ अर्द्धाष्टीगुणप्रमाणेनकण्ठंचवर्द्धयेत्क्रमात्॥ नंत्रांतरे
कोणसूत्रप्रमाणेनद्विहस्तंकुंडमुद्धरेत्॥ एवंलक्षादिकुंडेषुज्ञेयंकुं
डविधानतः॥ एकहस्तस्यकुंडस्यकोणसूत्रेणपूरितं॥ यन्मानंत
देवपारिभाषिकं॥ द्विहस्तादिमानंनतुप्रकृतहस्ताद्दिगुण्यादिक
मिति॥ इदानींमेखलादीनांमानंतस्यनिगद्यते॥ करार्द्धेमेखलां
कुर्य्याद्द्वेकरांगुलसम्मतां॥ युगंगुलंयोनिमानंयोन्यग्रेकांगुलंवि
दुः॥ युगंगुलंनाभिपद्मंकरार्द्धेसंप्रचक्षते॥ अरत्निमात्रेकुंडेचद्वे
कांगुलसमुन्नता॥ कर्त्तव्यामेखलायोनिश्चतुरंगुलसम्मिता॥ ए
कांगुलंचयोन्यग्रंकुर्य्यादीषदधोमुखं॥ अंगुलत्रितयंचैवनाभिप
द्मंसुशोभनं॥ एकहस्तमितेकुंडेवेदाग्निनयनांगुला॥ कर्त्तव्यामे
खलायोनिंकुर्य्याच्चैवषडंगुलं॥ वेदांगुलंनाभिपद्मंयोन्यग्रेकांगु
लंस्मृतम्॥ कुंडेद्विहस्तेज्ञेयाचवस्तुवेदगुणांगुला॥ योनिस्सप्तांगु
लोपेतायोन्यग्रंचांगुलिद्वयम्॥ पंचांगुलंनाभिपद्मंकुर्य्याच्चैवम
नोहरं॥ चतुर्हस्तमितेकुंडेवसुतर्कयुगांगुला॥ कर्त्तव्यामेखला
स्तिस्त्रोयोन्यग्रंचांगुलिद्वयं॥ योनिरष्टांगुलोपेतानाभिपद्मंषडं
गुलं॥ षट्करेमेखलास्तिस्रोदशाष्टांगुलसम्मिताः॥ योनिर्नवां
गुलोपेतायोन्यग्रंचतुरंगुलं॥ सप्तांगुलंनाभिपद्मंकुर्य्याच्चसुम
नोहरं॥ अष्टहस्तमितेकुंडेभानुपंक्त्यष्टकंगुणा॥ योनिर्दशांगु
लोपेताकर्त्तव्याधोमुखीतथा॥ पंचांगुलंचयोन्यग्रंकुर्य्याद्दशांगुलं
तथा॥ नाभिपद्मंलक्षहोमेतन्त्रविद्भिःप्रकल्पितं॥ योनिंतांहे तु
रग्रेतुमेखलानांपरिस्थितां॥ गजकुम्भवदाकारां योद्दीर्घामधो
मुखीं॥ पश्चिमाभिमुखींयोनिंकुंडकोणेषुनार्पयेत्॥ एवंसमस्तकुं
डानांव्यवस्थेयंप्रकीर्तिता॥ स्थानंदोरभ्यनालंस्यात्योन्यामध्येस
रन्ध्रकं॥ सरंध्रमित्युभयतःसंबध्यते॥ तथाचोक्तंरुद्रयामले॥ यो
न्यामध्येविलंकुर्यात्तदष्टग्राहिसंगितं॥ स्थाननियममाह॥ क्रि
यासारे॥ होमस्यानाहुहिस्थानंस्थानमित्यभिधीयते॥ गौतमीये
सूक्ष्माग्रंस्थूलमूलंचसरन्ध्रंनालमिष्यते॥ सम्मोहनतन्त्रे॥ मूलं
मध्यंतथाचाग्रंक्रमात्तुषट्चतुस्त्रिकं॥ तथाचत्रयोदशांगुलेदी

र्थेनालमित्यर्थः॥ नालमेखलयोर्मध्येपरिधेःस्थापनायच॥ रंध्रंकु
र्य्यात्ततोविद्वान्द्वितीयमेखलोपरि॥ कुंडदोषमाह विश्वकर्म्मा॥
खाताधिकेभवेद्रोगीहीनेधेनुधनक्षयः॥ रन्ध्रकुंडेतुसंतापोमरणं
छिन्नमेखले॥ मेखलारहितेशोकोह्यधिकेवित्तसंक्षयः॥ भार्य्यावि
नाशकंकुण्डंप्रोक्तंयोन्याविनाकृतं॥ अपत्यध्वंसनंप्रोक्तंकुंडंयत्कं
ठवर्जितम्॥ कुंडमेवंविधंनस्यात्स्थंडिलंवासमाश्रयेत्॥ याम
ले॥ नित्यंनैमित्तिकंहोमंस्थंडिलेवासमाचरेत्॥ हस्तमात्रेतुन
कुर्य्यात्वालुकाभिःसुशोभनं॥ अंगुलोत्सेधसंयुक्तंचतुरस्रंसमं
ततः॥ चतुरस्रंचतुष्कोणमित्यर्थः॥ ॥ इतिशाक्तानंदतरंगिण्यां
कुंडनिर्णयःसप्तदशोल्लासः॥ ॥ अथाग्निज्वलनंवक्ष्येसर्वतंत्रानु
सारतः॥ गोमयाम्भःसमालिप्य कुंडंसर्वत्रमंत्रवित्॥ सामान्या
र्घ्ये प्रकल्प्याद्यपंचगव्येनसेचयेत्॥ शारदायां॥ अष्टादशाःस्युः
संस्काराःकुंडानांकुंडदेशिकाः॥ वीक्षणंमूलमंत्रेणशरेणप्रोक्षणं
मतं॥ तेनैवताडनंदर्भैर्वर्मणाभ्युक्षणंस्मृतम्॥ अस्त्रेणखननंद्धा
रौहन्मंत्रेणप्रपूरणं॥ समीकरणमंत्रेणसेचनंवर्मणामतं॥ कुट्टनं
होतुमंत्रेणवर्म्ममंत्रेणमार्ज्जनं॥ विलेपनंकलारूपंकल्पनंतदनं
तरं॥ त्रिसूत्रीकरणंपश्चात्हृदाःधोमार्जनंमतं॥ अस्त्रेणवज्री
करणंवज्ररूपेणचिंतनं॥ चतुष्पथंचचतुरस्रीकरणं॥ अक्षपाटनं
इन्द्रियोद्घाटनं॥ तिस्रस्तिस्रोलिखेद्रेखाःहृदप्रागुदग्रगाः॥ प्रा
गग्रापांस्मृतादेवासुकुंडेशपुरंदराः॥ रेखानामुदगग्राणांब्रह्म
वैवस्वतेन्दवः॥ अथवात्रिकोणंतद्बहिःषट्कोणपद्मंपरिकल्प
येत्॥ चतुरस्रेचतुर्द्वारंसर्वंवावन्हिमंडलं॥ कुंडस्योत्तरभागेच
त्रिरेखाहस्तमानकं॥ दक्षिणोत्तरतस्तद्वल्लिखेद्रेखात्रयंशुभं॥
अर्घ्याद्भिःप्रोक्षणंसर्वंपंचशुद्धिंसमाचरेत्॥ पंचशुद्धिमाह शार
दायां॥ सर्व्वाण्यक्षतरणेति॥ वीक्षणंमूलमंत्रेणशरेणप्रोक्षणं
मतं॥ ताडनंहेतिमंत्रेणकवचेनाथलेपयेत्॥ अस्त्रेणरक्षणंकृत्वा
वन्हेःसंस्कारमारभेत्॥ विहिताग्निमाह तंत्रे॥ ततोवन्हेर्योगपी
ठंअर्च्चयेत्कर्णिकोपरि॥ धर्म्मंज्ञानंचवैराग्यमैश्वर्यमग्नितोयजेत्॥

पूर्वादिदिक्षुचापूर्वान्रथधर्माधिकान्यजेत्॥मध्येचपूजयेद्द
न्हेनैवशक्तिर्विधानवित्॥पीताश्वेतारुणाकृष्णा॥धूम्रानीलास्फु
लिंगिनी॥रुचिराराजनिप्रोक्ताः कृशानोर्नवशक्तय॰॥अंअर्कमंडलं
संपूज्यताडनं सोममंडलंमंवन्हिमंडलंतदभ्यर्च्ययेद्गंधपुष्पकैः
॥वागीश्वरींऋतुस्नातांनीलेन्दीवरसन्निभां॥वागीश्वरेणसहि
तांउपचारैःसमर्चयेत्॥अत्रिः॥पात्रांतरेणपिहितेताम्रेपात्रादि
केशुभे॥अग्निप्रणयनंकुर्याच्छराचेनादृशेपिवा॥यत्तुस्मृतिसारे
॥शरावेभिन्नपात्रेवाकपालेवोल्मुकेपिवा॥नाग्निप्रणयनंकुर्य्याद्दे
रिहानिप्रयापदं॥इतितस्यमुख्यपात्रेसम्भवेशरावोनग्राह्यः इ
तितात्पर्यार्थः॥आनीयास्त्रेणनैर्ऋत्येक्रव्यादांशंपरित्यजेत्॥शा
रदायां॥संस्कुर्यात्तंयथा न्यायंदेशिकोवीक्षणादिभिः॥औदा
र्येवघराग्निभ्यांभौमस्यैक्यंस्मरन्वसोः॥योयजेद्वन्हिबीजेनचैतन्यं
पावकेनतथा॥तारेणमंत्रितंकृत्वाधेनुमुद्रामृतीकृतं॥अस्त्रेणरक्षि
तंपश्चात्तन्मंत्रेणावगुंठितं॥अर्चितंत्रिःपरिभ्राम्यकुंडस्योपरिदे
शिकः॥प्रदक्षिणंतदातावन्मंत्रोच्चारणपूर्वकं॥आमेनोऽभिमुखं
वन्हिंजानुस्पृष्टमहीतलः॥शिवबीजधियादेव्यायोनावेवंविनि
क्षिपेत्॥समयातंत्रे॥कुशेनाच्छादयतद्योनींचतुष्कांडपठंन्यसे
त्॥ततोदेवापदेव्येचदद्यादाचमनीयकं॥गर्भनाड्याधृतंध्याये
द्वन्हिरूपंहरिंगुरुं॥हरिरित्युपलक्षणं॥समयातंत्रे॥देव्यावाम
करेकुर्यातरसार्थंदर्भकंकणं॥भूषाभिर्भूषयेद्देवींत्रैलो[illegible]
मातरं॥रेफवापुरष्टश्चवैरश्चनादविंदुविभूषिताः॥[illegible]ता
चजिव्हायांमनवःपरिकीर्त्तिताः॥पायोलिंगेचनाभौच[illegible]कंठ
मूलतः॥नासिकायांभ्रुवोर्मध्येजिव्हाज्वालारुचोन्यसेत्॥जि
व्हाष्टास्त्रिविधाप्रोक्तागुणभेदेषुकर्मसु॥हिरण्यागगनारक्ता
कृष्णान्यासुप्रभामता॥वहुरूपातिरक्ताचसात्विक्योयागकर्मसु
पद्मरागसुवर्णाख्यातृतीयाभद्रलोहिता॥लोहितानंतरश्वेताधू
मिनीचकरालिका॥वाजस्योरसनावन्हेर्विहितासर्वकर्मसु॥वि
श्वमूर्त्तिस्फुलिंगिन्योधूम्रवर्णामनोजवा॥लोहितान्याकराला

स्याकालीतामस्यईरिता॥ एताःसप्तनियुंज्यंतेक्रूरकर्मसुमंत्रि
भिः॥ अमर्त्यापितृगन्धर्वयक्षनागपिशाचकाः॥राक्षसाःसप्तजि
व्हापांईरिताअधिदेवताः॥वन्हेरंगमनून्न्यस्यतुलवृत्तेनवर्त्तना
सहस्रार्च्चिस्वस्तिपूर्णउत्तिष्ठपुरुषस्तथा॥ धूमव्यापीसप्तजिव्हा
धनुर्धरइतीरितः॥शारदायां॥ङंशगेमनवःप्रोक्ताजातिभिःसह
संयुताः॥ हृदयादिक्रमेणैवन्यस्तव्याअंगदेवताः॥ मूर्द्धिस्कंदेदक्ष
पार्श्वेककुटीकटिपार्श्वयोः॥ स्कन्देमूर्द्धिचविन्यस्यप्रादक्षिण्य
क्रमेणतु॥जातवेदाःसप्तजिव्होहव्यवाहनसंज्ञकः॥ अश्वोद
रजसंज्ञोन्यःपुनर्वैश्वानरादयः॥कौमारतेजाविश्वमुखोहस्ति
दैवमुखस्तथा॥तारागनयेपदाद्याःस्युस्त्वत्यन्तावन्हिमूर्त्तयः॥
एवंविन्यस्तदेहःसन्ज्वालयेन्मनुनामुना॥शारदायां॥ज्वा
लयेदितिज्वालिनीमुद्रांप्रदर्शयइति॥तत्वाद्यबीये॥मध्यमे
मिलितेकृत्वाअंतरंगुष्ठकौक्षिपेत॥मुद्रेयाज्वालिनीप्रोक्तावन्हे
र्ज्वालनकर्म्मणि॥चित्पिंगलहनहनदहदहपचपचपुस्मानुदी
प्यैच॥सर्वज्ञाज्ञापयज्ञापयस्वाहामंत्रोयमनुरीरितः॥अग्निं
प्रज्वलितंवंदेजातवेदंहुताशनं॥सुवर्णवर्णममलंसमिद्धंसर्व
तोमुखं॥शारदायां॥अभिषिच्यततोतोयैर्विशुद्धैर्मेखलोपरि
॥दर्भकाभ्यर्कसुद्धैश्चमूलमध्याग्रछादितैः॥संस्तरेद्विचरान्मं
त्रीमदक्षिणवशात्ततः॥एवंसंस्तरणंकुर्य्यातवर्जेपित्व्यात्मनो
दिशं॥गणेशविमर्शिन्यां॥प्रागग्रा उदगग्रैश्चदर्भैर्वन्हिंपरि
स्तरेत्तेनतत्रकुशोद्भवैस्तह्तकाष्ठैश्चपरिधित्रयं॥मध्यस्तुमे
खलां तत्तुसंस्तरेतत्रवित्तमः॥अथचेतस्थंडिलेमंत्रीभूमौसर्वं
परिस्तरेत॥यज्ञकाष्ठसमुद्भूतंत्रिःप्रदेशमितंशुभं॥परिधिःकथि
तःसर्वैर्देशिकैस्तन्त्रवित्तमैः॥निक्षिपेद्दिक्षुपरिधीन्प्राचीवर्ज्जं
गुरूत्तमः॥प्राद क्षिण्येनसंपूज्यास्तेपुब्रह्मादिमूर्त्तयः॥गन्धा
दिभिःसमभ्यर्च्यवन्हिदेवंविभावयेत॥वन्हेर्ध्यानंयथा॥त्रिनय
नमरुणाभंबद्धमौलीन्दुशुक्लंसुकमरुणममिकाकृष्णमम्भोज
संस्थं॥अभिमतवर शक्तिस्वस्तिकाभीतिमुच्चैर्नेमतकमलमा

लानंहृत्तांशं कृशानं ॥ एवंविधमनसाध्यायेत् स्वस्तिकादौ गुरूत्तमः
कृष्णांकृष्णागतेवर्णं ध्यायेन्मारणकर्मणि ॥ मूर्त्तिरष्टौसमभ्यर्च्यष
ट्कोणेतुषडंगकं ॥ मध्येषट्स्वपिकोणेषुजिव्हास्थानारुचोयजेत्
॥ केशरे पूर्व्वमार्गेणपूजयेदंगदेवताः ॥ दलेषु प्रयजेन्मूर्त्तीः शक्तिस्व
स्तिकधारिणीः ॥ लोकपालांस्ततोदिक्षुपूजयेदुक्तलक्षणान् ॥ शा
रदायां ॥ वैश्वानरोजातवेदपदेपश्चादिहावहः ॥ लोहिताक्षप
दस्यांतेसर्व्वकर्म्माणिसाधय ॥ वन्हिजायावधिःप्रोक्तोमंत्रःपाव
कदुर्लभः ॥ ज्ञानार्णवे ॥ ब्राह्मणंदक्षिणेभ्यर्च्यघृतस्थालींप्रपू
जयेत् ॥ आज्यस्थालींसमानीयप्रक्षालयेदस्त्रमंत्रतः ॥ कुण्डांग
रान्समुत्तोल्यसिंचेत्तत्रास्त्रमंत्रतः ॥ शारदायां ॥ निरृत्यवायव्यें
ऽगारान् हृदातेषुनिवेशयेत् ॥ ज्ञानार्णवे ॥ तस्यामाज्यंविनिक्षि
प्यजानीयात्तापनेहितत् ॥ शारदायां ॥ दीप्तेनतस्याज्यमप्यसंस्कृ
तंवीक्षणादिभिः ॥ अन्तरे ॥ प्रज्वाल्यकुशगच्छंतु आज्येक्षिप्त्वा
नेनेक्षिपेत् ॥ अभिद्योतनमित्युक्तंसर्व्वत्रसर्वकर्मसु ॥ शारदा
यां ॥ दीप्तेनदर्भयुग्मेननीराज्यंसर्वकर्मणा ॥ अग्नौविसर्ज्जयेद्दर्भ
मभिद्योतनमीरितं ॥ पुनःकुशान्समुज्ज्वाल्यनिक्षिपेदाज्यमध्यतः
॥ मूलमंत्रेणमतिमान् आज्यसंस्कारईरितः ॥ संदीप्यार्घ्ययुग
लं आज्येक्षिप्त्वानलेक्षिपेत् ॥ गुरुर्हृदयमंत्रेणपवित्रीकरणन्त्वि
दं ॥ अभिमन्त्र्यचमूलेनवक्षयेदस्त्रमुच्चरन् ॥ प्रदर्श्यधेनुयोनीच
आज्यंतदमृतात्मिकं ॥ प्रादेशमात्रंसमिधंग्रन्थिदर्भद्वयंप[illegible]
न्तरे निक्षिप्यभागेद्वौहृत्वापक्षौमुक्तेतरौस्मरेत् ॥
इडांभागेदक्षिणेपिंगलापुनः ॥ सुषुम्नामध्यतोध्यात्वा ॥ [illegible]
मेयथाविधि ॥ स्रुकस्रुवौसमादायविधिनानिर्मितौगुरुः ॥ पश्चा
दादायपाणि भ्यांस्रुकस्रुवौतावधोमुखौ ॥ त्रिशःप्रतापयेद्वन्हौ
दर्भानादायदेशिकः ॥ तदग्रमूलमध्यानिशोधयेत्तैर्यथाक्रमं ॥ गृ
हीत्वावामहस्तेनप्रोक्षयेद्दक्षिणेनतौ ॥ पुनःप्रताप्यतौमंत्रीदर्भानग्नौ
विनिक्षिपेत् ॥ स्रुवमादायमतिमान्धारयेत्तुत्रिभागतः ॥ चतुरंगुलं
परित्यज्यधारयेच्छंखमुद्रया ॥ शारदायां ॥ स्रुवेणदक्षिणाद्भा गा

दाद्याज्यं हृदा गुरुः॥ वामतस्तद्ददादायास्योमाय स्वाहयात तः॥
मंत्रेणानेन जुहुयात् अग्नेर्वामविलोचने॥ मध्यमात्समादाय अ
ग्नेर्भालस्थलोचने॥ जुहुयादग्निसोमाभ्यां स्वाहेति मनुना मुना॥
शारदायां॥ हृन्मंत्रेण स्रुवेणाज्यं भागादादाय दक्षिणात्॥ जुहुयाद
ग्नयेस्वि ष्टकृते स्वाहेति तन्मुखे॥ इत्यग्नेर्नेत्र वक्त्राणां कुर्यादुद्घाट
नं गुरुः॥ समयातंत्रे॥ पुनर्महाव्याहृतिभिर्हुत्वा जिव्हाङ्गमूर्त्तितो
हुनेत्॥ सताराभिर्व्याहृतिभिराज्येन जुहुयात्पुनः॥ वैश्वानरेण
मनुना त्रिवारं जुहुयाद्गुरुः॥ समयातंत्रे॥ एकैकाहुतिभिः कुर्या
द्गर्भस्वानादिकाः क्रियाः॥ क्रमेण देवदेवेशि स्वाहांत मूलविद्यया
॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा॥ जातकर्म तथा नाम उ
पनिष्क्रमणं तथा॥ चूडोपनयने भूयो वेदाध्ययनमेव च॥ गो
दानं च विवाहं च संस्काराञ्छुभकर्म्मणि॥ ततश्च पितरौ वन्हेः संयो
ज्य हृदयं नयेत्॥ वन्हिमंत्रेण विधिवद्दद्यादाहुतिपंचकं॥ समि
धः पंच जुहुयान्मूलाग्रघृतसंयुताः॥ गुरुर्हृदयमंत्रेण विधिवः
त्स्वाहयाविना॥ शारदायां॥ मंत्री जिव्हांगमूर्तीनां क्रमाद्धृदयेर्यथा
विधि॥ प्रत्येकं जुहुयादेकामाहुतिं मंत्रवित्तमः॥ अथादाय स्रु
॥८ वेणाज्यं चतुः श्रुति र्विधीयते॥ स्रुवेण तिष्ठन्नेवाग्नौ देशिकोय
श्री तमानसः॥ जुहुयादग्निमंत्रेण वौषडंतेन संपदे॥ वायवीसंहि
८ तायां॥ ताः पलाशपरावापि यत्ती यद्वादशांगुलाः॥ अवक्राणि
स्रुवं [illegible] क्रामहूचीनिर्व्रणाः समाः॥ द्वादशांगुला वा विहिताः क
[illegible] संगिताः॥ प्रादेशमात्राश्चालाभे होतव्याः सकला अ
पि॥ [illegible]तमीये॥ महागणेशमंत्रेण हुनेदेकादशाहुतीः॥ सामा
न्यं सर्वदेवानां एंदग्निमुखं स्मृतं॥ बहुरूपायां जिव्हाया आवाज्य
परमेश्वरीं॥ गंधादिभिः समभ्यर्च्य जुहुयात् षोडशाहुतीः॥ मूलमं
त्रेण विधिवत् तैरेवैकीकृतं स्थिरं॥ शारदायां॥ ततः पीठं समभ्यर्च्य देव
तायाहुताशने॥ अर्च्चयेदग्निरूपां तां देवनामिष्टदायिनीं॥ ततश्च
जुहुयान्मंत्री पंचविंशति संख्यया॥ पुनस्तेनैव जुहुयात् आहुतीः पं
चविंशतिः॥ नाडीबंधनमित्युक्तं वन्हिदेवताया अपि॥ शारदायां॥

मूलमंत्रेणजुहुयादाज्येनएकादशाहुतीः॥अंगादिपरिवाराणांए
कैकमाहुतिंहुनेत्॥पुनर्महाव्याहृतिभिर्होमंकुर्याद्यथाविधि॥ति
लेनाज्येनजुहुयात्सहस्रादियथाविधि॥अनुक्तेतुहविर्द्रव्येतिला
ज्यंहविरुच्यते॥तस्मात्तुजुहुयाद्वन्हेःपंडितःसर्वकर्मसु॥तथा
हुतिंसम्पादयेद्भागेआज्यस्याद्यहुतिक्रमात्॥विशेषमाह तं
त्रांतरे॥स्वेत्यग्नौहेतितद्भागेशेषमग्नौविनिक्षिपेत्॥ॐभूरग्न
येपृथिव्यैमहतेस्वाहयाततः॥ॐभूरेवायवेऽन्तरिक्षायदिवे
चस्वाहयाततः॥स्वश्चन्द्रमसेदिग्भ्यश्चनक्षत्रेभ्यःस्वाहा॥ॐ
भूर्भुवःस्वश्चन्द्रमसेनक्षत्रेभ्यश्चमहतेस्वाहा॥स्रुवौचसमा
दायघृतेनापूर्य्यतौपुनः॥होमद्रव्याणिनिक्षिप्यनाभौसंस्थाप्य
तौपुनः॥अग्नेर्नामकरणंकृत्वादद्यात्पूर्णाहुतिंप्रिये॥ब्रह्मार्प
णेनमनुनादद्यात्पूर्णाहुतिंपुनः॥योजयेत्हृदयेधीमानिष्टंसा
धकसत्तमः॥शारदायां॥ततःकाष्ठंततःश्रोत्रंयतोधूमस्ततोना
सिका॥यत्राल्पज्वलनंनेत्रंयतोभस्मततःशिवः॥यत्रप्रज्वलि
तोवन्हिस्तन्मुखंजातवेदसं॥फलमाह॥शारदायां॥वधिवधंक
र्णहोमेनेत्रेऽन्धत्वमवाप्नुयात्॥नासिकायांमनःपीडाशिरोहो
मोहिमूलदः॥शुद्धिसिंदूरबालार्कवर्णवन्हेःशुभावहः॥भेरी
वादित्रगंभीरशब्दोवन्हेःशुभप्रदः॥चन्द्रचंदनकुन्दाभोधूमः
सर्वार्थसिद्धिदः॥खचरायसरच्छब्दोवन्हेःसर्वविनाशकृत्
॥कृष्णःकृष्णगतेवर्णोवाज्यंचापिविनाशयेत्॥नागचंपकप्
न्नागपाटलिंगृथिसन्निभः॥पद्मेन्दीवरकल्हारेस
संन्निभः॥पावकस्याण्डभोगन्धइत्युक्तस्तंत्रवेदिभिः॥भूत
गंधोहुतभुकहोतुर्दुःख ॑भवेत्॥एवंविधेषुदोषेषुप्राय
श्चित्तोपदेशिकः॥मूलेनाज्येनजुहुयात्पंचविंशतिवाहुति॥
रिति॥ ॐ ॥

इतिशाक्तानंदतरङ्गिण्यांहोमनिर्णयःअष्टदशोल्लासः ॥

॥समाप्तः॥

अथदुर्गानाममाहात्म्यम्

श्रीगणेशायनमः॥ मंगलाअसिसर्वेषां तेनत्वंसर्व्वमंगला॥ वरदासिचमर्त्यानांवरदातेनकीर्त्यते॥ अशेषंजयसेदुर्गादुर्गातेनाभिगद्यते॥ भक्तानांशंकरासीति शंकरीत्वनुगीयते॥इतिवचनात्॥ संसारार्णवमग्नानांसर्वेषांप्राणिनामिह॥ चंडिकैकापरापातानराणांमुक्तयेसदा॥ संसारार्णवमग्नानांदुर्गैकापरमंपदं॥ दुर्गैवदेवताःसर्वादुर्गैकाकर्म्मवैदिकं॥ दुर्गैकापरमंतत्वंदुर्गैकापरमंबलं॥ नत्वयाविहितंकिंचिद्भूतंस्थावरजंगमं॥ दुर्गैकापरमादेवीदुर्गैकापरमंपदं॥ दुर्गैकापरमंज्ञानंदुर्गैकाज्ञानमेवच॥ दुर्गैकापरमंसत्यंदुर्गैकापरमागतिः॥ दुर्गैकापरमंदैवंदुर्गैकापरमौषधं॥ दुर्गैकासुखमत्यंतंदुर्गैकानिर्वृत्तिःपरा॥ दुर्गैकापरमातुष्टिर्दुर्गैकापरमंयशः॥ दुर्गैकापरमंतत्वंदुर्गाभिन्नमिदंजगत्॥ इतिभविष्यपुराणेभ्यः॥ प्रयाणप्राणपाथेयंसंसारव्याधिभेषजं॥ दुःखार्णवपरित्राणं दुर्गानामाक्षरद्वयम्॥ ॥इतिवचनात्॥ ॥छ॥ ॥

अथशाक्तानन्दतरङ्गिण्याः सूचीपत्रम्